# MudgalapurAna Khanda 6 Vikatacharitam

# મુદ્ગલપુરાણં ખણ્ડઃ ૬ વિકટચરિતમ્

## Document Information

Text title : Mudgala Purana Khanda 6 Vikatacharitam

File name : mudgalapurANam6.itx

Category : purana, ganesha

Location : doc_purana

Proofread by : Yash Khasbage

Latest update : September 18-19, 2023 Ganeshachaturthi

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 18, 2023

*sanskritdocuments.org*

# MudgalapurAna Khanda 6 Vikatacharitam

# મુદ્ગલપુરાણં ખણ્ડઃ ૬ વિકટચરિતમ્

॥ મુદ્ગલપુરાણં ખણ્ડઃ ૬ ॥

॥ અથ શ્રીમુદ્ગલપુરાણે ષષ્ઠઃ ખણ્ડઃ પ્રારભ્યતે ॥

(Page ખં. ૬ અ. ૧ પાન ૧)

## ૬.૧ શક્તિધ્યાનવર્ણનં નામ પ્રથમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શૌનક ઉવાચ ।
સૂત ત્વયા મહાપ્રાજ્ઞ કથિતં પરમાદ્ભુતમ્ ।
લમ્બોદરસ્ય માહાત્મ્યં તેનાઽહં તૃપ્તિમાગતઃ ॥ ૧ ॥

અહો ગણેશમાહાત્મ્યં સર્વસન્તોષકારકમ્ ।
શ્રવણેનૈવ સાક્ષાત્તુ બ્રહ્મસાયુજ્યદાયકમ્ ॥ ૨ ॥

અધુના વદ માહાત્મ્યં વિકટસ્ય વિશેષવિત્ ।
સર્વસિદ્ધિપ્રદં પૂર્ણં સૂત યોગામૃતં પરમ્ ॥ ૩ ॥

અન્યન્ મુદ્ગલવિપ્રેણ દક્ષાય કથિતં પુરા ।
પૃષ્ટં દક્ષેણ કિં તાત વદ તન્મે પ્રવિસ્તરાત્ ॥ ૪ ॥

તવ સઙ્ગેન સન્તુષ્ટા વયં સર્વે વિશેષતઃ ।
ભવામઃ કૃતકૃત્યાશ્ચ કથાશ્રવણમાત્રતઃ ॥ ૫ ॥

સૂત ઉવાચ ।
સમ્યક્ પૃષ્ટં ત્વયા વિપ્ર ભાર્ગવાણાં શિરોમણે ।
સારગ્રાહી ન સન્દેહઃ શૌનક ત્વં વિશેષતઃ ॥ ૬ ॥

ભવતાં પ્રીતિકામાર્થં વદિષ્યામિ વિશેષતઃ ।
ચરિતં ગણનાથસ્ય બ્રહ્મભૂતપદપ્રદમ્ ॥ ૭ ॥

ન ગણેશાત્ પરં કિઞ્ચિદ્ વિદ્યતે વેદવાદતઃ ।
અલ્પપુણ્યયુતાનાં તુ ન પ્રીતિસ્તત્ર વર્ધતે ॥ ૮॥

પુરા પૃષ્ટો મહાયોગી યોગં દક્ષેણ વીપ્સતા ।
તદેવાઽહં વદિષ્યામિ શ‍ૃણુત બ્રાહ્મણાઃ પરમ્ ॥ ૯॥

દક્ષ ઉવાચ ।
ધન્યં મે જન્મકર્માદિ યેન તે દર્શનં પ્રભો ।
પ્રાપ્તં પુણ્યવશેનૈવ પરં મુદ્ગલયોગદમ્ ॥ ૧૦॥

અધુના વદ માહાત્મ્યં વિકટસ્ય વિચક્ષણ ।
શ્રુત્વા લમ્બોદરસ્યૈવ તૃષ્ણા મે વર્ધતે મુને ॥ ૧૧॥

કીદૃશોઽયં ગણાધ્યક્ષઃ કીદૃશં બ્રહ્મ તસ્ય વૈ ।
કેન યોગેન લભ્યશ્ચ કતિ તસ્યાવતારકાઃ ॥ ૧૨॥

કિં વિહારઃ કિમર્થં સ ભૂમૌ દેવઃ સમાગતઃ ।
કાન્ દૈત્યાન્ હતવાન્ વિપ્ર કથં દેવૈશ્ચ સંસ્તુતઃ ॥ ૧૩॥

ઇત્યાદિ વિવિધં તસ્ય ચેષ્ટિતં વદ માનદ ।
ભવાદૃશા મહાભાગાઃ પરોપકૃતિકારકાઃ ॥ ૧૪॥

સંસારાબ્ધૌ નિમગ્નાનાં નૌકારૂપા મતા બુધૈઃ ।
ભવન્તો નાત્ર સન્દેહસ્તારયસ્વધુના ચ મામ્ ॥ ૧૫॥

સૂત ઉવાચ ।
દક્ષસ્ય વિનયેનૈવં ભાવેન તોષસંયુતઃ ।
મુદ્ગલસ્તમથોવાચ પરં તચ્છૃણુ સૌખ્યદમ્ ॥ ૧૬॥

મુદ્ગલ ઉવાચ ।
ધન્યોઽસિ દક્ષ યેન ત્વં ગણનાથકથાં મુહુઃ ।
પ્રશ્નેન ભક્તિસંયુક્તો વર્ધયસિ સુસારવિત્ ॥ ૧૭॥

સાક્ષાદ્બ્રહ્મસુતસ્તત્ર ચિત્રં કિં ભવતિ ત્વયિ ।
ભાવેન તે પ્રસન્નોઽહં વદિષ્યામિ હિતાવહમ્ ॥ ૧૮॥

વિકટસ્ય ચ માહાત્મ્યં બ્રહ્મભૂતકરં પરમ્ ।
સર્વસિદ્ધિપ્રદં તુભ્યં કથયામિ સમાસતઃ ॥ ૧૯॥

અત્રેતિહાસં મુખ્યં વૈ વિધે શ‍ૃણુ પુરા ભવમ્ ।

કથયામિ વિચિત્રં તે વિકટાખ્યાનસંયુતમ્ ॥ ૨૦॥

આદિમાયા મહાશક્તિઃ શક્તિલોકે નિરામયે ।
સંસ્થિતા સેવ્યમાના સા દેવીભિઃ સેશ્વરાત્મભિઃ ॥ ૨૧॥

એકદા પૂજને સક્તાં નિયમસ્થાં વિશેષતઃ ।
ગણેશાનસ્ય તાં દૃષ્ટ્વા પપ્રચ્છુઃ શક્તયઃ પરાઃ ॥ ૨૨॥

મહાકાલી પ્રજાનાથ મહાલક્ષ્મીસ્તથૈવ ચ ।
મહાસરસ્વતી દેવ્યોઽન્યાશ્ચ નાનાવિધા મતાઃ ॥ ૨૩॥

મહાકાલીમહાલક્ષ્મીમહાસરસ્વત્ય ઊચુઃ ।
ત્વં સાક્ષાત્ સર્વરૂપાઽસિ જગદ્બ્રહ્મપ્રકાશિની ।
ત્વદીયધ્યાનયોગેન બ્રહ્મભૂતા ભવન્તિ ચ ॥ ૨૪॥

ધર્માર્થકામમોક્ષાણાં દાત્રી ત્વં કથિતા બુધૈઃ ।
વેદેષુ સર્વશક્તીનાં મૂલભૂતા ત્વમઞ્જસા ॥ ૨૫॥

(Page ખં. ૬ અ. ૧ પાન ૨)
બ્રહ્મવિષ્ણુશિવાદ્યાશ્ચ ત્વદનુષ્ઠાનતઃ સતિ ।
ઈશ્વરાઃ સર્વકાર્યેષુ સમર્થાઃ પ્રબભૂવિરે ॥ ૨૬॥

કર્મણાં ફલદાત્રી ત્વં તપસાં જ્ઞાનધારિણામ્ ।
ત્વત્તઃ પરતરં નાસ્તિ વેદશાસ્ત્રપ્રમાણતઃ ॥ ૨૭॥

ત્વં નિત્યં નિયમે સંસ્થા ગણેશં મૂર્તિગં પરમ્ ।
ધ્યાનયુક્તા પૂજયસિ તં ધ્યાયસિ કિમર્થતઃ ॥ ૨૮॥

સદા નામાવલિં તસ્ય વદસિ જગદમ્બિકે ।
ભ્રમાર્થં સર્વજન્તૂનાં ગુહ્યગોપનકારણાત્ ॥ ૨૯॥

સર્વસત્તાધરી દેવી ત્વમેવાત્ર ન સંશયઃ ।
અસ્માન્ મોહયુતાન્ શક્તે કિમર્થં કુરુષે વદ ॥ ૩૦॥

લજ્જાં ત્યક્ત્વા ત્વદીયાશ્ચાધુના પૃચ્છામહે વયમ્ ।
નિત્યં દૃષ્ટ્વા પ્રસઙ્ક્ષુબ્ધા ભવામઃ પરમાદ્ભુતે ॥ ૩૧॥

દાસ્યસ્ત્વદીયપાદસ્ય નાન્યત્ત્વત્તઃ પરં કદા ।
વેદમાર્ગેણ સર્વેશિ જાનીમો વદ સામ્પ્રતમ્ ॥ ૩૨॥

મુદ્ગલ ઉવાચ ।

તિસૃભિઃ શક્તિમુખ્યાભિઃ પૃષ્ટા સા શક્તિરુત્તમા ।
સ્નેહેન તા જગાદાથ રહસ્યં શ‍ૃણુ મુખ્યકમ્ ॥ ૩૩॥

આદિશક્તિરુવાચ ।
શ‍ૃણુધ્વં શક્તયઃ સર્વા રહસ્યં મે હૃદિ સ્થિતમ્ ।
સર્વસિદ્ધિપ્રદં પૂર્ણં ત્રય્યાદ્યાઃ પરમાદ્ભુતમ્ ॥ ૩૪॥

યથાવદથ કલ્યાણ્યસ્તથાઽહં સર્વગા યતઃ ।
ગણેશસ્યાંશરૂપત્વાદ્ગણભાવસમાશ્રિતા ॥ ૩૫॥

પુરા વયં સમુત્પન્નાશ્ચત્વારો દેવમુખ્યકાઃ ।
શમ્ભુર્વિષ્ણુરવિર્દેવ્યો ગણેશાનાદહં કિલ ॥ ૩૬॥

નામરૂપાત્મકં સર્વં મત્તો બ્રહ્મ ભવાત્મકમ્ ।
તત્રાઽહં બ્રહ્મભૂતત્વાત્ સંસ્થિતા નાત્ર સંશયઃ ॥ ૩૭॥

નામરૂપાત્મકસ્યાપિ નાશોત્પત્તી પ્રકીર્તિતે ।
તત્ર સ્થિતમતો બ્રહ્માઽસત્સ્વાનન્દમયં મતમ્ ॥ ૩૮॥

ઉત્પત્તિનાશભૂતેષુ તદાધારં સદાત્મગમ્ ।
સૂર્યસ્તદેવ દેવ્યસ્તુ બ્રહ્મ સત્યાત્મકં પરમ્ ॥ ૩૯॥

અસત્સન્મયરૂપશ્ચ વિષ્ણુઃ સામ્યે વ્યવસ્થિતઃ ।
નેતિરૂપઃ શિવસ્તત્ર ચતુર્થઃ કથ્યતે પરઃ ॥ ૪૦॥

ચતુર્ણાં ચૈવ સંયોગે સ્વાનન્દઃ પઞ્ચમઃ સ્મૃતઃ ।
સ્વસંવેદ્યેન યોગેન લભ્યતે યોગસેવયા ॥ ૪૧॥

અયોગઃ પઞ્ચભિર્હીનો વ્યતિરેકપ્રભાવતઃ ।
સંયોગાઽયોગયોર્યોગે ગાણેશો યોગ ઉચ્યતે ॥ ૪૨॥

પઞ્ચધા ચિત્તવૃત્તીનાં ચાલકસ્તેન કથ્યતે ।
ચિન્તામણિઃ સદા દેવ્યઃ પશ્યધ્વં યોગમાર્ગતઃ ॥ ૪૩॥

માયારૂપા સ્વયં સિદ્ધિર્ભ્રાન્તિદા વિવિધા સદા ।
ભ્રાન્તિધારકરૂપા સા બુદ્ધિઃ શાસ્ત્રેષુ કથ્યતે ॥ ૪૪॥

તયોઃ સ્વામી ગણેશાનઃ સ્વાનન્દનગરે સ્થિતઃ ।
યોગશાન્તિમયઃ સાક્ષાલ્લક્ષલાભપિતા હૃદિ ॥ ૪૫॥

સંયોગશ્ચ ગકારાખ્યો હ્યયોગશ્ચ ણકારકઃ ।

તયોઃ સ્વામી ગણાધીશો વયં તસ્ય કલાત્મિકાઃ ॥ ૪૬॥

અતસ્તં ભક્તિસંયુક્તા ભજામ્યત્ર ન સંશયઃ ।
ન મોહાર્થં મહાદેવ્યો ગુહ્યં ગોપયિતું ચ ન ॥ ૪૭॥

એતત્ સર્વં સમાખ્યાતં મદીયનિયમાત્મકમ્ ।
ચિત્તે ચિન્તામણિં દેવ્યો ધ્યાયામિ ભક્તિસંયુતા ॥ ૪૮॥

કામમોહિતચિત્તાનાં ન પ્રત્યક્ષો ગજાનનઃ ।
ભવતે ભાવહીનાનાં ભજતામપિ સર્વદા ॥ ૪૯॥

અજ્ઞાનાવરણૈર્યુક્તા માં વદન્તિ પરાત્પરામ્ ।
ગણાસ્તસ્ય વયં સર્વે શમ્ભુવિષ્ણુમુખાઃ કિલ ॥ ૫૦॥

ગજો નિર્ગુણરૂપાખ્યસ્તદેવાનનમુચ્યતે ।
કણ્ઠાધઃ સગુણં બ્રહ્મ તયોર્યોગે સ દેહભૃત્ ॥ ૫૧॥

(Page ખં. ૬ અ. ૨ પાન ૩)
ઇત્યુક્ત્વા વિરરામાથ શક્તિઃ સ્વાનન્દવાસિની ।
અસત્પાત્રી પ્રજાનાથ વિસ્મિતાસ્તા બભૂવિરે ॥ ૫૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે શક્તિધ્યાનવર્ણનં નામ પ્રથમોઽધ્યાયઃ ॥ ૬.૧

## ૬.૨ શિવવિષ્ણોર્વરપ્રદાનં નામ દ્વિતીયોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
મહાકાલીમુખા દેવ્યઃ શ્રુત્વા યોગં પુરાતનમ્ ।
વિસ્મિતાસ્તાઃ પુનઃ સર્વા વચ ઊચુઃ પ્રહર્ષિતાઃ ॥ ૧॥

શક્તય ઊચુઃ ।
મહામાયે ત્વયા પ્રોક્તં સર્વસંશયનાશનમ્ ।
શ્રુત્વા વયં ગણેશસ્ય યોગં જ્ઞાનયુતાઃ કૃતાઃ ॥ ૨॥

કામમોહિતચિત્તાનાં ન પ્રત્યક્ષો ભવેત્ કદા ।
ગણેશાનસ્ત્વયા પ્રોક્તો જન્મકોટિશતૈરપિ ॥ ૩॥

ગણેશપ્રાપ્તિહીના યે જન્તવશ્ચેશ્વરાસ્તથા ।

જન્મ તેષાં વિશેષેણ નિષ્ફલં સમ્મતં બુધૈઃ ॥ ૪॥

અહો જ્ઞાનયુતં દેહં પ્રાપ્ય સર્વાર્થદાયકમ્ ।
સર્વદં ગણનાથં યે ન ભજન્તેઽતિગૂઢકાઃ ॥ ૫॥

રાસભાદિસમા દેવિ જ્ઞાતવ્યા જ્ઞાનવર્જિતાઃ ।
કામયુક્તસ્વભાવેન ત્યજન્તિ ગણનાયકમ્ ॥ ૬॥

કામસ્ય ચરિતં શક્તે વદ વિસ્તરતઃ પરમ્ ।
કામનાશકરં ચાપિ યેન ઢુણ્ઢિઃ પ્રલભ્યતે ॥ ૭॥

ત્વમસ્માકં પરા કાષ્ઠા ગુરુરૂપેણ સંસ્થિતા ।
દેહિ વિઘ્નેશ્વરં માતર્ભજિષ્યામોઽખિલાઃ પ્રભુમ્ ॥ ૮॥

આદિશક્તિરુવાચ ।
ગણનાથાવતારસ્ય તસ્યોપાસનમાત્રતઃ ।
વિકટસ્ય સ્વયં કામઃ ખલો નશ્યતિ તત્ક્ષણાત્ ॥ ૯॥

અત્ર વોઽહં પુરા જાતમિતિહાસં વદામિ હિ ।
યેન કામવ્યથાહીના ભવિષ્યન્તિ જનાઃ સદા ॥ ૧૦॥

કૈલાસે ગિરિવર્યે તુ શઙ્કરઃ સ્વેચ્છયૈકદા ।
પાર્વતીમોહનાર્થાય ભીમરૂપધરોઽભવત્ ॥ ૧૧॥

અદૃષ્ટ્વા શઙ્કરં સાઽપિ શોકયુક્તા બભૂવ હ ।
એતસ્મિન્નન્તરે તત્રેન્દ્રસ્તં દ્રષ્ટું સમાયયૌ ॥ ૧૨॥

મઘવોગ્રસ્વરૂપાસ્યં દૃષ્ટ્વા કૈલાસનાયકમ્ ।
રાક્ષસં તં વિદિત્વા સ ક્રોધયુક્તો બભૂવ હ ॥ ૧૩॥

વજ્રં તત્યાજ તં હન્તું મહેન્દ્રઃ સહસા પરમ્ ।
શિવદેહં સમાસાદ્ય નિષ્ફલં તદ્બભૂવ હ ॥ ૧૪॥

તતઃ ક્રોધસમાયુક્તઃ શઙ્કરોઽગ્નિં સમાસૃજત્ ।
તૃતીયં નેત્રમુદ્ઘાટ્ય દગ્ધું દેવપતિં સ્વયમ્ ॥ ૧૫॥

સહસાઽગ્નિં સ દૃષ્ટ્વા તુ તં સસ્માર બૃહસ્પતિમ્ ।
સ જ્ઞાત્વા તત્ક્ષણં ગત્વા પ્રણનામ મહેશ્વરમ્ ॥ ૧૬॥

પ્રસાદ્ય ગિરિજાનાથમિદ્રં ભયસમાકુલમ્ ।
અગ્નિના ત્યક્તમાનમ્યં તત્પાદસ્થં ચકાર હ ॥ ૧૭॥

ઇન્દ્રસ્તં વિવિધૈઃ સ્તોત્રૈઃ પ્રભું સ્તુત્વા ક્ષમાપયત્ ।
(Page ખં. ૬ અ. ૨ પાન ૪)
અજ્ઞાનજં મહેશાનોઽપરાધં તસ્ય ચાક્ષમત્ ॥ ૧૮॥

તતઃ શિવં સમાગત્યાગ્નિસ્તદંશસમુદ્ભવઃ ।
પ્રણમ્ય પ્રત્યુવાચેદં કિં કરોમિ મહેશ્વર ॥ ૧૯॥

ત્વદાજ્ઞયા મહાદેવ ત્યક્ત્વા દેવપતિં ખલમ્ ।
સમાગતં મહેશાન કાર્યમાજ્ઞાપયોત્તમમ્ ॥ ૨૦॥

નિઃસૃતોઽહં ત્વદંશાદ્વૈ ન ભવિષ્યામિ નિષ્ફલઃ ।
સર્વં બ્રહ્માણ્ડમથ વા ગ્રસિષ્યામિ ત્વદાજ્ઞયા ॥ ૨૧॥

અગ્નેસ્તદ્વચનં શ્રુત્વા શઙ્કરસ્તમુવાચ હ ।
પતસ્વ ત્વં સમુદ્રે વૈ મત્પુત્રો રાક્ષસાકૃતિઃ ॥ ૨૨॥

સર્વૈરવધ્યભાવેન ભવિષ્યસિ મહાબલઃ ।
ત્રૈલોક્યાધિપતિર્ભૂત્વા ધર્મલોપં કરિષ્યસિ ॥ ૨૩॥

વૃન્દા ધર્મધ્વજસ્યૈવ પત્ની તવ ભવિષ્યતિ ।
પુત્રી સતી ગણેશેન શપ્તા ચાપત્યદર્શનાત્ ॥ ૨૪॥

તાં પાતિવ્રત્યહીનાં વૈ કરિષ્યતિ જનાર્દનઃ ।
તદા મચ્ચક્રપાતેન મરિષ્યસિ ન સંશયઃ ॥ ૨૫॥

તતો મદ્દેહગો ભૂત્વા મદ્રૂપસ્ત્વં ભવિષ્યસિ ।
રાક્ષસાકૃતિરૂપાદ્વૈ જાતસ્તસ્માત્તથા ભવ ॥ ૨૬॥

એવમુક્ત્વા મહાદેવસ્તં પ્રચિક્ષેપ શક્તયઃ ।
જલધૌ તત્ર ઘોષશ્ચ બભૂવ ભયદાયકઃ ॥ ૨૭॥

તતસ્તત્ર સમુદ્ભૂતો બાલકસ્તેજસા યુતઃ ।
તદ્બીજાદ્બ્રહ્મણાઽઽગત્ય કૃતો નામ્ના જલન્ધરઃ ॥ ૨૮॥

તસ્ય મૌઞ્જ્યાદિકં કર્મ ચકાર જલધિઃ સ્વયમ્ ।
કાલનેમ્યાદયો દૈત્યા બભૂવુસ્તસ્ય પાર્શ્વગાઃ ॥ ૨૯॥

શિવસ્ય વરદાનેન જિગ્યે બ્રહ્માણ્ડમણ્ડલમ્ ।
જલન્ધરસ્તતો દેવા વનવાસં પ્રચક્રિરે ॥ ૩૦॥

વને તપઃસ્થિતાં વૃન્દાં દાનવોઽપિ દદર્શ સઃ ।
ઉપયેમે કદા તાં ચ ગાન્ધર્વેણૈવ શક્તયઃ ॥ ૩૧॥

તયા રેમે સદા દૈત્યો મોહિતો માયયા ભૃશમ્ ।
ન બુબોધ ગતં કાલં સાઽપિ તદ્ગતમાનસા ॥ ૩૨॥

તતઃ કર્મવિહીનં તુ ચકાર સ ધરાતલમ્ ।
ઉપોષણેન સંયુક્તા દેવાદયો બભૂવિરે ॥ ૩૩॥

કદાચિન્નારદસ્તત્ર જગામાસુરનાયકમ્ ।
તેન સમ્પૂજિતો યોગી તં જગાદ જલન્ધરમ્ ॥ ૩૪॥

નારદ ઉવાચ ।
ધન્યોઽસિ જલધેઃ પુત્ર સર્વરત્નવિલાસકૃત્ ।
તથાપિ શ◌ૃણુ દૈત્યેશ સ્ત્રીરત્નં નાસ્તિ તે ગૃહે ॥ ૩૫॥

પાર્વત્યા ન સમં કુત્ર વર્તતે સા વિશેષતઃ ।
રત્નભૂતા ન સન્દેહઃ શઙ્કરેણાનુભાવિતા ॥ ૩૬॥

એવમુક્ત્વા મહાયોગી નારદોંઽતર્દધે સ્વયમ્ ।
સોઽપિ શ્રુત્વા વિશેષેણ કામબાણાર્દિતોઽભવત્ ॥ ૩૭॥

દૂતઃ સમ્પ્રેષિતસ્તેન શઙ્કરં સ સમાગતઃ ।
જગાદ તં નિશુમ્ભશ્ચ મહાદેવં મહાખલઃ ॥ ૩૮॥

નિશુમ્ભ ઉવાચ ।
શિવસ્ત્વં નગ્નતાદ્યૈશ્ચ ચિહ્નૈર્યુક્તો ન તે પ્રભો ।
પાર્વતી રત્નભૂતા સા યોગ્યા ભવતિ સર્વદા ॥ ૩૯॥

બ્રહ્માણ્ડાધિપતિઃ સાક્ષાત્ સર્વશ્રિયા યુતોઽધુના ।
જલન્ધરશ્ચ તસ્મૈ ત્વં દેહિ શૈલસુતાં પ્રભો ॥ ૪૦॥

પ્રતાપવાન્ ક્રોધસમાયુક્તો નો ચેત્ જલન્ધરઃ ।
હત્વા ત્વાં તાં બલાત્ સોઽપિ ગ્રહીષ્યતિ ન સંશયઃ ॥ ૪૧॥

વચસ્તસ્ય સમાકર્ણ્ય ક્રોધયુક્તઃ સદાશિવઃ ।
શૂલં ધૃત્વા નિશુમ્ભં તં હન્તું દેવઃ પ્રચક્રમે ॥ ૪૨॥

તતો ભયસમાયુક્તો માયયાઽસુરનાયકઃ ।
પપાલાઽઽગત્ય વૃત્તાન્તં કથયામાસ સંસદિ ॥ ૪૩॥

(Page ખં. ૬ અ. ૨ પાન ૫)
નિશુમ્ભભાષિતં શ્રુત્વા તતઃ ક્રોધસમાયુતઃ ।
જલન્ધરો યયૌ તેન યુદ્ધાર્થં સૈન્યસંયુતઃ ॥ ૪૪॥

તમાગતં સમાલોક્ય મહાદેવઃ પ્રતાપવાન્ ।
વિષ્ણુમુખ્યૈઃ સ યુદ્ધાય યયૌ દૈત્યાધિપેન ચ ॥ ૪૫॥

દેવાનાં દાનવાનાં ચ યુદ્ધં પરમદારુણમ્ ।
અભૂદ્વર્ણયિતું દેવ્યઃ શક્યતે ન કદાચન ॥ ૪૬॥

વર્ષમાત્રં મહાઘોરં તતો દૈત્યો મહેશ્વરમ્ ।
માયયા મોહ્ય સઙ્ગૃહ્ય તં ચિક્ષેપ ગુહાન્તરે ॥ ૪૭॥

કાલનેમિમુખાંસ્તત્રાસ્થાપ્ય સઙ્ગ્રામમણ્ડલે ।
જગામ પાર્વતીં દૈત્યો માયયા શઙ્કરાકૃતિઃ ॥ ૪૮॥

તમાગતં સમાલોક્ય જ્ઞાનદૃષ્ટ્યા મહાસતી ।
બુબોધ વિહ્વલાઙ્ગં ચાન્તર્ધાનમકરોત્ સ્વયમ્ ॥ ૪૯॥

સા સસ્માર મહાવિષ્ણું ગત્વા હિમગિરિં તદા ।
સમાગતં વિલોક્યૈવ વૃત્તાન્તં સર્વમબ્રવીત્ ॥ ૫૦॥

શ્રુત્વા તાં સાન્ત્વયામાસ કેશવઃ પરવીરહા ।
જલન્ધરસ્વરૂપેણ વૃન્દાં મોહયિતું યયૌ ॥ ૫૧॥

જલન્ધરાકૃતિસ્થં તં દૃષ્ટ્વા વિષ્ણું બુબોધ સા ।
શશાપ ત્વં મહાવિષ્ણો ભવ શૈલાકૃતેર્ધરઃ ॥ ૫૨॥

તતોઽતિભયસંયુક્તો વિષ્ણુઃ શાપસમન્વિતઃ ।
સિદ્ધક્ષેત્રે સમાગમ્ય પૂજયામાસ વિઘ્નપમ્ ॥ ૫૩॥

ગુહાયાં શઙ્કરશ્ચૈવ સાવધાનો બભૂવ હ ।
ધ્યાનેનૈવ મહોગ્રેણ તોષયામાસ વિઘ્નપમ્ ॥ ૫૪॥

વરદાનપ્રસિદ્ધ્યર્થમાયયૌ તં ગણેશ્વરઃ ।
તં દૃષ્ટ્વા શઙ્કરશ્ચાદૌ પ્રણતો ભક્તિસંયુતઃ ॥ ૫૫॥

તુષ્ટાવ વિવિધૈઃ સ્તોત્રૈર્ગણેશં સર્વસિદ્ધિદમ્ ।
કથયામાસ વૃત્તાન્તં પ્રણમ્ય કરસમ્પુટૈઃ ॥ ૫૬॥

તતઃ સ્વહસ્તગં ઢુણ્ઢિર્દદૌ તસ્મૈ મહાત્મને ।

ચક્રં સુદર્શનં નામ્ના તં જગાદ સદાશિવમ્ ॥ ૫૭॥

માં સ્મૃત્વા યુદ્ધકાલે તં ચક્રેણ જહિ દાનવમ્ ।
રક્ષ સર્વાન્ મહાદેવ વિજયી પ્રભવિષ્યસિ ॥ ૨૮॥

એવમુક્ત્વા ગણેશાનોઽતર્દધે શઙ્કરસ્તતઃ ।
ચક્રં ગૃહ્ય ગુહાયાઃ સ નિર્જગામ બહિઃ સ્વયમ્ ॥ ૫૯॥

દણ્ડકારણ્યદેશે તુ વિષ્ણુર્વિઘ્નેશ્વરં ગતઃ ।
તસ્મૈ પ્રત્યક્ષભાવેન વરં દદૌ ગણેશ્વરઃ ॥ ૬૦॥

શ્રીગણેશ ઉવાચ ।
મા ચિન્તાં કુરુ વિષ્ણો ત્વં મામસ્મૃત્વા ગતઃ પુરા ।
તેન શાપયુતો જાતોઽધુના શરણમાગતઃ ॥ ૬૧॥

અત્રૈવ તપસા તેઽહં વરદશ્ચ પુરાઽભવમ્ ।
તેન તે વૈ સહામ્યદ્યાપરાધં માધવાધુના ॥ ૬૨॥

કલયા ત્વં શિલાસંસ્થો ભવિષ્યસિ ન સંશયઃ ।
પૂર્ણરૂપેણ દેવેશઃ સ્વસ્યાકૃતિધરો ભવ ॥ ૬૩॥

નરાસ્ત્વાં પૂજયિષ્યન્તિ શિલારૂપધરં પ્રભુમ્ ।
તત્ર દેવસ્વરૂપેણ તિષ્ઠસ્યત્ર ન સંશયઃ ॥ ૬૪॥

પુનર્માં હૃદિ સન્ધ્યાય જલન્ધરસ્વરૂપધૃક્ ।
વૃન્દાં ગચ્છ મહાવિષ્ણો સા તેઽધીના ભવિષ્યતિ ॥ ૬૫॥

એવમુક્વા ગણેશાનોઽતર્દધે ભક્તવત્સલઃ ।
વિષ્ણુર્જલન્ધરો ભૂત્વા યયૌ વૃન્દાં તુ શક્તયઃ ॥ ૬૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે શિવવિષ્ણોર્વરપ્રદાનં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૬.૨

## ૬.3 કામાસુરરાજ્યપ્રાપ્તિવર્ણનં નામ તૃતીયોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

આદિશક્તિરુવાચ ।
જલન્ધરસ્વરૂપેણ આગતં તં જનાર્દનમ્ ।
નાનાવીરસમાયુક્તં તાદૃશૈઃ સેવકૈર્વૃતમ્ ॥ ૧॥

નાગરા માનયામાસુરન્યે સર્વે સુહૃજ્જનાઃ ।
જિત્વા મહેશ્વરં દેવં તં સમાગતમબ્રુવન્ ॥ ૨॥

તતો ગણેશમાયાભિર્મોહિતા તં સમીપગા ।
વૃન્દા હર્ષસમાયુક્તા પુપૂજ પરમેશ્વરમ્ ॥ ૩॥

મોહિતઃ કેશવો દેવ્યસ્તાં દૃષ્ટ્વા ગુણસંયુતામ્ ।
રૂપેણાપ્રતિમાં પૂર્ણયૌવનેન વિરાજિતામ્ ॥ ૪॥

એકાન્તે સ તયા સાર્ધં રેમે નારાયણઃ સ્વયમ્ ।
સાઽપિ સ્નેહસમાયુક્તા રેમે તેન સુવિહ્વલા ॥ ૫॥

અધુના શઙ્કરસ્યૈવ વૃત્તાન્તં કથયામ્યહમ્ ।
શ ૃણુધ્વં શક્તયઃ સર્વા ગણેશમાયયા યુતમ્ ॥ ૬॥

શઙ્કરઃ ક્રોધસંયુક્તો યુયુધે તેન વૈરિણા ।
ચક્રેણ છેદયામાસ દૈત્યાનાં બલમુત્કટમ્ ॥ ૭॥

જલન્ધરઃ સ્વયં તેન યુયુધે માયયા યુતઃ ।
રાક્ષસ્યા દેવતા દૈત્યા યુયુધુશ્ચ પરસ્પરમ્ ॥ ૮॥

વૃન્દયા સહ વિષ્ણુશ્ચ રેમે તત્ર મુદા યુતઃ ।
જલન્ધરઃ સ ચક્રેણ તસ્મિન્ કાલે હતોઽભવત્ ॥ ૯॥

તતસ્તે દેવવિપ્રેન્દ્રાસ્તુષ્ટુવુઃ શઙ્કરં પરમ્ ।
તૈઃ સાર્ધમગમત્ સોઽપિ કૈલાસં પર્વતેશ્વરમ્ ॥ ૧૦॥

તતશ્ચ ધર્મસંયુક્તા બભૂવુર્માનવા ધ્રુવમ્ ।
વિશ્વમાનન્દસંયુક્તં બભૂવ સ્વસ્વકર્મતઃ ॥ ૧૧॥

નિત્યં વિષ્ણુસ્તયા સાર્ધં ક્રીડાયુક્તો બભૂવ હ ।
સમાગતાસ્તત્ર દૈત્યાઃ શશંસુશ્ચેષ્ટિતં મહત્ ॥ ૧૨॥

પ્રતાપવાન્ શઙ્કરેણ હતો દૈત્યો જલન્ધરઃ ।
તચ્છ્રુત્વા વિસ્મિતાઃ સર્વે કોઽયં ક્રીડતિ વૃન્દયા ॥ ૧૩॥

તતોઽતર્ધાય ચાત્માનં સ્વયં વિષ્ણુઃ સમાસ્થિતઃ ।
વૃન્દા દેહં સમાજ્વાલ્ય યયૌ સ્વર્ગમનુત્તમમ્ ॥ ૧૪॥

તાં દૃષ્ટ્વા મોહસંયુક્તો વિષ્ણુસ્તત્ર રુરોદ હ ।
સ્મૃત્વા વૃન્દાચરિત્રાણિ મોહિતો માયયા ભૃશમ્ ॥ ૧૫॥

વૃન્દાચિતાં સમાશ્રિત્ય વિલલાપ જનાર્દનઃ ।
દૈત્યાઃ પાતાલગાઃ સર્વે બભૂવુર્ભયસંયુતાઃ ॥ ૧૬॥

દેવૈઃ સમ્બોધિતો વિષ્ણુર્મુનિભિર્ન બુબોધ સઃ ।
રુરોદ કામબાણાર્તસ્તાં સ્મૃત્વા દારુણં મહત્ ॥ ૧૭॥

તતસ્તસ્ય મહાવિષ્ણોઃ કામબાણાર્દિતસ્ય ચ ।
વીર્યં પપાત ભૂપૃષ્ઠેઽમોઘં તેજોયુતં બભૌ ॥ ૧૮॥

તસ્માચ્ચ પુરુષો જજ્ઞે કામરૂપાતિગો બભૌ ।
વિચચાર મહીપૃષ્ઠે વિષ્ણુસ્તત્ર સમાસ્થિતઃ ॥ ૧૯॥

તતો દેવૈશ્ચ સા વૃન્દા પ્રાર્થિતા મુનિભિર્ભૃશમ્ ।
વિષ્ણોઃ પત્ની ભવાશુ ત્વં તપસાઽઽરાધિતસ્ય તે ॥ ૨૦॥

સા તથેતિ સમુચ્ચાર્ય વૃક્ષરૂપા બભૂવ હ ।
વિષ્ણુઃ શિલાસ્વરૂપેણોપયેમે તાં શુભાવહામ્ ॥ ૨૧॥

કાર્તિકે શુક્લપક્ષે ચ દ્વાદશ્યાં સા જનાર્દનમ્ ।
ઉપયેમે મહાદેવ્યસ્તેન સંહર્ષિતોઽભવત્ ॥ ૨૨॥

તાં ગૃહ્ય કેશવો દેવો વિકુણ્ઠમગમત્ સ્વયમ્ ।
સર્વે હર્ષસમાયુક્તા બભૂવુરમરાદયઃ ॥ ૨૩॥

એવં કામઃ સમુત્પન્નો મહાતેજોયુતઃ સ્વયમ્ ।
બભ્રામ વનસંસ્થઃ સ તત્ર શુક્રઃ સમાયયૌ ॥ ૨૪॥

શિવપઞ્ચાક્ષરં મન્ત્રં દદૌ તસ્મૈ મહાત્મને ।
સ ગત્વા તં પ્રણમ્યૈવ વનં તપશ્ચચાર હ ॥ ૨૫॥

તપસોગ્રેણ શમ્ભું સ તોષયામાસ નિત્યદા ।
નિરાહારેણ નિત્યં જજાપ તં મન્ત્રમુત્તમમ્ ॥ ૨૬॥

(Page ખં. ૬ અ. ૩ પાન ૭)
એવં તસ્યોગ્રતપસા વિભ્રાન્તાઃ સુરમાનુષાઃ ।
દિવ્યવર્ષસહસ્રેણ સ્થાતું શક્તા ન તેઽભવન્ ॥ ૨૭॥

તતો દેવૈર્મહેશાનઃ પ્રાર્થિતસ્તં યયૌ મુદા ।
બોધયામાસ દૈત્યેશં વરં બ્રૂહિ સમબ્રવીત્ ॥ ૨૮॥

તતઃ સ શઙ્કરં દૃષ્ટ્વા પ્રણનામ કૃતાઞ્જલિઃ ।
સમુત્થાય પુપૂજાઽસૌ તુષ્ટુવે ભક્તિસંયુતઃ ॥ ૨૯॥

યજુર્વેદભવેનૈવ રૌદ્રસ્તોત્રેણ શઙ્કરમ્ ।
કામાસુરઃ પ્રસન્નાત્મા તોષયામાસ ભાવતઃ ॥ ૩૦॥

સન્તુષ્ટં શઙ્કરં દૃષ્ટ્વા તં જગાદ મહાસુરઃ ।
હર્ષેણોત્ફુલ્લનેત્રઃ સ વરદં ભક્તવત્સલમ્ ॥ ૩૧॥

કામાસુર ઉવાચ ।
યદિ પ્રસન્નભાવેન વરદોઽસિ મહેશ્વર ।
તવ ભક્તિં ચ મે દેહિ રાજ્યં બ્રહ્માણ્ડકસ્ય વૈ ॥ ૩૨॥

ઉપત્તિસ્થિતિસંહારયુતાસ્તેભ્યો ભયં ન મે ।
સમ્ભવેત્તાદૃશં નાથ કુરુષ્વ બલસંયુતમ્ ॥ ૩૩॥

ઉત્પત્તિસ્થિતિસંહારકારકા યે મહેશ્વરાઃ ।
તેભ્યો મે મરણં નૈવ ભવેદ્દેવ તથા કુરુ ॥ ૩૪॥

આરોગ્યાદિસમાયુક્તં સઙ્ગ્રામે જયશાલિનમ્ ।
કુરુ માં દેવદેવશ સર્વાતિગં પ્રભાવતઃ ॥ ૩૫॥

યદ્યદિચ્છામિ તત્તન્ મે સફલં ત્વદનુગ્રહાત્ ।
સર્વકાલેષુ ભવતુ નમસ્તે પરમેશ્વર ॥ ૩૬॥

શક્તિરુવાચ ।
કામાસુરસ્ય વાક્યં વૈ શ્રુત્વા વિસ્મિતમાનસઃ ।
શઙ્કરસ્તમથોવાચ તપસા બદ્ધભાવતઃ ॥ ૩૭॥

શિવ ઉવાચ ।
દુર્લભં યત્ત્વયા કામ પ્રાર્થિતં દેવદુઃખદમ્ ।
દાસ્યામિ તપસા તુષ્ટો મહોગ્રેણાસુરોત્તમ ॥ ૩૮॥

ત્વયા યે યે વરાઃ સર્વે પ્રાર્થિતાસ્તે મહાસુર ।
સફલાઃ સન્તુ મદ્વાક્યાત્ત્વં શ્રેષ્ઠશ્ચ ભવિષ્યસિ ॥ ૩૯॥

એવમુક્ત્વા મહાદૈત્યમન્તર્ધાનમથાઽકરોત્ ।
શિવઃ સોઽપિ મહાદેવ્યોઽભવત્તત્રૈવ સંસ્થિતઃ ॥ ૪૦॥

હર્ષેણ મહતા યુક્તો જગામ શરણં સ્વયમ્ ।

શુક્રં સર્વવિચારજ્ઞં સ્વગુરું પ્રણનામ હ ॥ ૪૧॥

કથયામાસ વૃત્તાન્તં સોઽપિ સંહર્ષિતોઽભવત્ ।
શ્રુત્વા યોગીન્દ્રમુખ્યશ્ચ દૈત્યાચાર્યો મહાયશાઃ ॥ ૪૨॥

મહિષાસુરપુત્રીં સ ઉપયેમે વરોદ્ધતઃ ।
તૃષ્ણાં રૂપયુતાં પૂર્ણગુણયુક્તાં ચ તાદૃશીમ્ ॥ ૪૩॥

તતો દૈત્યગણાન્ સર્વાન્ સમાગતાન્ દિગન્તતઃ ।
દૈત્યેશાંસ્તાન્ પુરસ્કૃત્ય શુક્રસ્તં હ્યભ્યષેચયત્ ॥ ૪૪॥

વેદમન્ત્રૈર્મહાભાગો બ્રાહ્મણૈર્વિધિસંયુતઃ ।
કામાસુરોઽભવદ્રાજશ્રિયા હૃષ્ટો વિલાસવાન્ ॥ ૪૫॥

પઞ્ચ તસ્ય પ્રધાનાનિ બભૂવુશ્ચ મહૌજસઃ ।
રાવણઃ શમ્બરશ્ચૈવ મહિષો બલિદુર્મદૌ ॥ ૪૬॥

નગરં નિર્મમે ભૂમૌ સર્વશોભાસમન્વિતમ્ ।
રતિદં નામ તસ્યાપિ ચકારોશનસેરિતઃ ॥ ૪૭॥

તત્ર જગ્મુશ્ચ વાસાર્થં દૈત્યદાનવરાક્ષસાઃ ।
ચાતુર્વર્ણ્યસમાયુક્તં શુશુભે શોભયા પરમ્ ॥ ૪૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે કામાસુરરાજ્યપ્રાપ્તિવર્ણનં નામ તૃતીયોઽધ્યાયઃ ॥ ૬.૩
(Page ખં. ૮ અ. ૪ પાન ૮)

## ૬.૪ કામાસુરવિજયવર્ણનં નામ ચતુર્થોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

આદિશક્તિરુવાચ ।
કદાચિદ્ દૈત્યરાજેન્દ્રો બલિમુખ્યાન સમાગતાન્ ।
જગાદ હર્ષસંયુક્તઃ કામાસુરઃ પ્રતાપવાન્ ॥ ૧॥

કામાસુર ઉવાચ ।
બલે રાવણમુખ્યાશ્ચ વચનં મે હિતાવહમ્ ।
શ્ૃણુધ્વં નીતિતત્ત્વજ્ઞા યદિ હૃદ્યં ભવેત્ પરમ્ ॥ ૨॥

બ્રહ્માણ્ડં હિ પ્રજેષ્યામિ વરદર્પેણ નિશ્ચિતમ્ ।

ભવદ્ભિઃ સંયુતોઽહં વૈ તથા શુક્રેણ રક્ષિતઃ ॥ ૩॥

વરદાનસ્ય માહાત્મ્યં વૃથા ભવતિ ચાન્યથા ।
ન વયં જયસંહીના ભવિષ્યામઃ કદાચન ॥ ૪॥

કામાસુરસ્ય તદ્વાક્યં શ્રુત્વા દૈત્યેન્દ્રસત્તમાઃ ।
હર્ષયુક્તા પુનસ્તં તે ઊચુઃ પ્રાઞ્જલયઃ પરમ્ ॥ ૫॥

દૈત્યેશા ઊચુઃ ।
સમ્યગુક્તં મહાભાગ વયં સર્વે ત્વદાત્મકાઃ ।
પ્રજેષ્યામો મહેશેન્દ્રાન્ પ્રતાપેન પ્રભો ચ તે ॥ ૬॥

ન તે પરાક્રમસ્યૈવ તુલાં બ્રહ્માણ્ડમણ્ડલે ।
લભતે કોઽપિ દૈત્યેન્દ્રસ્તત્ર શુક્રઃ સહાયકૃત્ ॥ ૭॥

તતઃ સર્વે સમાગમ્ય શુક્રં નીતિવિશારદમ્ ।
પ્રણમ્યાઽઽપૂજ્ય તેનૈવ યુતાઃ સર્વેઽપિ નિર્યયુઃ ॥ ૮॥

અપારસેનયા યુક્તશ્ચતુરઙ્ગસુશોભયા ।
શુશુભે કામસંજ્ઞોઽસૌ તારાયુક્તો યથા વિધુઃ ॥ ૯॥

નાનાવાહનગા વીરાઃ શસ્ત્રહસ્તા દ્રુમૈર્યુતાઃ ।
પર્વતાનાં ધરાઃ કેચિન્નિર્યયૂ રણદુર્મદાઃ ॥ ૧૦॥

યથા પાથોનિધિશ્ચૈવ સર્વત્ર જલરૂપધૃક્ ।
તથા સૈન્યં ધરાયાં સઙ્ખ્યાતિગં દૃશ્યતે હિ તત્ ॥ ૧૧॥

બલિરાવણમુખ્યા વૈ યત્ર તિષ્ઠન્તિ શક્તયઃ ।
નૃપાલૈઃ કિન્તુ સેનાભિર્યુદ્ધં કર્તું ક્ષમં ભવેત્ ॥ ૧૨॥

રાજાનઃ શરણં કેચિદ્યયુસ્તં ચ મૃતાઃ પરે ।
કેચિત્ ત્યક્ત્વા વનં રાજ્યં યયુર્ભયસમન્વિતાઃ ॥ ૧૩॥

એવં ભૂમણ્ડલં જિત્વા સપ્તદ્વીપસમન્વિતમ્ ।
દૈત્યેશા હર્ષસંયુક્તા બભૂવુશ્ચ જયાન્વિતાઃ ॥ ૧૪॥

તતઃ પાતાલમાવિશ્ય શેષં નાગસમન્વિતમ્ ।
વશં કૃત્વા યયુસ્તેઽપિ સ્વર્ગં દેવગણૈર્યુતમ્ ॥ ૧૫॥

સમાગતં મહાદૈત્યૈર્યુતં કામાસુરં ખલમ્ ।
જ્ઞાત્વા દેવગણાઃ સર્વે ભયભીતા બભૂવિરે ॥ ૧૬॥

વિચાર્ય ગુરુણા સાર્ધં શઙ્કરં તે યયુસ્તતઃ ।
ત્યક્ત્વા રાજ્યં ભયોદ્વિગ્ના બ્રહ્મવિષ્ણુમુખાઃ સુરાઃ ॥ ૧૭॥

તતો દૈત્યેન્દ્રમુખ્યાશ્ચ શૂન્યાં દૃષ્ટ્વાઽમરાવતીમ્ ।
પ્રવેશં ચક્રિરે સર્વે કામાસુરપુરોગમાઃ ॥ ૧૮॥

ઇન્દ્રાસને સમાસીનો દૈત્યપૈઃ સંવૃતો બભૌ ।
કામાસુરસ્તતો દૈત્યાન્ સ્થાપયામાસ સન્નિધૌ ॥ ૧૯॥

તતસ્તૈઃ સંયુતઃ સોઽપિ પ્રજાપતિપદં યયૌ ।
તત્રૈવ તાદૃશં દૃષ્ટ્વા બ્રહ્માસનગતોઽભવત્ ॥ ૨૦॥

બુભુજેઽસૌ કિયત્કાલં ભોગાન્નાનાવિધાન્ ખલૈઃ ।
વિકુણ્ઠમગમત્ સોઽપિ દૈત્યપૈઃ સુસમાવૃતઃ ॥ ૨૧॥

તત્ર શૂન્યં પ્રદૃશ્યૈવ હર્ષયુક્તો બભૂવ હ ।
કામાસુરઃ સ્વયં રેમે નાનાદૈત્યેન્દ્રમુખ્યકૈઃ ॥ ૨૨॥

તતો દૈત્યગણાન્ સોઽપિ જગાદ હર્ષસંયુતઃ ।
મોહેન મોહિતોઽત્યન્તં ગર્વયુક્તો વચઃ પરમ્ ॥ ૨૩॥

કામાસુર ઉવાચ ।
કિં મયા ન જિતં દૈત્યાસ્તદ્વદેત જયામ્યહમ્ ।
વિષ્ણુમુખ્યાશ્ચ દેવેન્દ્રા દુદ્રુવુઃ ક્લીબભાવતઃ ॥ ૨૪॥

ન કોઽપિ રણભૂમૌ વૈ સઙ્ગ્રામાય સમાગતઃ ।
દેવેન્દ્રા યુદ્ધહીનાસ્તુ ભવામો જયશાલિનઃ ॥ ૨૫॥

(Page ખં. ૬ અ. ૪ પાન ૯)
તતસ્તં શમ્બરો દૈત્યઃ પ્રાહ વૈરસમન્વિતઃ ।
પ્રેરિતો દૈત્યવર્યૈશ્ચાસુરાણાં હિતકારકઃ ॥ ૨૬॥

શમ્બરાસુર ઉવાચ ।
શમ્ભું જય મહારાજ દેવમુખ્યૈશ્ચ સંવૃતમ્ ।
તદા બ્રહ્માણ્ડકસ્યૈવ રાજા ત્વં તુ ભવિષ્યસિ ॥ ૨૭॥

ન ત્વાં વરપ્રદો દેવઃ શિવઃ શ‌ૃણુ વચો હિતમ્ ।
સ્વધર્મસંયુતં રાજન્ સર્વેભ્યઃ સુખદાયકમ્ ॥ ૨૮॥

કર્મણાં ફલદાતૃત્વં દેવાનાં કર્મ નિર્મિતમ્ ।
સ્વધર્મસ્થં વિજાનીહિ નોચેન્નશ્યન્તિ દેવતાઃ ॥ ૨૯॥

પ્રવર્તત ઇદં કર્માધારં સર્વં તદાજ્ઞયા ।
કર્મણા ત્વં સમર્થશ્ચ જાતોઽસ્યત્ર ન સંશયઃ ॥ ૩૦॥

વયં તુ તપસા હીનાસ્તેન રાજંસ્ત્વદાશ્રિતાઃ ।
ભવામસ્તમથો શમ્ભું જય ત્વં દૈત્યપૈર્વૃતઃ ॥ ૩૧॥

દેવનાથઃ સ્વયં શમ્ભુસ્તસ્માદ્દેવાન્ પ્રગૃહ્ય સઃ ।
શત્રૂન્નઃ પશ્ય દૈત્યેન્દ્ર સંસ્થિતઃ પ્રબભૂવ હ ॥ ૩૨॥

સુરાશ્ચાસુરકાઃ પ્રોક્તાઃ પશ્ય વેદેષુ માનદ ।
શિવો દેવમયઃ પ્રોક્તઃ કથં દૈત્યહિતો ભવેત્ ॥ ૩૩॥

કામાસુરઃ શમ્બરસ્ય વચઃ શ્રુત્વા પ્રતાપવાન્ ।
મોહયુક્તઃ સ્વભાવેન તથ્યં મેને તુ શક્તયઃ ॥ ૩૪॥

દૈત્યપૈઃ સંવૃતઃ સદ્યઃ સન્નદ્ધૈઃ શઙ્કરં યયૌ ।
તમાગતં સમાજ્ઞાય શિવશ્ચિન્તાતુરોઽભવત્ ॥ ૩૫॥

દેવૈઃ સહ વિચાર્યૈવં દૃષ્ટ્વા દારુણરૂપકમ્ ।
કામાસુરં પપાલાઽસૌ ત્યક્ત્વા કૈલાસમાત્મનઃ ॥ ૩૬॥

અરણ્યે દેવસંયુક્તો યત્ર તત્ર ગુહાસુ સઃ ।
ભયભીતઃ સ્વભાવેન વાસં ચક્રે સદાશિવઃ ॥ ૩૭॥

તતઃ કામાસુરો દુષ્ટો દૃષ્ટ્વા શૂન્યં પુરં મહત્ ।
શૈવં હર્ષસમાયુક્તો દૈત્યપૈઃ પ્રવિવેશ હ ॥ ૩૮॥

કૈલાસશિખરારૂઢઃ કામાસુરઃપ્રતાપવાન્ ।
ભોગાન્ કલ્પિતસમ્ભૂતાન્ બુભુજે ચાસુરૈઃ સહ ॥ ૩૯॥

એવં બ્રહ્માણ્ડમુગ્રઃ સ સ્વયં જિત્વા નનન્દ હ ।
કૃતકૃત્યમિવાત્માનં મેને દૈત્યેન્દ્રનાયકઃ ॥ ૪૦॥

તતો બહૌ ગતે કાલે પુત્રં શોષણસંજ્ઞિતમ્ ।
જ્યેષ્ઠં કૈલાસનાથં વૈ ચકાર ભયવર્જિતઃ ॥ ૪૧॥

દુઃપૂરં સ ચકારૈવ વિકુણ્ઠાધિપતિં ખલમ્ ।
કનિષ્ઠં સ્વસુતં કામાસુરો દુષ્ટશ્ચ શક્તયઃ ॥ ૪૨॥

બલિં સૌરસ્ય લોકસ્ય નાથં ચક્રે મહાસુરઃ ।
રાવણં શક્તિલોકસ્ય તથા બલસમન્વિતમ્ ॥ ૪૩॥

શમ્બરં બ્રહ્મલોકસ્યાધિપં દુષ્ટં ચકાર હ ।
ઇન્દ્રલોકસ્ય નાથં તુ મહિષં રણદુર્મદમ્ ॥ ૪૪॥

દુર્મદં યમપુર્યાં સ સ્થાપયામાસ નિર્ભયઃ ।
એવં નાનાઽસુરાંશ્ચક્રે સ્થાપિતાન્ ભુવનેષુ ચ ॥ ૪૫॥

સ્વયં સર્વસમાયુક્ત આયયૌ ભૂમિમણ્ડલમ્ ।
સ્વપુરે રાજ્યમુગ્રં સ ચકાર જગતો બલાત્ ॥ ૪૬॥

સ્ત્રીમદ્યમાંસકાદ્યૈશ્ચ સંસક્તઃ સન્મહાબલઃ ।
ભોગાંસ્ત્રિલોકગાંસ્તત્ર બુભુજે સ્વસુહૃજ્જનૈઃ ॥ ૪૭॥

ન બુબોધ ગતં કાલં યથા કાલેન વઞ્ચિતઃ ।
આત્માનમમૃતાકારં મેને સ્વમદસંયુતઃ ॥ ૪૮॥

એવં કામાસુરો દુષ્ટઃ શક્તયઃ સ ચકાર હ ।
ચરાચરમયં સર્વં સ્વાધીનં બલગર્વિતઃ ॥ ૪૯॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે કામાસુરવિજયવર્ણનં નામ ચતુર્થોઽધ્યાયઃ ॥ ૬.૪
(Page ખં. ૬ અ. ૫ પાન ૧૦)

## ૬.૫ મુદ્ગલદેવસમાગમો નામ પઞ્ચમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શક્તય ઊચુઃ ।
અહો કામાસુરસ્યૈવં પ્રભાવઃ પરમાદ્ભુતઃ ।
શસ્ત્રહીનેન માયે વૈ જિતં સર્વં ચરાચરમ્ ॥ ૧॥

એતાદૃશો મહાદૈત્યો ન શ્રુતસ્તે મુખામ્બુજાત્ ।
અધુના તસ્ય નાશં તુ વદ દેવિ સુદુર્ગમમ્ ॥ ૨॥

આદિશક્તિરુવાચ ।
કાલિમુખ્યાઃ શ‍ૃણુધ્વં ચ શક્તયો મે વચો હિતમ્ ।

યથા તં ગણનાથઃ સ જિગ્યે સર્વૈઃ સુદુર્જયમ્ ॥ ૩॥

એકદા સ્વસભાસંસ્થં કામાસુરં મહાનૃપમ્ ।
જગુર્દૈત્યાધિપાઃ સર્વે કૃતાઞ્જલય આદરાત્ ॥ ૪॥

દૈત્યેશા ઊચુઃ ।
મહારાજ મહારાજ કૃતકૃત્યોઽસિ નિશ્ચિતમ્ ।
તથાપિ શૃણુ વાક્યં નઃ સર્વેષાં તે હિતાવહમ્ ॥ ૫॥

ચરાચરં તુ દૈત્યેશા જિત્વા રાજ્યં પ્રચક્રિરે ।
કાલેન નિહતાઃ સર્વે દેવૈશ્છદ્મપ્રદર્શિભિઃ ॥ ૬॥

અતસ્ત્વમપિ રાજેન્દ્ર શત્રુભાવસમાશ્રિતાન્ ।
દેવાન્ શમ્ભુમુખાન્ સર્વાન્ મારયસ્વ પ્રયત્નતઃ ॥ ૭॥

અમરા વેદવાદેષુ કથિતા દેવપા ગણાઃ ।
શસ્ત્રાદિભિશ્ચ તે સર્વે ન મરિષ્યન્તિ કર્હિચિત્ ॥ ૮॥

અતઃ શૃણુ મહાદૈત્ય વિચારં શત્રુનાશકમ્ ।
કર્મહીનપ્રભાવેણ મરિષ્યન્ત્યમરાઃ કિલ ॥ ૯॥

કર્માન્ના દેવતાઃ સર્વા નષ્ટેઽન્ને નાશમાપ્નુયુઃ ।
પુરા પ્રોક્તં તુ વેદેષુ તાદૃશં કુરુ માનદ ॥ ૧૦॥

તેનૈવામરરૂપાશ્ચ વયં નિહતકણ્ટકાઃ ।
ભવામો નાત્ર સન્દેહસ્ત્વત્પ્રસાદેન નિત્યદા ॥ ૧૧॥

તેષાં તદ્વચનં શ્રુત્વા કામાસુરશ્ચ હર્ષિતઃ ।
સાધુ સાધુ ભવદ્ભિઃ સઙ્કથિતં તાનુવાચ હ ॥ ૧૨॥

અધુના દૈત્યપૈઃ સર્વૈઃ કર્તવ્યં કર્મખણ્ડનમ્ ।
મહાબલાશ્ચ ગચ્છધ્વં ભૂમિં સર્વાં મદાજ્ઞયા ॥ ૧૩॥

તથેતિ તં પ્રણમ્યાદૌ હર્ષાદ્દાનવમુખ્યકૈઃ ।
પૃથિવ્યાં તૈઃ કૃતં કર્મખણ્ડનં મદસંયુતૈઃ ॥ ૧૪॥

બ્રાહ્મણાદીંશ્ચ સન્તાડ્ય વર્ણાશ્રમવિવર્જિતાન્ ।
ચક્રુસ્તે પાપકર્માણો દાનવા દુર્જયાઃ ખલાઃ ॥ ૧૫॥

કામસ્ય પ્રતિમા દુષ્ટૈઃ કૃતાસ્તૈઃ સ્થાપિતાસ્તતઃ ।
દેશે દેશે પુરે ગ્રામે જનૈઃ પૂજ્યા ઇમા મતાઃ ॥ ૧૬॥

તતો હાહારવં સર્વે વર્ણાશ્રમયુતા જનાઃ ।
સ્નાનાદિ નૈવ ચક્રુસ્તે દૈત્યસન્ત્રાસતાપિતાઃ ॥ ૧૭॥

ન સ્વાહા ન સ્વધા કુત્ર ન વષટ્કાર એવ ચ ।
વર્ણાશ્રમવિહીનાશ્ચાતિષ્ઠંસ્તે બ્રાહ્મણાદયઃ ॥ ૧૮॥

કેચિન્ મુનિગણા દેવ્યો મહોગ્રં વનમાશ્રિતાઃ ।
સ્વધર્મનિરતાસ્તત્રાવસંસ્તે વિગતજ્વરાઃ ॥ ૧૯॥

તતોઽભવન્ મહાદેવા ઉપોષણપરાયણાઃ ।
શોકસંવિગ્નચિત્તાસ્તે મિલિતા ભયવિહ્વલાઃ ॥ ૨૦॥

કામાસુરસ્ય નાશાર્થં વિચારં ચક્રુરઞ્જસા ।
ન કિઞ્ચિત્ પ્રાપુરભવન્નતિદુઃખયુતાસ્તતઃ ॥ ૨૧॥

તત્રાઽઽજગામ યોગીન્દ્રો મુદ્ગલઃ પરમાર્થવિત્ ।
તં દૃષ્ટ્વા દેવદેવાસ્તે હર્ષિતા અભવન્ બુધમ્ ॥ ૨૨॥

ઉત્થાય તં પ્રણેમુસ્તે શમ્ભુવિષ્ણુમુખાઃ સુરાઃ ।
ભૃગ્વાદયશ્ચ યોગીન્દ્રાઃ પૂજયામાસુરાદરાત્ ॥ ૨૩॥

આસને સુખમાસીનં કૃત્વા કરપુટાન્ મુનિમ્ ।
શિવશ્ચિન્તાતુરોઽત્યન્તં પપ્રચ્છ વિનયાન્વિતઃ ॥ ૨૪॥

શ્રીશિવ ઉવાચ ।
ધન્યા વયં મહાયોગિન્ દર્શનેન ચ તે પ્રભો ।
ગાણપત્યસ્ય પૂજ્યસ્ય સર્વેષાં પાવનાત્મનઃ ॥ ૨૫॥

(Page ખં. ૬ અ. ૫ પાન ૧૧)
અસ્માકમાદિકાલે તુ ગુરુર્ભૃશુણ્ડિકઃ પરઃ ।
તેન સમ્બોધિતા વિપ્ર વયં જ્ઞાનયુતા મુદા ॥ ૨૬॥

ગુરુસ્તસ્ય મુનીન્દ્રસ્ય સર્વસિદ્ધિપ્રદાયકઃ ।
ગાણપત્યાગ્રણીઃ સાક્ષાત્ સમસ્તેન ન વર્તતે ॥ ૨૭॥

શિષ્યશિષ્યાન્ મહાભાગ તારયસ્વાધુના પ્રભો ।
નોચેદન્નવિહીનાન્નો મૃતાન્ પશ્યસિ દેવપાન્ ॥ ૨૮॥

કામાસુરેણ દુષ્ટેન સ્થાનભ્રષ્ટાઃ કૃતા વયમ્ ।

અધુના કર્મનાશાદ્વૈ હીના અન્નેન વૈ કૃતાઃ ॥ ૨૯॥

ઉત્પત્તિસ્થિતિસંહારકર્તૃભ્યો મરણં મુને ।
ઉત્પત્તિસ્થિતિસંહારયુક્તેભ્યસ્તસ્ય નો ભવેત્ ॥ ૩૦॥

અતો યોગીન્દ્રમુખ્ય ત્વં વદોપાયં મહાગુરો ।
કામાસુરસ્ય નાશાર્થં કરિષ્યામો જવાન્વિતાઃ ॥ ૩૧॥

ચરાચરસ્ય રક્ષાર્થં કુરુ કાર્યમનુમત્તમમ્ ।
દુષ્ટં સંહર યોગીન્દ્ર માર્ગદર્શનભાવતઃ ॥ ૩૨॥

યથા જ્ઞાનોપદેશેનાજ્ઞાનનાશં કરોષિ તુ ।
તથા હિંસા ન તે સ્વામિન્ ભવિષ્યતિ કદાચન ॥ ૩૩॥

ઇતિ તસ્ય વચઃ શ્રુત્વા મુદ્ગલઃ શઙ્કરસ્ય તુ ।
દયયા ગણનાથં સ સ્મરન્ જગાદ તં વચઃ ॥ ૩૪॥

મુદ્ગલ ઉવાચ ।
શ‍ૃણુ શમ્ભો જગન્નાથ વિષ્ણો દેવાદયો વચઃ ।
કથયામિ હિતાર્થાય કામાસુરવિનાશનમ્ ॥ ૩૫॥

સાક્ષાદીશ્વરૂપસ્ત્વં ગણેશાંશઃ સદાશિવ ।
તવાગ્રે કિમહં બ્રૂયાં વિદ્યાનાથસ્ય માનદ ॥ ૩૬॥

તવ દર્શનમાત્રેણ કૃતકૃત્યા ભવન્તિ વૈ ।
નરા ઈશ ન સન્દેહસ્તં કિં બ્રૂમિ ભયાપહમ્ ॥ ૩૭॥

તથાપિ કથયિષ્યામિ ત્વદાજ્ઞાપાલનાર્થતઃ ।
ગણેશં સર્વભાવેન ભજધ્વં સર્વદેવતાઃ ॥ ૩૮॥

સ્વાનન્દસ્થસ્ત્રિભિર્ભાવૈર્હીનો દેવો ન સંશયઃ ।
સ તં ક્ષણાર્ધમાત્રેણ હનિષ્યતિ મહાસુરમ્ ॥ ૩૯॥

પૂર્વસ્મિન્ યત્ર વૈ શમ્ભો સિદ્ધિઃ પ્રાપ્તા ત્વયા તથા ।
દેવૈઃ સર્વૈશ્ચ વિપ્રૈશ્ચાધુના તત્ર ગતિં કુરુ ॥ ૪૦॥

ભૂસ્વાનન્દે મહાભાગ આરાધય ગજાનનમ્ ।
મયૂરેશં વિધાનેન સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૪૧॥

એકાક્ષરેણ મન્ત્રેણ ચરધ્વં તપ ઉત્તમમ્ ।
સ્વલ્પકાલેન વિઘ્નેશઃ પ્રસન્નો ભવિતા સ્વયમ્ ॥ ૪૨॥

એવમુક્ત્વા મહાયોગી મુદ્ગલસ્તાન્ પ્રણમ્ય તુ ।
જગામ સ્વેચ્છયા યોગાદ્ગણેશભજને રતઃ ॥ ૪૩॥

તતો દેવાશ્ચ વિપ્રાસ્તે હર્ષયુક્તા બભૂવિરે ।
મયૂરેશં સમાજગ્મુર્દણ્ડકારણ્યગં પરમ્ ॥ ૪૪॥

॥ ॐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે મુદ્ગલદેવસમાગમો નામ પઞ્ચમોઽધ્યાયઃ ॥ ૬.૫

## ૬.૬ ભૃશુણ્ડિપઞ્ચદેવસમાગમો નામ ષષ્ઠોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શક્તય ઊચુઃ ।
મયૂરનામકં ક્ષેત્રં ભૂસ્વાનન્દમયં કથમ્ ।
બભૂવ તત્ સમાચક્ષ્વ પરં કૌતૂહલં ત્વિદમ્ ॥ ૧॥

પુરા કથં શિવાદ્યૈશ્ચ સિદ્ધિઃ પ્રાપ્તા જગન્મયિ ।
વદ તત્ર કથં તેષાં ભૃશુણ્ડી ચાઽભવદ્ ગુરુઃ ॥ ૨॥

કીદૃશં ક્ષેત્રમુખ્યં તુ કેન તત્ર ગજાનનઃ ।
સ્થાપિતઃ પૂર્વકાલે વૈ કે કે સિદ્ધિમવાપ્નુયુઃ ॥ ૩॥

વદ શક્તે મયૂરસ્ય માહાત્મ્યં સર્વસિદ્ધિદમ્ ।
ક્ષેત્રસ્ય સ્વલ્પકાલેન લભતે સ્વેપ્સિતં નરઃ ॥ ૪॥

મુદ્ગલ ઉવાચ ।
એવં પૃષ્ટા મહામાયા શક્તિભિશ્ચ પ્રજાપતે ।
ભક્તિયુક્તાભિરત્યન્તમાદરાત્તા ઉવાચ સા ॥ ૫॥

તત્તેઽહં શૃણુ વક્ષ્યામિ સર્વસિદ્ધિપ્રદાયકમ્ ।
શ્રવણેન ન સન્દેહો બ્રહ્મભૂતપદપ્રદમ્ ॥ ૬॥

આદિશક્તિરુવાચ ।
અત્રાહં કથયિષ્યામીતિહાસં પરમાદ્ભુતમ્ ।
ભૃશુણ્ડિનઃ શિવાદીનાં સંવાદાત્મકમુત્તમમ્ ॥ ૭॥

કદાચિત્ પ્રલયે વૃત્તે નષ્ટે સ્થાવરજઙ્ગમે ।

બ્રહ્મવિષ્ણુશિવાદ્યાશ્ચ લયં યયુઃ સ્વભાવતઃ ॥ ૮॥

તતોઽતિલયવેગેન પઞ્ચભૂતાનિ શક્તયઃ ।
લયં પ્રાપ્તાનિ સર્વત્ર શૂન્યરૂપં બભૂવ હ ॥ ૯॥

તતો જાગૃન્મયં બ્રહ્મ સ્થૂલભૂતં લયં ગતમ્ ।
તથા સૂક્ષ્મં મહાદેવ્યઃ સ્વાપ્નં પ્રલયવેગતઃ ॥ ૧૦॥

સમભાવમયં બ્રહ્મ સૌષુપ્તં તલ્લયં ગતમ્ ।
તતઃ પ્રકૃતિરૂપા સા પુરુષે તન્મયી હ્યભૂત્ ॥ ૧૧॥

પુરુષો બ્રહ્મણિ સ્વાત્મૈકભાવં સંસ્થિતોઽભવત્ ।
બ્રહ્મ બ્રહ્મણિ સંસ્થં વૈ બભૂવ સ્વાત્મગં પરમ્ ॥ ૧૨॥

એવં મહાલયે પ્રાપ્તે ક્ષેત્રં સ્વાનન્દવાચકમ્ ।
સ્વસંવેદ્યસ્વરૂપેણ સ્થિતં બ્રહ્મપદપ્રદમ્ ॥ ૧૩॥

તદા વિઘ્નેશ્વરઃ સાક્ષાદ્ યોગનિદ્રાપરાયણઃ ।
ક્ષેત્રે મયૂરે સુષ્વાપ તદાકારધરઃ પ્રભુઃ ॥ ૧૪॥

તતો બહૌ ગતે કાલે નિદ્રાહીનો બભૂવ હ ।
નિઃશ્વાસતોઽભવન્નસ્ય સોઙ્કારા નિગમાઃ પુરા ॥ ૧૫॥

તૈઃ સ્તુતો બોધિતશ્ચૈવ સસર્જ સકલં પુનઃ ।
પ્રકૃતિં પુરુષાદ્યં ચ નાનાતત્ત્વસ્વરૂપકમ્ ॥ ૧૬॥

તત્ત્વૈસ્ત્રિગુણકં સૃષ્ટં સ્થૂલસૂક્ષ્મસમાત્મકમ્ ।
ત્રિવિધં તુ વિરાડ્રૂપં નાનાભેદપ્રસૂતકમ્ ॥ ૧૭॥

તતસ્ત્રિવિધરૂપં ચ નાનાભિન્નં બભૂવ હ ।
ચરાચરાત્મકં બ્રહ્મ પઞ્ચભૂતમયં બભૌ ॥ ૧૮॥

ભિન્નાનિ પઞ્ચભૂતાનિ વ્યવસ્થાસંયુતાનિ તુ ।
બભૂવુરાદિકાલેઽહં તેષાં સૃષ્ટિં વદામિ વઃ ॥ ૧૯॥

નાભેઃ સમુદ્ભવસ્તસ્ય બ્રહ્મા લોકપિતામહઃ ।
મુખાદ્વિષ્ણુઃ સ્વયં પાતા ગણેશસ્ય ચતુર્ભુજઃ ॥ ૨૦॥

નેત્રાચ્છિવઃ સમુત્પન્નો વામાઙ્ગાત્તસ્ય ચાઽભવમ્ ।
અહં ભાનુર્દક્ષિણાઙ્ગાત્ પઞ્ચ દેવાઃ પુરાતનાઃ ॥ ૨૧॥

અજ્ઞાનેન સમાયુક્તા ન વિદુઃ સ્વપરં તદા ।
દેવા જ્ઞાનપ્રસિદ્ધ્યર્થં તપશ્ચેરુર્મહાદ્ભુતમ્ ॥ ૨૨॥

દિવ્યવર્ષસહસ્રેણ પ્રસન્નો ગણનાયકઃ ।
હૃદિસ્થં દર્શયામાસ બીજમેકાક્ષરં સ્વકમ્ ॥ ૨૩॥

મન્ત્રં પ્રાપ્ય મહેશાના જેપુર્વિઘ્નેશમાભજન્ ।
ગતે વર્ષશતે પૂર્ણે પ્રસન્નોઽભૂદ્ગજાનનઃ ॥ ૨૪॥

આદૌ શઙ્કરહૃદ્દેશે દર્શયામાસ રૂપકમ્ ।
નરનાગમયં પૂર્ણં ચતુર્ભુજાદિચિહ્નિતમ્ ॥ ૨૫॥

તં દૃષ્ટ્વા વિસ્મિતઃ સોઽપિ ચિત્તે વિચારમાકરોત્ ।
નરકુઞ્જરરૂપોઽયં ચિત્તે મે કઃ પ્રતિષ્ઠતિ ॥ ૨૬॥

(Page ખં. ૬ અ. ૬ પાન ૧૩)
યાવત્તં પ્રષ્ટુમારેભે તાવદન્તર્હિતં વપુઃ ।
તતઃ સોઽપિ ગણેશસ્ય પુનર્ધ્યાનયુતોઽભવત્ ॥ ૨૭॥

ન દદર્શ મહદ્રૂપં સર્વમઙ્ગલમઙ્ગલમ્ ।
તતો વિહ્વલચિત્તોઽસૌ જગામ વિષ્ણુસન્નિધૌ ॥ ૨૮॥

તદા સોઽપિ વિસૃજ્યૈવ ધ્યાનં સમુત્થિતોઽભવત્ ।
શિવસ્તસ્મૈ સ્વવૃત્તાન્તં કથયામાસ હૃદ્ગતમ્ ॥ ૨૯॥

શિવાય સ જગાદૈવં સ્વધ્યાનસ્થં જનાર્દનઃ ।
એવં ક્રમેણ પઞ્ચૈતે દેવેશા મિલિતા જગુઃ ॥ ૩૦॥

પરસ્પરં વિચાર્યૈતે ધ્યાનં વિસ્મિતમાનસાઃ ।
ઊચુઃ કોઽયં નરશ્ચૈવાભવત્ ધ્યાને સમાગતઃ ॥ ૩૧॥

તતસ્તે તુષ્ટુવુર્દેવં યસ્મૈ કસ્મૈ નમો નમઃ ।
સર્વેષાં મૂલરૂપાય પ્રસીદ કરુણાનિધે ॥ ૩૨॥

તત આકાશજાં વાણીં શુશ્રુવુસ્તે મહૌજસઃ ।
બ્રહ્મવિષ્ણુમહેશાનશક્તિસૂર્યાઃ સુખપ્રદામ્ ॥ ૩૩॥

આકાશવાગુવાચ ।
ગણેશોઽહં મહાદેવાશ્ચિત્તવૃત્તિપ્રચાલકઃ ।
યસ્ય તપ્તં તપો ઘોરં સ એવાઽહં ન સંશયઃ ॥ ૩૪॥

પ્રસન્નેન મયાઽઽદૌવસ્તપસા હૃદિ દર્શિતમ્ ।
બીજમેકાક્ષરં મે વૈ સિદ્ધા યૂયં જપાત્તતઃ ॥ ૩૫॥

સાક્ષાન્મે દર્શને દેવા નાધિકારોસ્તિ નિશ્ચિતમ્ ।
યોગહીનપ્રભાવત્વાત્તતશ્ચાન્તર્હિતોઽભવમ્ ॥ ૩૬॥

ભૃશુણ્ડિનં મહાભક્તં પૃચ્છધ્વં સર્વમઞ્જસા ।
ગત્વા નત્વા સ વૈ સાક્ષાત્ જ્ઞાનદાતા ભવિષ્યતિ ॥ ૩૭॥

તત્ જ્ઞાત્વા દેવદેવા માં ભવિષ્યથ સમર્થકાઃ ।
સન્દ્રષ્ટું નાત્ર સન્દેહસ્તતઃ સિદ્ધિમવાપ્સ્યથ ॥ ૩૮॥

એવમુક્ત્વા ગણેશાનઃ સ્વસ્થઃ સોંઽતર્હિતોઽભવત્ ।
શિવાદયઃ પ્રણમ્યૈવ યુયુસ્તં મુનિપુઙ્ગવમ્ ॥ ૩૯॥

અમલાશ્રમસંસ્થં તં દદૃશુર્વિષ્ણુમુખ્યકાઃ ।
ભૃશુણ્ડિનં પ્રણમ્યૈતે સંસ્થિતા હર્ષસંયુતાઃ ॥ ૪૦॥

ઊચુઃ પ્રાઞ્જલયઃ સર્વે તં મુનિં શુણ્ડયાયુતમ્ ।
એકમેવ સ્થિતં પૂર્ણયોગાનન્દમયં પરમ્ ॥ ૪૧॥

દેવેશા ઊચુઃ ।
ધન્યં જન્મ તપો વિદ્યા જ્ઞાનં તે પાદદર્શનાત્ ।
ધન્યોઽપિ યોગિનાં મધ્ય આદિમધ્યાન્તવર્જિતઃ ॥ ૪૨॥

સોઽપિ તાન્ પૂજયામાસ જ્ઞાત્વા દેવતમાન્ મુનિઃ ।
કૃત્વાઽઽતિથ્યં જગાદૈવં ભૃશુણ્ડી પરમાર્થવિત્ ॥ ૪૩॥

ભૃશુણ્ડ્યુવાચ ।
જગતાં મૂલરૂપાશ્ચ ભવન્તો જગદીશ્વરાઃ ।
સમાગતા મદીયે મે આશ્રમે ભાગ્યગૌરવાત્ ॥ ૪૪॥

કિમર્થમાગતા દેવાઃ કાર્યં બ્રૂત કરોમ્યહમ્ ।
આદિમધ્યાન્તભાવજ્ઞા વિશ્વપાલાઃ પરેશ્વરાઃ ॥ ૪૫॥

શક્તય ઊચુઃ ।
મહાલયે ભૃશુણ્ડી ચ કથં લયવિવર્જિતઃ ।
વદ શક્તે મુનેસ્તસ્ય ચરિતં પરમાદ્ભુતમ્ ॥ ૪૬॥

મુદ્ગલ ઉવાચ ।

મહાલક્ષ્મીમુખીનાં તુ દેવીનાં પ્રશ્નમુત્તમમ્ ।
શ્રુત્વા તા જગદમ્બા સા કથયામાસ હર્ષિતા ॥ ૪૭॥

પુરા ભૃશુણ્ડિચરિતં મયા રમ્યં પ્રકાશિતમ્ ।
શ્રુત્વા સંશયહીનાસ્તાં પપ્રચ્છુર્વિનયાન્વિતાઃ ॥ ૪૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે ભૃશુણ્ડિપઞ્ચદેવસમાગમો નામ ષષ્ઠોઽધ્યાયઃ ॥ ૬.૬
(Page ખં. ૬ અ. ૭ પાન ૧૪)

## ૬.૭ સ્વાનન્દક્ષેત્રસ્વરૂપવર્ણનં નામ સપ્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શક્તય ઉચુઃ ।
અહો શક્તે મહાચ્ચિત્રં ચરિત્રં મુખ્યકં શ્રુતમ્ ।
ભૃશુણ્ડિનશ્ચ સન્તુષ્ટા વયં જાતા ન સંશયઃ ॥ ૧॥

અધુના મુનિદેવાનાં સંવાદં વદ સૌખ્યદમ્ ।
યત્ર વિઘ્નેશ્વરસ્યૈવ જ્ઞાનં સઙ્ગીયતેઽમલમ્ ॥ ૨॥

આદિશક્તિરુવાચ ।
શૃણુધ્વં શક્તયઃ સર્વાઃ પુરાવૃત્તં કથાનકમ્ ।
સર્વપાપહરં પુણ્યં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૩॥

ભૃશુણ્ડિવચનં શ્રુત્વા હર્ષિતાઃ શઙ્કરાદયઃ ।
ઊચુસ્તં પ્રણિપત્યૈવ વૃત્તાન્તં પૂર્વસમ્ભવમ્ ॥ ૪॥

શિવાદય ઊચુઃ ।
કોઽસૌ ગણેશ્વરઃ સ્વામિન્ નરકુઞ્જરવેષભૃત્ ।
તસ્ય જ્ઞાનં વદસ્વ ત્વં કથં ચિત્તપ્રચાલકઃ ॥ ૫॥

ભૃશુણ્ડ્યુવાચ ।
સંયોગવાચકઃ પ્રોક્તો ગકારશ્ચ ણકારકઃ ।
અયોગાત્મકસંજ્ઞો વૈ તયોઃ સ્વામી ગણેશ્વરઃ ॥ ૬॥

અવિનાશિપદં વેદે પ્રોક્તં તદ્ગજવાચકમ્ ।
મસ્તકં તસ્ય દેવેશા જ્ઞાતવ્યં માયયા કૃતમ્ ॥ ૭॥

નાશવદ્વિશ્વમેતદ્વૈ તદેવ દેહરૂપગમ્ ।
કણ્ઠાધો નાત્ર સન્દેહસ્તયોર્યોગે ગજાનનઃ ॥ ૮॥

ચતુઃપદાર્થરૂપાશ્ચ ભુજાસ્તસ્ય મહાત્મનઃ ।
ચતુર્ભુજસ્તેન સાક્ષાદ્ગણેશઃ પરિકીર્તિતઃ ॥ ૯॥

જીવાત્મપરમાત્માનૌ પાદૌ તસ્ય મહાત્મનઃ ।
દ્વિપદો ગણરાજોઽતઃ કથ્યતે વેદવાદતઃ ॥ ૧૦॥

તસ્યોદરાત્ સમુત્પન્નં જગદ્બ્રહ્મ મહેશ્વરાઃ ।
તેન લમ્બોદરઃ સાક્ષાત્ કથિતોઽસૌ ગણેશ્વરઃ ॥ ૧૧॥

ભ્રાન્તિદા ગણરાજસ્ય માયાસિદ્ધિઃ પ્રકીર્તિતા ।
વામાઙ્ગાદ્ભિન્નરૂપા સા બભૂવે યોગરૂપિણી ॥ ૧૨॥

પઞ્ચચિત્તમયી સાક્ષાદ્બુદ્ધિર્ભ્રાન્તિધરા પરા ।
દક્ષિણાઙ્ગાદ્ગણેશસ્ય નિઃસૃતા જ્ઞાનરૂપિણી ॥ ૧૩॥

તયોઃ સ્વામી ગણેશાનો યોગશાન્તિમયઃ સ્વયમ્ ।
ભક્તવત્સલભાવેન દેહધારી બભૂવ હ ॥ ૧૪॥

સ એવ જ્ઞાનગો દેવા ભવતાં કાર્યસિદ્ધયે ।
બભૂવ તં ભજધ્વં તુ તેન સર્વં શુભં ભવેત્ ॥ ૧૫॥

શ્રુત્વૈવં વિસ્મિતા ભૂત્વા દેવેશાસ્તં પ્રણમ્ય તુ ।
ઊચુર્વિસ્મિતચિત્તાસ્તે ગુરું ભૃશુણ્ડિનં વચઃ ॥ ૧૬॥

બ્રહ્માદય ઊચુઃ ।
ત્વં સાક્ષાદ્ગણરાજો વૈ શુણ્ડાદણ્ડવિરાજિતઃ ।
અસ્માકં ગુરુરાદ્યશ્ચ બોધદાતર્નમોઽસ્તુ તે ॥ ૧૭॥

ત્વદીયવચનેનૈવ ગણેશાર્થવિચક્ષણાઃ ।
જાતા વયં મહાયોગિંસ્તદ્ભક્તાઃ સાર્થકાઃ પ્રભો ॥ ૧૮॥

અધુના વદ માહાત્મ્યં ભજનસ્ય વિશેષતઃ ।
તત્ર સ્થાનં ચ મન્ત્રાદિવિધિયુક્તં મહામુને ॥ ૧૯॥

ભૃશુણ્ડ્યુવાચ ।
સમાધિના ભવન્તોઽપિ ગતાઃ પુરા મહેશ્વરાઃ ।
ભેદાભેદાદિહીને તુ બ્રહ્મણિ તન્મયત્વતઃ ॥ ૨૦॥

અધુના દણ્ડકારણ્યે તાદૃશં ક્ષેત્રમુત્તમમ્ ।
સ્વાનન્દાખ્યં ચ તત્રૈવ તપધ્વં ગણપે રતાઃ ॥ ૨૧॥

મૂર્તિં કૃત્વા ગણેશસ્ય દૃષ્ટાં સ્વહૃદિ તાદૃશીમ્ ।
પૂજયધ્વં વિધાનેન તતઃ સિદ્ધિમવાપ્સ્યથ ॥ ૨૨॥

એવમુક્ત્વા મહાયોગી ભૃશુણ્ડી વિરરામ હ ।
ગણેશભક્તરાજેન્દ્રો દેવેશાસ્તં જગુઃ પુનઃ ॥ ૨૩॥

શિવાદ્યા ઊચુઃ ।
કુત્ર ક્ષેત્રં સ્થિતં વિપ્ર પ્રલયે સમુપસ્થિતે ।
કીદૃશં તસ્ય માહાત્મ્યં વદ યોગીન્દ્રસત્તમ ॥ ૨૪॥

તત્ર મૂર્તિઃ પુરા કેન સ્થાપિતા ગણપસ્ય ચ ।
કિમર્થં ભૂમિસંસ્થોઽયં ગણેશઃ સમ્બભૂવ હ ॥ ૨૫॥

(Page ખં. ૬ અ. ૭ પાન ૧૫)
તત્ર સિદ્ધિં સમાજગ્મુઃ સેવ્ય વિઘ્નેશ્વરં નરાઃ ।
માહાત્મ્યં તત્ સમાચક્ષ્વ સર્વજ્ઞોઽસિ મહામુને ॥ ૨૬॥

ગણનાથેન સાક્ષાત્ત્વં દર્શિતો ગુરુરાદરાત્ ।
વયં શિષ્યાસ્ત્વદીયાશ્ચ શાધિ સર્વાન્ હિતાય નઃ ॥ ૨૭॥

તેષાં વચનમાકર્ણ્ય ભૃશુણ્ડી પુનરબ્રવીત્ ।
ગાણપત્યવિચારજ્ઞઃ સર્વશાસ્ત્રાર્થતત્ત્વવિત્ ॥ ૨૮॥

ભૃશુણ્ડ્યુવાચ ।
ક્ષેત્રં ગણેશ્વરસ્યૈવ ત્રિવિધં પરિકીર્તિતમ્ ।
તેષાં ભેદં પ્રવક્ષ્યામિ શ‌ૃણુધ્વં ત્વેકચેતસઃ ॥ ૨૯॥

સ્વર્ગે શમ્ભુગૃહે ચૈવ પાતાલે શેષમન્દિરે ।
પૃથિવ્યાં તુ મયૂરેશે ક્ષેત્રં વિઘ્નપતેઃ સ્મૃતમ્ ॥ ૩૦॥

તત્ર કર્મપ્રસિદ્ધ્યર્થં ભૂમિગં શાશ્વતં સદા ।
વક્ષ્યામિ તસ્ય માહાત્મ્યં બ્રહ્માકારસ્ય દેવપાઃ ॥ ૩૧॥

પ્રકૃતિઃ સર્વરૂપા તુ પુરુષશ્ચાત્મસંજ્ઞકઃ ।
તયોઃ સંયોગભાવે તુ સ્વાનન્દઃ પરિકથ્યતે ॥ ૩૨॥

સ્વસંવેદ્યેન યોગેન લભ્યતે માનવૈઃ પરમ્ ।

તદેવ ગણરાજસ્ય ક્ષેત્રં જાનીત ભૂમિગમ્ ॥ ૩૩॥

તત્રૈવ સંસ્થિતઃ સાક્ષાદ્ગણેશો યોગવાચકઃ ।
તેન સંરચિતં સ્વસ્ય માયયા બ્રહ્મદાયકમ્ ॥ ૩૪॥

તસ્ય રૂપં કથયિતું નિજાનન્દં ન શક્યતે ।
સર્વક્ષેત્રસમાયોગો જ્ઞાતવ્યં ક્ષેત્રમુત્તમમ્ ॥ ૩૫॥

તતઃ સ્વસ્યેચ્છયા દેવા ગણેશેન સ્વમાયયા ।
સૃષ્ટં ચતુર્વિધં તસ્માત્ ક્ષેત્રાત્ ખેલનભાવતઃ ॥ ૩૬॥

પશ્ચિમાઙ્ગાદસદ્રૂપં બ્રહ્મ શક્તિમયં પરમ્ ।
નિઃસૃતં તત્ દ્વિધા જાતં સ્વભાવેન મહેશ્વરાઃ ॥ ૩૭॥

રતિર્ભોગમયી પ્રોક્તા કામઃ સર્વપ્રમોહકઃ ।
ભોક્તા તયોઃ સમાયોગે દ્વારં તચ્ચ પ્રકીર્તિતમ્ ॥ ૩૮॥

હૃદિ સર્વજનાનાં યા રતિરુત્પદ્યતે પરા ।
તયા મોહિતચિત્તાસ્તે ભ્રમન્તિ વિષયે રતાઃ ॥ ૩૯॥

તત્ર ચાલકરૂપેણ સંસ્થિતઃ પુરુષો મહાન્ ।
કામસ્તેન જનાઃ સર્વે નાના કાર્યે પરાયણાઃ ॥ ૪૦॥

ભોગો યસ્ય તથા ભોક્તા મોહહીનૌ યદા હૃદિ ।
તદા શાક્તં લભેત્ સોઽપિ બ્રહ્માસદ્વાચકં પરમ્ ॥ ૪૧॥

તેન દ્વારેણ વિઘ્નેશં સાધયિત્વા ચ યોગિનઃ ।
ગચ્છન્તિ તેન દેવેન્દ્રા દ્વારં શાસ્ત્રે પ્રકથ્યતે ॥ ૪૨॥

ઉત્તરાઙ્ગાદ્ગણેશસ્ય સમુદ્ભૂતં સ્વભાવતઃ ।
બ્રહ્મ સૌરં સદા સત્યવાચકં દેવસત્તમાઃ ॥ ૪૩॥

તદેવ દ્વિવિધં જાતં કર્મ જ્ઞાનપ્રભેદતઃ ।
ઇચ્છયા ગણરાજસ્ય તચ્છૃણુધ્વં વિધાનતઃ ॥ ૪૪॥

કર્માધારં જગત્ સર્વં કર્મ સૃષ્ટં પ્રવર્તતે ।
અન્તે કર્મગતં ભાવિ શાસ્ત્રેષુ તન્મયત્વતઃ ॥ ૪૫॥

આધારાત્મકભાવેન સંસ્થિતા ધરણી પરા ।
કર્મરૂપા મહામાયા સંજ્ઞા સૂર્યસ્ય ભામિની ॥ ૪૬॥

વરાહો જ્ઞાનરૂપશ્ચ સદા નિઃસઙ્ગભાવતઃ ।
કર્મજાતિષુ તિષ્ઠેત્તુ સ એવ રવિવાચકઃ ॥ ૪૭॥

કર્મયોગયુતાઃ કેચિત્ કેચિત્ જ્ઞાનપરાયણાઃ ।
ભ્રમન્તિ દ્વિવિધે ભાવે યન્ત્રિતા મોહસંયુતાઃ ॥ ૪૮॥

કર્મમોહં પરિત્યજ્ય જ્ઞાનમોહં તથા જનઃ ।
તયોર્યોગેઽમૃતં બ્રહ્મ પ્રાપ્નુયાત્ રવિવાચકમ્ ॥ ૪૯॥

અથવા સૌરમાર્ગેણ લભ્યતે ભક્તમુખ્યકૈઃ ।
તદેવ દ્વારરૂપં વૈ વદન્તિ ગણપસ્ય ચ ॥ ૫૦॥

તેન દ્વારેણ યોગીન્દ્રા ગચ્છન્તિ ગણનાયકમ્ ।
બુધૈસ્તદ્ દ્વારમાખ્યાતમુત્તરાઙ્ગં વિશેષતઃ ॥ ૫૧॥

તતો ગણેશ્વરસ્યૈવ પૂર્વાઙ્ગાન્નિઃસૃતં પરમ્ ।
બ્રહ્માનન્દમયં પૂર્ણં સમભાગપ્રકાશકમ્ ॥ ૫૨॥

સત્યાસત્યાત્મકે દેવાઃ સમરૂપેણ સંસ્થિતમ્ ।
વૈષ્ણવં સર્વમાન્યં તુ તદેવ દ્વિવિધં બભૌ ॥ ૫૩॥

લક્ષ્મીઃ શોભાત્મિકા પ્રોક્તા યશોરૂપા વિશેષતઃ ।
દ્વિવિધં શોભયા યુક્તં કૃતં તયા વિશેષતઃ ॥ ૫૪॥

લક્ષ્મ્યા ન સમતા કુત્ર દૃશ્યતે દેવસત્તમાઃ ।
શોભા સા પરમા માયા મોહદા કથ્યતે બુધૈઃ ॥ ૫૫॥

યત્ર લક્ષ્મીશ્ચ તત્રૈવ યશઃ સર્વં પ્રતિષ્ઠિતમ્ ।
ભુક્તિમુક્તિમયી સાક્ષાલ્લક્ષ્મીઃ સર્વત્ર પઠ્યતે ॥ ૫૬॥

તસ્યાશ્ચાલકરૂપશ્ચ વિષ્ણુઃ સામ્યે વ્યવસ્થિતઃ ।
આનન્દભુક્ વિશેષેણ દ્વન્દ્વમાયાધરો બભૌ ॥ ૫૭॥

તયોર્યોગે સમાકારં બ્રહ્મ વેદેષુ પઠ્યતે ।
આનન્દવાચકં વિપ્રૈર્વૈષ્ણવૈઃ પ્રાપ્યતે પરમ્ ॥ ૫૮॥

ગણેશપ્રાપ્તયે દેવા દ્વારમાનન્દધારકમ્ ।
તચ્ચ ક્ષેત્રસ્ય પૂર્વાઙ્ગં ગાણેશસ્ય પ્રકથ્યતે ॥ ૫૯॥

તતો દક્ષિણભાગાદ્વૈ બ્રહ્માવ્યક્તમયં પરમ્ ।
નિઃસૃતં નેતિ કર્તૃત્વાત્ ત્રયાણાં નેતિરૂપકમ્ ॥ ૬૦॥

તદેવ શાઙ્કરં બ્રહ્મ સહજં સર્વસમ્મતમ્ ।
માયયા તત્ દ્વિધા ભૂતં નરનારીસ્વભાવતઃ ॥ ૬૧॥

સ્વેચ્છારૂપા મહામાયા પાર્વતી કથિતા બુધૈઃ ।
ઇચ્છયા ત્રિવિધં સ્વસ્યાઃ સૃજતે સા ન સંશયઃ ॥ ૬૨॥

તત્ર મોહવિહીનશ્ચ શઙ્કરઃ કથ્યતે પરઃ ।
સ્વાધીનઃ શૈવભક્તેભ્યશ્ચતુર્થં બ્રહ્મ ઉચ્યતે ॥ ૬૩॥

તયોર્યોગે મહેશાના બ્રહ્માવ્યક્તં પ્રકીર્તિતમ્ ।
દ્વારં દક્ષિણગં તેન લભ્યતે ગણનાયકઃ ॥ ૬૪॥

ચતુર્ણાં ચૈવ સંયોગે સ્વાનન્દઃ પરિકીર્તિતઃ ।
સ્વસંવેદ્યેન યોગેન લભ્યતે યોગિભિઃ પરઃ ॥ ૬૫॥

તદેવ ગણરાજસ્ય ક્ષેત્રં સ્વાનન્દવાચકમ્ ।
ચતુર્દ્વારયુતં પ્રોક્તં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૬૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે સ્વાનન્દક્ષેત્રસ્વરૂપવર્ણનં નામ સપ્તમોઽધ્યાયઃ ॥ ૬.૭

## ૬.૮ નાનાક્ષેત્રદેવોત્પત્તિવર્ણનં નામાષ્ટમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ભૃશુણ્ડ્યુવાચ ।
ચતુર્દ્વારમયં ક્ષેત્રં કથિતં દેવનાયકાઃ ।
અધુના દ્વારવિસ્તારં કથયામિ સમાસતઃ ॥ ૧॥

પૂર્વદ્વારે સ્થિતૌ દેવૌ લક્ષ્મીનારાયણાવુભૌ ।
તાભ્યાં તુ વિવિધં સૃષ્ટં સ્વસ્વસ્થાનાર્થમાદરાત્ ॥ ૨॥

બ્રહ્માણ્ડે વૈષ્ણવાન્યેવ ક્ષેત્રાણિ વિવિધાનિ ચ ।
તાનિ તેન પ્રસૃષ્ટાનિ ગણેશકૃપયા પુરા ॥ ૩॥

લક્ષ્મ્યા તદ્વત્ પ્રસૃષ્ટાનિ ક્ષેત્રાણિ વિવિધાનિ તુ ।
લક્ષ્મીવાસકરાણ્યેવ પ્રોક્તાનિ શાસ્ત્રસમ્મતમ્ ॥ ૪॥

દક્ષિણદ્વારગૌ શક્તિશિવૌ દેવૌ તથાઽમરાઃ ।

ગણેશકૃપયા યુક્તૌ પરૌ ક્ષેત્રાણિ ચક્રતુઃ ॥ ૫॥

(Page ખં. ૬ અ. ૮ પાન ૧૭)
ક્ષેત્રાણિ યાનિ બ્રહ્માણ્ડે સ્વયં શૈવાનિ શઙ્કરઃ ।
સસૃજે ચ તતઃ શક્તિઃ શાક્તાનિ વિવિધાનિ વૈ ॥ ૬॥

રતિકામૌ સસૃજતુઃ પશ્ચિમદ્વારસંસ્થિતૌ ।
પ્રભાવાદ્વિઘ્નરાજસ્ય ક્ષેત્રાણિ કિલ માયયા ॥ ૭॥

ક્ષેત્રાણિ માતૃકાણાં ચ રત્યા સૃષ્ટાનિ યત્નતઃ ।
દિક્પાલક્ષેત્રરૂપાણિ સૃષ્ટાનિ મદનેન તુ ॥ ૮॥

ઉત્તરદ્વારસંસ્થૌ તૌ મહીવારાહકૌ પરૌ ।
સ્વક્ષેત્રાણિ સસૃજતુઃ પરૌ ગણપમાયયા ॥ ૯॥

સંજ્ઞાક્ષેત્રાણિ યાવન્તિ ભૂમ્યાં સૃષ્ટાનિ તાનિ તુ ।
સૌરાણ્યેવં વરાહેણ સૃષ્ટાનિ વિવિધાનિ તુ ॥ ૧૦॥

પરિવારયુતા દેવાઃ પરં તેપુસ્તપો મહત્ ।
ક્ષેત્રજ્ઞાઃ ક્ષેત્રસંયુક્તાઃ ગણેશસ્ય મહાત્મનઃ ॥ ૧૧॥

નાનામન્ત્રજપેનૈવ ધ્યાત્વા દેવં ગજાનનમ્ ।
તોષયામાસુરત્યન્તભક્ત્યા નિત્યં વિશેષતઃ ॥ ૧૨॥

ઉપોષણયુતાનિ ક્ષેત્રાણિ તા દેવતાસ્તથા ।
પૂજયામાસુરવ્યગ્રાઃ ક્ષેત્રસ્થં ગણનાયકમ્ ॥ ૧૩॥

એવં વર્ષશતે પૂર્ણે પ્રસન્નોઽભૂદ્ગજાનનઃ ।
આયયૌ તાન્ વરાન્ દાતું સ ક્ષેત્રાન્ દેવમુખ્યકાન્ ॥ ૧૪॥

તં દૃષ્ટ્વા સહસોત્થાય પ્રણેમુસ્તે ગજાનનમ્ ।
પુપૂજુસ્તુષ્ટુવુઃ સર્વે ભક્તિનમ્રાત્મકન્ધરાઃ ॥ ૧૫॥

સક્ષેત્રા દેવા ઊચુઃ ।
બ્રહ્મણે વિઘ્નરાજાય સ્વાનન્દસ્થાય તે નમઃ ।
આદિમધ્યાન્તહીનાયાદિમધ્યાન્તસ્વરૂપિણે ॥ ૧૬॥

ગણેશાય નમસ્તુભ્યં ભુક્તિમુક્તિપ્રદાયિને ।
નાનાખેલકરાયૈવ જ્યેષ્ઠરાજાય તે નમઃ ॥ ૧૭॥

સૃષ્ટિકર્ત્રે ચ સંહર્ત્રે પાત્રે મોહપ્રચારિણે ।

ગુણેશાય ગુણાનાં તુ ચાલકાય નમો નમઃ ॥ ૧૮॥

પરેશાય પરેશેભ્યો મોહદાય ગજાનન ।
સર્વયોગમયાયૈવ યોગેશાય નમો નમઃ ॥ ૧૯॥

સિદ્ધિબુદ્ધિપતે તુભ્યં સિદ્ધિબુદ્ધિમયાય ચ ।
સિદ્ધિબુદ્ધિપ્રદાત્રે તે નમશ્ચિન્તામણે નમઃ ॥ ૨૦॥

પૂર્વાઙ્ગે વિષ્ણુરૂપાય દક્ષિણાઙ્ગે શિવાત્મને ।
પશ્ચિમાઙ્ગે ચ માયાયૈ રવયે ઉત્તરાઙ્ગકે ॥ ૨૧॥

ચતુર્વિધં ગણેશાન સૃષ્ટ્વા ખેલસિ નિત્યદા ।
નાનાવિધં તથા ત્વાં તુ કશ્ચ સ્તોતું ક્ષમો ભવેત્ ॥ ૨૨॥

વયં ધન્યા વયં ધન્યા દૃષ્ટવન્તો ગજાનનમ્ ।
બ્રહ્મણસ્પતિનામાનં બ્રહ્મણાં ચાલકં પરમ્ ॥ ૨૩॥

યં સ્તોતું ન સમર્થાશ્ચ વેદાઃ સાઙ્ગા ગજાનન ।
કિં પ્રસ્તુમશ્ચ દેવેશ અતસ્ત્વાં પ્રણમામહે ॥ ૨૪॥

એવં સ્તુત્વા ગણેશાનં દેવાઃ ક્ષેત્રસમન્વિતાઃ ।
પ્રણેમુસ્તં પ્રહર્ષેણ ભક્તિભાવસમન્વિતાઃ ॥ ૨૫॥

તતસ્તાન્ પ્રત્યુવાચેદં વચનં ગણનાયકઃ ।
ભક્તાન્ ભક્તિપ્રિયઃ સાક્ષાત્તપસા તોષિતઃ પરઃ ॥ ૨૬॥

શ્રીગણેશ ઉવાચ ।
વરં બ્રૂત મહાભાગાઃ સક્ષેત્રા દેવમુખ્યકાઃ ।
દાસ્યામિ તપસા તુષ્ટો ભક્ત્યા સ્તોત્રેણ ચેપ્સિતમ્ ॥ ૨૭॥

સ્તોત્રં ભવત્કૃતં ચૈવ યઃ પઠિષ્યતિ મામકમ્ ।
સ મત્પ્રિયો ભવેદ્દેવાઃ શ‍ૃણુયાચ્છ્રાવયેત્તથા ॥ ૨૮॥

ભુક્તિમુક્તિપ્રદં ચૈવ ધનધાન્યવિવર્ધનમ્ ।
પુત્રપૌત્રપ્રદં પૂર્ણં ભવિષ્યતિ સુસિદ્ધિદમ્ ॥ ૨૯॥

મમ સન્નિધિગો ભૂત્વા પઠતિ સ્તોત્રમુત્તમમ્ ।
સર્વક્ષેત્રભવં પુણ્યં લભતે નાત્ર સંશયઃ ॥ ૩૦॥

ગણેશવચનં શ્રુત્વા દેવા હર્ષસમન્વિતાઃ ।
(Page ખં. ૬ અ. ૮ પાન ૧૮)

તં તે પ્રણમ્ય સક્ષેત્રા જગુર્ભક્તિસમન્વિતાઃ ॥ ૩૧॥

સક્ષેત્રા દેવા ઊચુઃ ।
યદિ પ્રસન્નભાવેન વરદોઽસિ ગજાનન ।
તદા તે પાદપદ્મે નો ભક્તિરસ્તુ ચ નિત્યદા ॥ ૩૨॥

કિમર્થં તુ વયં સર્વે સૃષ્ટા વદ ગજાનન ।
કાર્યં બ્રૂહિ કરિષ્યામસ્ત્વદાજ્ઞાવશભાવતઃ ॥ ૩૩॥

સ્વાનન્દે વાસકાર્યાર્થં દેહિ સ્થાનં મહોદર ।
તત્ર ત્વાં પૂજયિષ્યામો નિત્યં ભક્તિસમન્વિતાઃ ॥ ૩૪॥

સ્વસ્વજ્ઞાનયુતાન્નાથ કુરુ સર્વાન્ મહામતે ।
ત્વદીયા વશગાઃ સર્વે જ્ઞાનયુક્તા ભજામહે ॥ ૩૫॥

ભૃશુણ્ડ્યુવાચ ।
તેષાં વચનમાકર્ણ્ય ગણેશઃ કરુણાનિધિઃ ।
જગાદ તાન્ મહાભાગાન્ ભક્તિયુક્તાન્ મહેશ્વરાન્ ॥ ૩૬॥

શ્રીગણેશ ઉવાચ ।
ધર્માર્થકામમોક્ષાન્ વૈ દદતુ ક્ષેત્રકાણિ મે ।
વરદાનાત્ સમર્થાનિ સ્વસ્વકાર્યેષુ સેવિનામ્ ॥ ૩૭॥

ધર્મદાન્યર્થદાન્યેવ કાનિચિત્ સેવિનાં તથા ।
કામદાનિ ભવન્ત્યેવ મોક્ષદાનિ વિભાગશઃ ॥ ૩૮॥

કાનિચિન્ મરણે સદ્યસ્તત્રૈવ ફલદાનિ તુ ।
કાનિચિત્ ક્રમયોગેન મુખ્યક્ષેત્રપ્રદાનિ તુ ॥ ૩૯॥

તથા દેવાશ્ચ તત્રસ્થાઃ પૂજનેન ફલપ્રદાઃ ।
દર્શનેન ભવન્ત્યેવં સ્વસ્વક્ષેત્રપ્રિયાત્મકાઃ ॥ ૪૦॥

નામાનિ ગણનાથશ્ચ ચકાર વિવિધાનિ સઃ ।
કાશીપ્રયાગકાદ્યાનિ વક્તું નૈવ પ્રશક્યતે ॥ ૪૧॥

પુનઃ સ તાનુવાચાઽસૌ ગણેશઃ કરુણાનિધિઃ ।
ક્ષેત્રાણિ સ્વકલાંશેન સ્થાતવ્યં સ્વસ્થલેષુ વૈ ॥ ૪૨॥

પૂર્ણાંશેન મદીયેઽત્ર ક્ષેત્રે સ્વાનન્દરૂપિણિ ।
વાસં કૃત્વા સદા માં તુ ભજિષ્યથ નિરન્તરમ્ ॥ ૪૩॥

સ્વક્ષેત્રસ્થાસ્તથા દેવાઃ કલાંશેન ભવેત વૈ ।
ક્ષેત્રેઽત્ર પૂર્ણભાવેન માં ભજેતાથ માનદાઃ ॥ ૪૪॥

સ્વસ્વકાર્યેષુ દક્ષા વૈ ભવિષ્યથ ન સંશયઃ ।
મદ્ભક્તિભાવસંયુક્તાઃ સક્ષેત્રા ગર્વહીનકાઃ ॥ ૪૫॥

સર્વક્ષેત્રાણિ યે ભૂમ્યાં કરિષ્યન્તિ વિધાનતઃ ।
દેવાન્ યથાવિધિ પ્રાજ્ઞા પૂજયિષ્યન્તિ માનવાઃ ॥ ૪૬॥

તેન સંસ્કારયોગેન મત્ક્ષેત્રે વાસમાશ્રિતાઃ ।
બ્રહ્મભૂતા ભવિષ્યન્તિ મત્ક્ષેત્રે મરણે સતિ ॥ ૪૭॥

એવમુક્ત્વાંઽતર્દધેઽસૌ ગણેશો બ્રહ્મનાયકઃ ।
ક્ષેત્રાણિ હર્ષયુક્તાનિ સંસ્થિતાન્યેવ તત્ર તુ ॥ ૪૮॥

પૂજયિત્વા ગણેશાનં સ્વસ્વસ્થાનકમાયયુઃ ।
સક્ષેત્રા દેવતાઃ સર્વા જ્ઞાનયુક્તા બભૂવિરે ॥ ૪૯॥

યથા ગજાનનઃ પ્રાહ તથા સર્વે મહેશ્વરાઃ ।
કૃત્વા પુનર્ગણેશાનં સમાજગ્મુઃ પ્રહર્ષિતાઃ ॥ ૫૦॥

તત્ર તે સંસ્થિતા દેવાઃ સક્ષેત્રા હ્રસ્વરૂપકાઃ ।
સ્વાનન્દક્ષેત્રકે સર્વેઽભજન્નિત્યં તમાદરાત્ ॥ ૫૧॥

એતત્ ક્ષેત્રામરાણાં વૈ ચેષ્ટિતં યઃ શ‍ૃણોતિ વા ।
પઠેદ્વા તસ્ય વિઘ્નેશઃ ક્ષેત્રવાસં તુ દાસ્યતિ ॥ ૫૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે નાનાક્ષેત્રદેવોત્પત્તિવર્ણનં નામાષ્ટમોઽધ્યાયઃ ॥ ૬.૮
(Page ખં. ૬ અ. ૯ પાન ૧૯)

## ૬.૯ મયૂરેશદ્વારયાત્રાવિધિવર્ણનં નામ નવમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દેવા ઊચુઃ ।
દ્વારેષુ દેવપાઃ સન્તિ દ્વારધારકભાવતઃ ।
તેષાં પૂજનમાર્ગં તુ વદ વિઘ્નેશ્વરસ્ય ચ ॥ ૧॥

ભૃશુણ્ડ્યુવાચ ।

ક્ષેત્રમધ્યે ગણેશાનસ્તિષ્ઠતિ સર્વદાયકઃ ।
શુણ્ડાદણ્ડમુખઃ શ્રીમાંશ્ચતુર્બાહુધરઃ પ્રભુઃ ॥ ૨॥

પૃથૂદરો વિશાલાક્ષસ્ત્રિનેત્રઃ સ્વસ્તિકાસનઃ ।
પાશાઙ્કુશધરઃ સોઽપિ દન્તાભયવિરાજિતઃ ॥ ૩॥

નાભિશેષો વિચિત્રૈશ્ચ ભૂષણૈર્વસ્ત્રકાદિભિઃ ।
નાગયજ્ઞોપવીતી તુ શૂર્પકર્ણો વિરાજતિ ॥ ૪॥

તસ્ય વામાઙ્ગભાગે ચ સિદ્ધિઃ સર્વપ્રદાઽમરાઃ ।
દ્વિભુજા સંસ્થિતા માયા ચામરવ્યજનાન્વિતા ॥ ૫॥

દક્ષિણાઙ્ગે તથા બુદ્ધિર્દ્વિહસ્તા જ્ઞાનરૂપિણી ।
સુગન્ધવસ્તુલેપાર્થં સંસ્થિતા સેવનોત્સુકા ॥ ૬॥

સમ્મુખે મૂષકસ્તસ્ય મયૂરશ્ચ વિરાજતિ ।
પ્રમોદાઽઽમોદકાદ્યાશ્ચ ગણાઃ પૃષ્ઠે સ્થિતાસ્તથા ॥ ૭॥

વૈદિકેન ચ માર્ગેણ નમોંઽતેન પ્રપૂજયેત્ ।
પૌરાણિકેન દેવેશા ગણેશં સર્વસિદ્ધિદમ્ ॥ ૮॥

તતઃ પૂર્વદિશાયાં સ ગત્વા દ્વારસમાસ્થિતમ્ ।
પૂજયેદ્ગણનાથં તં સશક્તિપરિવારકમ્ ॥ ૯॥

દ્વિભુજં ગણનાથં તુ વામભાગે જગન્મયીમ્ ।
માર્જારીં દ્વિભુજાં તસ્ય પૂજયેદ્ભક્તિસંયુતઃ ॥ ૧૦॥

તત્ર ધ્યાનં સમાખ્યામિ ગજવક્ત્રં ગજાનનમ્ ।
એકહસ્તે ધૃતાંઽભોજં દ્વિતીયાઽઽલિઙ્ગિતપ્રિયમ્ ॥ ૧૧॥

કપોલૌ મદસંસ્રાવયુક્તૌ ભ્રમરસંયુતૌ ।
સદાનન્દમયં દેવાશ્ચિન્તયેદ્ગણનાયકમ્ ॥ ૧૨॥

દ્વિભુજાં શક્તિમુખ્યાં વૈ દક્ષિણાઽઽલિઙ્ગિતપ્રિયામ્ ।
વામહસ્તેન પદ્મં સા બિભ્રતીં ચિન્તયેદ્ હૃદિ ॥ ૧૩॥

ભક્તાભીષ્ટપ્રદાં પૂર્ણાં સદાનન્દસમન્વિતામ્ ।
માયાં સંસારદુઃખાનાં નાશિનીં ભક્તિકારિણામ્ ॥ ૧૪॥

દેવેશા ઊચુઃ ।
માર્જારિકા ત્વયા પ્રોક્તા માયા ગણપતેઃ પ્રિયા ।

તસ્યાઃ સ્વરૂપગં જ્ઞાનં વદ નો ગુરુસત્તમ ॥ ૧૫॥

ભૃશુણ્ડ્યુવાચ ।
જારઃ સર્વત્ર શબ્દશ્ચ વ્યભિચાર્યર્થવાચકઃ ।
સર્વેષુ જારભાવેષુ મતા નાનાર્થકારિણી ॥ ૧૬॥

તેષુ પુરુષરૂપેણ સ્થિત આત્મા સદૈકકઃ ।
તસ્ય જારાદિકં નાસ્તિ ભ્રાન્તિભાવાત્મકં કદા ॥ ૧૭॥

તથાપિ દેહસંસ્થશ્ચ માયયાત્મા પ્રમોહિતઃ ।
દ્વન્દ્વભાવેષુ દેવેન્દ્રાસ્તદાકારો બભૂવ હ ॥ ૧૮॥

આત્મનો જારભાવં તુ દર્શયન્તિ નિરન્તરમ્ ।
મોહયિત્વા ક્રીડતિ તેન સ્વયં શક્તિરુત્તમા ॥ ૧૯॥

માઞ્જારી સા સમાખ્યાતા માં પ્રતિ જારદર્શિની ।
ગણપઃ ક્રીડતિ દ્વન્દ્વવિહારસ્થઃ સદા તયા ॥ ૨૦॥

તયોઃ પુત્રૌ માનસિકૌ લક્ષ્મીનારાયણૌ મતૌ ।
સમીપે સંસ્થિતૌ તત્ર દ્વારે ધર્મપ્રદાયકૌ ॥ ૨૧॥

તેષાં પૂજનકં કાર્યં યથાવિધિ સુરેશ્વરાઃ ।
તેન ધર્મસ્ય ભવતિ સમ્પ્રાપ્તિસ્તસ્ય શાશ્વતી ॥ ૨૨॥

વિધિં તત્ર પ્રવક્ષ્યામિ યાત્રાયાઃ સર્વદાયકમ્ ।
દેવેશાસ્તાદૃશં કાર્યં તેન સિદ્ધિમવાપ્સ્યથ ॥ ૨૩॥

માસે ભાદ્રપદે ચૈવ શુક્લપક્ષે વિશેષતઃ ।
પ્રતિપદ્દિનમારભ્ય દ્વારયાત્રા પ્રકીર્તિતા ॥ ૨૪॥

પ્રાતઃ સ્નાત્વા મહાનદ્યાં ગણેશં પ્રતિપૂજયેત્ ।
તતઃ સ્નાનં નરઃ કૃત્વા દ્વારદેવીં સમર્ચયેત્ ॥ ૨૫॥

પુનઃ સ્નાનં તતઃ કૃત્વા ગણેશં પૂજયેત્ સ્વયમ્ ।
(Page ખં. ૬ અ. ૯ પાન ૨૦)
ઉપોષણયુતશ્ચૈવ સદા તિષ્ઠેત્ સ દેવપાઃ ॥ ૨૬॥

નિયમસ્થઃ સ્વભાવેન ગણેશસ્મરણાદિકમ્ ।
કુર્યાત્તદ્વત્ દ્વિતીયાયાં દક્ષિણદ્વારમર્ચયેત્ ॥ ૨૭॥

તત્ર દ્વારે ગણેશાનો દ્વિભુજઃ પરિકીર્તિતઃ ।

માયા ચ દ્વિભુજા પ્રોક્તા પૂર્વવત્ ધ્યાનગાવુભૌ ॥ ૨૮॥

વિરજા નામ વિખ્યાતા શક્તિસ્તત્ર મહેશ્વરાઃ ।
તસ્ય જ્ઞાનકરં ચૈવાર્થં વદામિ સુખપ્રદમ્ ॥ ૨૯॥

ત્રિવિધં તુ રૂજોરૂપં મલિનં સર્વગં બભૌ ।
તત્ર મોહવિહીનં યદ્વિરજં બ્રહ્મ કથ્યતે ॥ ૩૦॥

ગણેશસંયુતા દેવી તન્મયી વિરજા પરા ।
તયોર્માનસિકૌ પુત્રૌ પાર્વતીશઙ્કરૌ મતૌ ॥ ૩૧॥

તેષાં પૂજા પ્રકર્તવ્યા નરેણ સર્વભાવતઃ ।
તયા સર્વાર્થસંસિદ્ધિર્લભ્યતે નાત્ર સંશયઃ ॥ ૩૨॥

તૃતીયાયાં તતો વૈ સ પશ્ચિમદ્વારદેવતામ્ ।
પૂજયેદ્વિધિસંયુક્ત ઉપોષણપરાયણઃ ॥ ૩૩॥

દેવીગણેશ્વરૌ તત્ર પૂર્વં ધ્યાનાત્મકૌ સ્થિતૌ ।
આશ્રયા નામ શક્તિઃ સા સર્વાશ્રયધરા બભૌ ॥ ૩૪॥

તયોર્માનસિકૌ પુત્રૌ રતિકામૌ પ્રકીર્તિતૌ ।
તેષાં પૂજાં પ્રકુર્યાત્ સ તેન કામાન્ લભેન્નરઃ ॥ ૩૫॥

તતશ્ચતુર્થિકાયાં સ ગચ્છેદુત્તરગાં પરામ્ ।
દ્વારશક્તિં મહાદેવા ભુક્તિમુક્તિસમન્વિતામ્ ॥ ૩૬॥

દેવ્યા ગણેશ્વરસ્યાત્ર ધ્યાનં પૂર્વવદુચ્યતે ।
તયોર્માનસિકૌ પુત્રૌ મહીવરાહકૌ મતૌ ॥ ૩૭॥

તેષાં પૂજા પ્રકર્તવ્યા પૂર્વવન્નિયમેન ચ ।
તયા મુક્તિમવાપ્નોતિ યાત્રામાત્રેણ માનવઃ ॥ ૩૮॥

ચતુર્થ્યાં ગણનાથં સ પૂજયેદ્વિધિસંયુતઃ ।
મધ્યાહ્નસમયે દેવા ઉપોષણપરાયણાઃ ॥ ૩૯॥

રાત્રૌ જાગરણં કુર્યાત્ પઞ્ચમ્યાં પારણં ચરેત્ ।
દ્વિજૈઃ સહ નરઃ સાક્ષાચ્ચતુર્વિધફલં લભેત્ ॥ ૪૦॥

એવં માઘે શુક્લપક્ષે દ્વારયાત્રાં સમાચરેત્ ।
જ્યેષ્ઠે માસિ તથા દેવા વાર્ષિકં ત્રિવિધં સ્મૃતમ્ ॥ ૪૧॥

અથવા પ્રતિમાસેષુ શુક્લપક્ષે સમાચરેત્ ।
દ્વારયાત્રામથો નિત્યં નરઃ સર્વાર્થસિદ્ધિભાક્ ॥ ૪૨॥

અથવા ગણરાજસ્ય યાત્રાર્થં યઃ સમાગતઃ ।
તસ્મિન્ કાલે ચરેદ્યાત્રાં દ્વારભૂતાં મહેશ્વરાઃ ॥ ૪૩॥

ન તત્ર નિયમઃ પ્રોક્તો માસપક્ષતિથિષ્વપિ ।
ચતુર્ભિર્દિવસૈર્જન્તુઃ કુર્યાદ્યાત્રાં વિધાનતઃ ॥ ૪૪॥

અન્યચ્ચ સમ્પ્રવક્ષ્યામિ દ્વારયાત્રામયં વિધિમ્ ।
દેહસામર્થ્યયુક્તાનાં ચતુર્વિધફલપ્રદમ્ ॥ ૪૫॥

શુક્લા ચતુર્થિકા પ્રોક્તા તસ્યાં દ્વારમયીં ચરેત્ ।
યાત્રાં ચતુર્વિધાં પ્રોક્તામેકવાસરમધ્યતઃ ॥ ૪૬॥

સૂર્યોદયાત્ સમારભ્ય પૂજાં સ્વલ્પાં સમાચરેત્ ।
યાવન્નાસ્તગતો ભાનુસ્તાવન્મધ્યે સમાપયેત્ ॥ ૪૭॥

કિઞ્ચિદ્દિવસશેષે સ ગણનાથસ્ય પૂજનમ્ ।
વિધિયુક્તં નરો ભક્ત્યા કુર્યાત્તસ્મિન્ દિને સ્વયમ્ ॥ ૪૮॥

અથવા સ્વેચ્છયા કોઽપિ યાત્રાર્થં તુ સમાગતઃ ।
તત્રૈકદિવસે યાત્રાં પ્રકુર્યાચ્છક્તિભાવતઃ ॥ ૪૯॥

વૃદ્ધાનાં રોગયુક્તાનાં નિયમો નૈવ વિદ્યતે ।
બાલાનાં સ્વેચ્છયા તત્ર યાત્રા પ્રોક્તા મનીષિભિઃ ॥ ૫૦॥

અથવા બ્રાહ્મણેનૈવ નરો યાત્રાં સમાચરેત્ ।
દ્વારરૂપાં સ્વયં તત્ર વાહનસ્થો ગતિં ચરેત્ ॥ ૫૧॥

(Page  ખં. ૬ અ. ૧૦ પાન ૨૧)
શક્ત્યાઃ પ્રમાણભાવેન પૂજયેત્ દ્વારસંયુતમ્ ।
ગણેશં વિધિસંયુક્તશ્ચતુર્વિધફલં લભેત્ ॥ ૫૨॥

ગણેશં દ્વારસંયુક્તં યો નરઃ પૂજયેત્ કદા ।
યત્ર તત્ર ગતશ્ચાઽસૌ ધર્મકામાર્થમોક્ષભાક્ ॥ ૫૩॥

ન તસ્ય મરણે દેવા યા મતિઃ સા ગતિર્ભવેત્ ।
ન ભૂમ્યાદિવિકારશ્ચ નીચોચ્ચો નૈવ વિદ્યતે ॥ ૫૪॥

એતત્ દ્વારસ્ય માહાત્મ્યં યઃ શ‍ૃણોતિ નરોત્તમઃ ।

સ વૈ સંસ્કારયોગેન ભુક્તિં મુક્તિં લભેત્ પરામ્ ॥ ૫૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે મયૂરેશદ્વારયાત્રાવિધિવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૬.૯

## ૬.૧૦ દ્વારરહસ્યવર્ણનં નામ દશમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

પઞ્ચદેવા ઊચુઃ ।
ક્ષેત્રસ્ય માનસમ્ભૂતં માહાત્મ્યં વદ વિસ્તરાત્ ।
કિયન્માનં સમાખ્યાતં ક્ષેત્રં સ્વાનન્દવાચકમ્ ॥ ૧॥

અન્યચ્ચ વદ યોગીન્દ્ર ધર્મકામાર્થમોક્ષગાન્ ।
અર્થાન્ યેનૈવ તેષાં સ જ્ઞાનયુક્તો ભવેન્નરઃ ॥ ૨॥

પૂર્વસ્થે તુ કથં દ્વારે ધર્મ એકઃ પ્રતિષ્ઠતિ ।
તથાઽર્થો દક્ષિણદ્વારિ પશ્ચિમે કામ એવ ચ ॥ ૩॥

ઉત્તરદ્વારસંસ્થા તુ કથં મુક્તિર્મહામુને ।
ચતુર્બ્રહ્મસુ ચત્વારિ વિભક્તાનિ કથં વદ ॥ ૪॥

આદૌ શાક્તં સાધયિત્વા પશ્ચાત્ સૌરં લભેન્નરઃ ।
તતો વૈષ્ણવકં બહ્મ તતઃ શૈવં સમાધિના ॥ ૬॥

તતો ગાણેશ્વરં બ્રહ્મ પ્રલભેન્નાત્ર સંશયઃ ।
ક્રમેણ યોગભૂમિસ્થો બ્રહ્મભૂતો નરો ભવેત્ ॥ ૬॥

અન્નાદૌ વૈષ્ણવં બ્રહ્મ દ્વારભૂતં નરોત્તમઃ ।
યાત્રામાર્ગેણ વિપ્રેશ સાધયેત્ કથિતં ત્વયા ॥ ૭॥

તતઃ શૈવં તતઃ શાક્તં તતઃ સૌરં વિધાનતઃ ।
વિપરીતં કથં પ્રોક્તં વદ કારણમત્ર તુ ॥ ૮॥

શક્તિસૂર્યાવતિક્રમ્ય કથં વૈષ્ણવગો ભવેત્ ।
અકસ્માદ્ ભ્રાન્તભાવેન ભ્રષ્ટો ભવતિ માનવઃ ॥ ૯॥

શક્તિરુવાચ ।
એવં પૃષ્ટો મહાયોગી ભૃશુણ્ડી પરમાર્થવિત્ ।
જગાદ તાન્ મહાદેવાન્ તચ્છૃણુધ્વં તુ શક્તયઃ ॥ ૧૦॥

ભૃશુણ્ડ્યુવાચ ।
ધર્મઃ સ્વધર્મરૂપશ્ચ સર્વસિદ્ધિપ્રદાયકઃ ।
અર્થઃ સમર્થરૂપાખ્યો જ્ઞાતવ્યઃ સર્વદાયકઃ ॥ ૧૧॥

કામઃ શરીરભોગાખ્યો હૃદ્યઃ સૌખ્યપ્રદાયકઃ ।
મુક્તિશ્ચતુઃ શરીરેભ્યો હીનત્વે પરિકીર્તિતા ॥ ૧૨॥

ધર્મઃ સર્વસમાનાખ્યો યથા ભવતિ સર્વદા ।
કર્માનુસારભાવેન ફલં નિત્યં દદાતિ સઃ ॥ ૧૩॥

સ્વં પરં નૈવ દેવેશાઃ કદા ધર્મસ્ય વર્તતે ।
શુભાશુભં કૃતં યેન તાદૃશં સ ફલં લભેત્ ॥ ૧૪॥

(Page  ખં. ૬ અ. ૧૦ પાન ૨૨)
સમાનં વૈષ્ણવં બ્રહ્મ તેન ધર્મઃ સ્થિતોઽભવત્ ।
પૂર્વદ્વારે મહાભાગાઃ સર્વધર્મપ્રકાશકાઃ ॥ ૧૫॥

આદૌ સ્વધર્મનિષ્ઠશ્ચેત્તતઃ સર્વં નરોત્તમઃ ।
લભતે નાત્ર સન્દેહઃ કારણં ધર્મ એવ ચ ॥ ૧૬॥

વિષ્ણોરઙ્ગમયો ધર્મો વિષ્ણુદ્વારે સમાશ્રિતઃ ।
અતઃ પ્રથમધર્માર્થં પૂર્વદ્વારં સમાચરેત્ ॥ ૧૭॥

અર્થઃ સમર્થરૂપાખ્ય ઈશ્વરાન્ન પરોત્તમઃ ।
સમર્થસ્તેન દેવેન્દ્રા અર્થસ્તત્ર સમાશ્રિતઃ ॥ ૧૮॥

સમર્થભાવેન યદિ કેઽપિ તિષ્ઠન્તિ દેવતાઃ ।
તે સર્વે તત્કલાંશાશ્ચ જ્ઞાતવ્યા નાઽત્ર સંશયઃ ॥ ૧૯॥

ઈશ્વરઃ સર્વશાસ્ત્રેષુ શિવ એકઃ પ્રકીર્તિતઃ ।
અર્થઃ શિવાઙ્ગાત્ સમ્ભૂતસ્તેન તં સંશ્રિતોઽભવત્ ॥ ૨૦॥

ધર્મં કૃત્વા સમર્થશ્ચ ભવતે માનવોત્તમઃ ।
સર્વકાર્યેષુ દેવેન્દ્રાઃ ક્રમ એવં પ્રકીર્તિતઃ ॥ ૨૧॥

દ્વિતીયાશ્રિતયાત્રાતો દક્ષિણદ્વારસમ્ભવા ।
કથિતા સર્વભાવજ્ઞૈર્નરેભ્યઃ સર્વસિદ્ધયે ॥ ૨૨॥

કામો ભોગાત્મકઃ પ્રોક્તો દેહાય વિષયપ્રદઃ ।
વિષયાનાં સમાખ્યાતં કારણં શક્તિરઞ્જસા ॥ ૨૩॥

શક્તેરઙ્ગાત્ સમુદ્ભૂતઃ કામસ્તેન મહેશ્વરાઃ ।
તામાશ્રિત્ય સ્થિતઃ સોઽપિ સર્વકામવિવર્ધનઃ ॥ ૨૪॥

આદૌ ધર્મં સમાશ્રિત્ય સમર્થો જાયતે નરઃ ।
તતઃ કામાન્ સ્વયં ભુઙ્ક્તે સર્વાન્નાનાસુખપ્રદાન્ ॥ ૨૫॥

તૃતીયં દ્વારમેતસ્માત્ કામભોગફલપ્રદમ્ ।
કૃતં યાત્રાવિધાને તુ જ્ઞાતવ્યં વિબુધૈઃ સદા ॥ ૨૬॥

મોક્ષો જન્મમૃતિભ્યાં ચ હીનઃ સઙ્કીર્તિતો બુધૈઃ ।
શુક્લાં ગતિં દદત્તત્ર સૂર્યસ્તિષ્ઠતિ નિત્યદા ॥ ૨૭॥

આત્મા સૂર્ય ઇતિ પ્રોક્તં તસ્માન્ મોક્ષઃ પ્રલભ્યતે ।
તેન સૂર્યં સમાશ્રિત્ય મોક્ષસ્તત્રૈવ તિષ્ઠતિ ॥ ૨૮॥

કામેભ્યો ધર્મસંયુક્તસ્તૃપ્તો ભવતિ માનવઃ ।
ઇચ્છેન્ મુક્તિં તતો યત્નાદ્વિતૃષ્ણો દેવસત્તમાઃ ॥ ૨૯॥

વાસનાયુક્તભાવેન મુક્તૌ નૈવ પ્રવર્તતે ।
અતો મુક્તિમયં દ્વારં ચતુર્થં પરિકીર્તિતમ્ ॥ ૩૦॥

એતદ્ દ્વારસ્ય દેવેશા રહસ્યં કથિતં મયા ।
શ્રવણાત્ સૌખ્યદં પૂર્ણં ભવેત પઠનાત્તથા ॥ ૩૧॥

એતત્ ક્રમાર્થપ્રામાણ્યાત્ પૂર્વં ધર્મસમાશ્રિતમ્ ।
વૈષ્ણવં તત્ર કર્તવ્યં દ્વારં વિઘ્નેશનિર્મિતમ્ ॥ ૩૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે દ્વારરહસ્યવર્ણનં નામ દશમોઽધ્યાયઃ ॥ ૬.૧૦
(Page ખં. ૬ અ. ૧૧ પાન ૨૩)

## ૬.૧૧ ક્ષેત્રપ્રમાણવર્ણનં નામ એકાદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ભૃશુણ્ડ્યુવાચ ।
ચતુરસ્રં ગણેશસ્ય ક્ષેત્રં શાસ્ત્રે પ્રકીર્તિતમ્ ।
બ્રહ્મભૂતમયં સાક્ષાદેકં દ્વાદશયોજનમ્ ॥ ૧॥

ગણેશાત્ પૂર્વદિગ્દેશે શતં ચ ધનુષાં સ્થિતમ્ ।

દ્વારમષ્ટાવિંશતિકં તત્રાર્ધેન વિહીનકમ્ ॥ ૨॥

દક્ષિણસ્યાં ગણેશાનાદ્ દ્વિગુણં દ્વારમુત્તમમ્ ।
પૂર્વદ્વારાચ્ચ સમ્પ્રોક્તં જ્ઞાતવ્યં વિબુધૈઃ સદા ॥ ૩॥

તતઃ પશ્ચિમદિગ્ભાગે ગણેશાદ્ દ્વારમુત્તમમ્ ।
દ્વિગુણં દક્ષિણાઙ્ગાત્તુ કિઞ્ચિન્ન્યૂનં બુધૈઃ પુરા ॥ ૪॥

ગણેશાદુત્તરે ભાગે પરં દ્વારં ચ સંસ્થિતમ્ ।
પશ્ચિમાત્ પાદહીનં તદધિકં કિઞ્ચિદગ્જસા ॥ ૫॥

એતાવાન્ ક્ષેત્રવિસ્તારઃ કથિતો દેવસત્તમાઃ ।
નવખણ્ડાદ્વિભિન્નં તુ ક્ષેત્રં ગાણેશ્વરં મતમ્ ॥ ૬॥

ક્ષેત્રાણિ પ્રલયેષુ શ્રેષ્ઠાનિ દૈવતસત્તમાઃ ।
પ્રગચ્છન્તિ લયં નૈવ રક્ષિતાનિ સ્વદૈવતૈઃ ॥ ૭॥

મહાપ્રલયવેલયાં તત્ત્વાનિ ત્રિગુણૈઃ સહ ।
લયં ગચ્છન્તિ વેગેન કાલસ્ય પરમાત્મનઃ ॥ ૮॥

તદા ક્ષેત્રાણિ સર્વાણિ સ્વસ્વદેવયુતાનિ ચ ।
લયં ગચ્છન્તિ દેવેશા નિશ્ચિતં યોગિભિઃ પુરા ॥ ૯॥

મહાપ્રલયકાલે તુ ગાણેશં ક્ષેત્રમીદૃશમ્ ।
નાશહીનં પ્રભાવેણ પરં તિષ્ઠતિ સર્વદા ॥ ૧૦॥

દેવેશા ઊચુઃ ।
ક્ષરં ક્ષેત્રમિદં વાક્યં કથિતં વેદવાદિભિઃ ।
કથં નાશવિહીનં તદ્વદ યોગીન્દ્રસત્તમ ॥ ૧૧॥

સ્વાનન્દઃ સર્વસંયોગે જાયતે નાઽત્ર સંશયઃ ।
ક્ષેત્રસ્યાખ્યા કથં પ્રાપ્તા સ્વાનન્દસ્ય વદ પ્રભો ॥ ૧૨॥

ભૃશુણ્ડ્યુવાચ ।
ક્ષેત્રં ગાણેશ્વરં શાસ્ત્રે સર્વમાન્યં ન વિદ્યતે ।
બ્રહ્મણસ્પતિક્ષેત્રત્વાત્ બ્રહ્મરૂપં ચ તત્ સ્મૃતમ્ ॥ ૧૩॥

યથા સ્વાનન્દરૂપશ્ચ સ્વસંવેદ્યાત્મકઃ સ્મૃતઃ ।
તથા સ્વાનન્દક્ષેત્રં તુ બ્રહ્માકારં પ્રકીર્તિતમ્ ॥ ૧૪॥

દેહઃ સગુણરૂપસ્તુ નિર્ગુણં તસ્ય મસ્તકમ્ ।

તયોર્યોગે યથા દેહસ્તથા ક્ષેત્રં પ્રકીર્તિતમ્ ॥ ૧૫॥

ભ્રાન્તિરૂપા સ્વયં સિદ્ધિર્દેહધાત્રી બભૂવ હ ।
ભ્રાન્તિધારકરૂપા ચ બુદ્ધિઃ ક્ષેત્રં તથા સ્મૃતમ્ ॥ ૧૬॥

સઙ્ગહીનતયા સર્વં સ્ત્રીપુમ્ભાવસુખં સ્મૃતમ્ ।
ગણેશસિદ્ધિબુદ્ધીનાં તથા ક્ષેત્રં પ્રકીર્તિતમ્ ॥ ૧૭॥

બહુનાઽત્ર કિમુક્તેન ગણેશસ્ય કિમપ્યહો ।
ક્ષેત્રાદિકં બ્રહ્મમયં પ્રાકૃતં નૈવ વિદ્યતે ॥ ૧૮॥

યત્કિઞ્ચિદ્ગણરાજસ્ય તત્તદ્બ્રહ્મપ્રવાચકમ્ ।
લોકાદિકં મુનીન્દ્રૈશ્ચ બ્રહ્મણસ્પતિરુચ્યતે ॥ ૧૯॥

ગણેશક્ષેત્રસમ્ભૂતાનિ ક્ષેત્રાણિ સમન્તતઃ ।
તત્રૈવ મરણે દેવાઃ ફલદાનિ ભવન્તિ ચ ॥ ૨૦॥

ધર્માર્થકામમોક્ષાણાં પ્રદાનિ કથિતાનિ તુ ।
ગાણેશં પઞ્ચમં બ્રહ્મ બ્રહ્મભૂતપદપ્રદમ્ ॥ ૨૧॥

તતો દ્વારસ્ય યાત્રાયાં ધર્માર્થકામમુક્તયઃ ।
સંસ્થિતાસ્તત્ર લભ્યન્તે યાત્રાકારિજનૈઃ પરાઃ ॥ ૨૨॥

ક્ષેત્રે મરણતો દેવાશ્ચતુર્ભિર્વર્જિતો ભવેત્ ।
નરઃ સદ્યસ્તુ સંસ્કારાદ્બ્રહ્મભૂતો ન સંશયઃ ॥ ૨૩॥

સુરાસુરમયં ક્ષેત્રં ગાણેશં બ્રહ્મવાચકમ્ ।
સાક્ષાત્ કૃતં શિવાદ્યૈશ્ચ ક્ષેત્રં દૈવં તતઃ સ્મૃતમ્ ॥ ૨૪॥

કમલમસ્તકસ્થત્વાત્ પશ્ચાદાસુરકં સ્મૃતમ્ ।
તયોર્યોગે સ્વસંવેદ્યં સર્વાદૌ તત્ પ્રકથ્યતે ॥ ૨૫॥

યદૈકદ્વારયાત્રાં યઃ કરોતિ ચ ચતુર્ષુ સઃ ।
(Page ખં. ૬ અ. ૧૧ પાન ૨૪)
આપ્નુયાત્તદ્ભવં સૌખ્યં માનવો યત્ર કુત્રગઃ ॥ ૨૬॥

યસ્માત્ કસ્માત્ સમાયાતઃ સકૃદ્યાત્રાં સમાચરેત્ ।
ક્ષેત્રસ્ય ચ ગણેશસ્ય દ્વારગાં સર્વમાપ્નુયાત્ ॥ ૨૭॥

યો નિત્યં દ્વારયાત્રાં સ ક્ષેત્રસંસ્થઃ સમાચરેત્ ।
વન્દ્યઃ ક્ષેત્રસ્થલોકાનામન્તે બ્રહ્મમયો ભવેત્ ॥ ૨૮॥

બ્રહ્માણ્ડે ન સમં કિઞ્ચિદ્ગણેશક્ષેત્રકેણ તુ ।
ચતુર્ભિર્વર્જિતં પ્રોક્તં પઞ્ચમં તચ્ચતુર્મયમ્ ॥ ૨૯॥

બુધૈર્ગણેશ્વરક્ષેત્રં ત્રિવિધં પરિકીર્તિતમ્ ।
બાહ્યાન્તરાદિભેદૈશ્ચ શ‍ૃણુત દેવનાયકાઃ ॥ ૩૦॥

ગર્ભાગારં ગણેશસ્ય વાસગં યોજનાર્ધકમ્ ।
બભુર્ગણપતેશ્ચૈવાવતારાસ્તત્ર સંસ્થિતાઃ ॥ ૩૧॥

ગાણેશા મુદ્ગલાદ્યા યે તત્ર તે સંસ્થિતા બભુઃ ।
સેવાર્થં ગણરાજસ્યાન્યે જના ભવનાગતાઃ ॥ ૩૨॥

તદેવ ચતુરસ્રં તુ ચતુર્દ્વારસુશોભિતમ્ ।
ભક્તેભ્યઃ સિદ્ધિદં પૂર્ણં મનોરથસુપૂરકમ્ ॥ ૩૩॥

ગણેશાત્ પૂર્વદિગ્ભાગે ધનુષાં ચ શતાનિ તુ ।
ષટ્કિઞ્ચિન્ન્યૂનમાનાનિ દ્વારં સર્વાર્થદં મતમ્ ॥ ૩૪॥

તત્ર બુદ્ધિઃ સ્થિતા સાક્ષાદ્વિદ્યાભિઃ સેવિતા સ્વયમ્ ।
કલાભિઃ પૂજયિત્વા તાં જ્ઞાનવાન્ પુરુષો ભવેત્ ॥ ૩૫॥

ગણેશાદ્દક્ષિણે ભાગે દ્વિગુણં દૂરગં ભવેત્ ।
પૂર્વદ્વારાદ્દક્ષિણગં દ્વારં ગર્ભાશ્રિતં મહત્ ॥ ૩૬॥

તત્ર પ્રમોદકાદ્યાશ્ચ ગણા બ્રહ્મસુખે રતાઃ ।
સંસ્થિતાઃ પૂજનેનૈવ ગાણપત્યપદપ્રદાઃ ॥ ૩૭॥

ગણેશાત્ પશ્ચિમે ભાગે દ્વારં ગર્ભગૃહસ્ય ચ ।
દ્વિગુણં દક્ષિણદ્વારાદ્ દૂરગં પરિકીર્તિતમ્ ॥ ૩૮॥

તત્ર સિદ્ધિઃ સ્વયં દેવાઃ સંસ્થિતા પૂજનેન તુ ।
નાના સિદ્ધિસમાયુક્તા નાના સિદ્ધિપ્રદાયિની ॥ ૩૯॥

પાદન્યૂનેન માનેન પશ્ચિમદ્વારતસ્તથા ।
ઉત્તરદ્વારમાખ્યાતં ગણેશસમ્મુખે બુધૈઃ ॥ ૪૦॥

તત્ર દેવ્યશ્ચતુઃષષ્ટિર્યોગિન્યઃ સંસ્થિતા બભુઃ ।
પરિવારયુતાઃ સર્વા યોગસિદ્ધાશ્ચ માતરઃ ॥ ૪૧॥

તાસાં પૂજનમાત્રેણ યોગં વિદ્યાત્ સ માનવઃ ।

અન્તર્ધાનાદિકં નાના કામદં નાત્ર સંશયઃ ॥ ૪૨॥

ગર્ભાગારસ્ય યાત્રાં યો નિત્યં કુર્યાન્નરોત્તમઃ ।
અથવા તુ ચતુર્થ્યાં વૈ સર્વકામાર્થસિદ્ધયે ॥ ૪૩॥

યાત્રાર્થં માનવો દેવાઃ સમાગતો ભવેદ્યદા ।
તદા કુર્યાદથો ભક્ત્યા યાત્રાં ગર્ભગૃહસ્ય ચ ॥ ૪૪॥

ગર્ભાગારાત્ પરં ક્ષેત્રં દેવાલયમિતિ શ્રુતમ્ ।
તત્ર દેવાદયઃ સન્તિ સ્વર્ગસ્થાઃ સેવનોત્સુકાઃ ॥ ૪૫॥

ત્રિયોજનપ્રમાણેન ચતુરસ્રં ચ તન્મતમ્ ।
દ્વારાણિ તસ્ય ચત્વારિ કથયામિ સમાસતઃ ॥ ૪૬॥

ગણેશાત્ પૂર્વદિગ્ભાગે કિઞ્ચિન્ન્યૂનાનિ દૂરતઃ ।
શતાનિ પૂર્વદ્વારં તુ ધનુષાં હિ ચતુર્દશ ॥ ૪૭॥

તત્ર ભૈરવરાજેન્દ્રો નગ્નઃ સર્વભયઙ્કરઃ ।
ત્રિશૂલી મુક્તકેશશ્ચાતિષ્ઠત્ સ્વતેજસાન્વિતઃ ॥ ૪૮॥

તસ્ય પૂજનમાત્રેણ વાઞ્છિતં લભતે નરાઃ ।
યાતનાં ન લભેત્ સોઽપિ નાનાકર્મસમુદ્ભવામ્ ॥ ૪૯॥

તસ્માદ્ દ્વિગુણમાનેન ગણેશાદ્ દૂરતઃ શિવઃ ।
નીલકણ્ઠશ્ચ દેવેશા દક્ષિણદ્વારપોઽભવત્ ॥ ૫૦॥

તસ્ય પૂજાં પ્રકુર્યાદ્યસ્તયા બન્ધનતો નરઃ ।
મુચ્યતે નાત્ર સન્દેહો વિષબાધાવિવર્જિતઃ ॥ ૫૧॥

(Page ખં. ૬ અ. ૧૨ પાન ૨૫)
પશ્ચિમે વિઘ્નરાજાત્તુ દક્ષિણાદ્ દ્વિગુણે સ્થિતઃ ।
દૂરે યઃ કૃત્તિવાસાઃ સ દ્વારદેવઃ પ્રકીર્તિતઃ ॥ ૫૨॥

તસ્ય પૂજનમાત્રેણાઽઽસુરં કર્મ વિનશ્યતિ ।
ઈપ્સિતં લભતે ચાપિ યાત્રામાત્રેણ માનવઃ ॥ ૫૩॥

ઉત્તરે ગણનાથાદ્વૈ પશ્ચિમાત્ પાદહીનતઃ ।
દ્વારાદ્ દ્વારં સ્થિતં દેવાસ્તત્ર ભીમેશ્વરઃ સ્થિતઃ ॥ ૫૪॥

તસ્ય યાત્રાં પ્રકુર્યાદ્યઃ સદ્યઃ સત્તાસમન્વિતઃ ।
ભવેત્ સ માનવશ્ચારોગ્યં લભેત નિરન્તરમ્ ॥ ૫૫॥

તૃતીયક્ષેત્રરૂપં તુ કથિતં વિસ્તરાન્ મયા ।
ચતુર્દ્વારયુતં પુણ્યં મયૂરં તન્મતં પરમ્ ॥ ૫૬॥

ક્ષેત્રાત્ સર્વત્ર દેવેશા યોજનં ચતુરસ્રગમ્ ।
દેવક્ષેત્રં સમાખ્યાતં ચતુર્વિધપદપ્રદમ્ ॥ ૫૭॥

ક્ષેત્રાત્ પૂર્વવિભાગસ્થો નરો ગચ્છેન્ મૃતઃ સ્વયમ્ ।
વિકુણ્ઠે નાત્ર સન્દેહસ્તત્ ક્ષેત્રં વૈષ્ણવં યતઃ ॥ ૫૮॥

દક્ષિણે ક્ષેત્રરૂપાત્તુ મૃતો યોજનમધ્યગઃ ।
સ કૈલાસે વસેન્નૂનં શૈવં ક્ષેત્રં યતઃ સ્મૃતમ્ ॥ ૫૯॥

મયૂરાત્ પશ્ચિમે ક્ષેત્રાદ્યોજનસ્થો મૃતો ભવેત્ ।
શક્તિલોકં વસેત્ સોઽપિ શાક્તં ક્ષેત્રં ચ તત્ સ્મૃતમ્ ॥ ૬૦॥

મયૂરાદુત્તરે દેવા યો મૃતો યોજનસ્થિતઃ ।
સ સૌરે સંવસેન્નિત્યં સૂર્યક્ષેત્રં યતઃ સ્મૃતમ્ ॥ ૬૧॥

એવં ક્ષેત્રસ્ય માહાત્મ્યં પ્રમાણસહિતં મયા ।
કથિતં શ્રવણાચ્ચૈવ પઠનાત્ પાપહારકમ્ ॥ ૬૨॥

તત્ર ગત્વા મહેશાના પૂજયેત ગજાનનમ્ ।
સ્થાપયિત્વાઽચલાં મૂર્તિં સિદ્ધિં પ્રાપ્સ્યથ નિશ્ચિતમ્ ॥ ૬૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે ક્ષેત્રપ્રમાણવર્ણનં નામ એકાદશોઽધ્યાયઃ ॥ ૬.૧૧

## ૬.૧૨ મયૂરક્ષેત્રવાસશુભાશુભવર્ણનં નામ દ્વાદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દેવા ઊચુઃ ।
પુરા કલ્પે મહાભાગ મયૂરે દ્વારસંશ્રિતામ્ ।
યાત્રાં કૃત્વા નરાઃ સિદ્ધિમલભંસ્તદ્વદસ્વ નઃ ॥ ૧॥

દેવભૂમૌ મૃતા યે વૈ તેષાં સિદ્ધિં વદસ્વ ચ ।
એકદ્વારાશ્રિતાં યાત્રાં કૃત્વા કે સિદ્ધિમાપ્નુયુઃ ॥ ૨॥

શ્રુત્વા કથાં મહારમ્યાં હર્ષશ્ચેતસિ વર્ધતે ।

સર્વજ્ઞોઽસિ ન સન્દેહ આદિમધ્યાન્તગસ્તથા ॥ ૩॥

ભૃશુણ્ડ્યુવાચ ।
પુરા જાતાં કથાં રમ્યાં શ્ૃણુધ્વં દેવસત્તમાઃ ।
સ્વગુરું મુદ્ગલં નત્વા કથયામિ સમાસતઃ ॥ ૪॥

દ્રાવિડે બ્રાહ્મણઃ કશ્ચિદ્વિદ્યાહીનો બભૂવ હ ।
તત્રૈવાન્ત્યજજાતિસ્થો નરો મૂઢસ્તથાઽભવત્ ॥ ૫॥

માતા પિતા તસ્ય હીનૌ તથા ત્યક્તૌ સુહૃજ્જનૈઃ ।
ત્યક્ત્વા સ્વદેશભૂમિં બભ્રમતુસ્તૌ મહીતલમ્ ॥ ૬॥

પ્રસઙ્ગાત્તુ જનાનાં તૌ મયૂરે દૈવયોગતઃ ।
સમાગતૌ જનૈર્યુક્તૌ તસ્થતુસ્તત્ર હર્ષતઃ ॥ ૭॥

સ્નાત્વા પ્રભાતકાલે તૌ શમીદૂર્વાદલં તથા ।
(Page  ખં. ૬ અ. ૧૨ પાન ૨૬)
ગૃહ્ય વિઘ્નેશપૂજાર્થં જગ્મતુઃ સ્નેહભાવતઃ ॥ ૮॥

અન્ત્યજેન સ્વકીયા ચ પ્રદત્તા બ્રાહ્મણાય તુ ।
પૂજા દૂર્વાદિસંયુક્તા ગણેશાર્થં સ્વધર્મતઃ ॥ ૯॥

બ્રાહ્મણો ગણરાજં તં પૂજયામાસ ભાવતઃ ।
વિધિમન્ત્રૈર્વિહીનસ્તુ જલપત્રાદિભિઃ પરમ્ ॥ ૧૦॥

તતસ્તૌ જનસઙ્ઘાતૈર્જગ્મતુર્દેવસત્તમાઃ ।
ગર્ભાગારદ્વારસંસ્થાં યાત્રાં ચક્રતુરાદરાત્ ॥ ૧૧॥

પૂર્વદ્વારે સમાગમ્ય બુદ્ધિં સમ્પૂજ્ય તં પુનઃ ।
ગણેશં પૂજયિત્વા તૌ તસ્થતુસ્તત્ર દેવપાઃ ॥ ૧૨॥

ઉપોષણસમાયુક્તૌ વિધાનેન બભૂવતુઃ ।
દ્વિતીયે દિવસે યાત્રાં ક્ષુધિતૌ તૌ ન ચક્રતુઃ ॥ ૧૩॥

યાત્રાં ત્યક્ત્વા ગતૌ હર્ષાત્ત્યક્ત્વા ક્ષેત્રં મહાદ્ભુતમ્ ।
અકસ્માત્ જ્ઞાનસંયુક્તૌ વિદ્યાયુક્તૌ બભૂવતુઃ ॥ ૧૪॥

જાતિસ્મરૌ વિશેષેણ વિચારં ચક્રતુઃ પરમ્ ।
અહો વર્ણયિતું ક્ષેત્રમાહાત્મ્યં ન પ્રશક્યતે ॥ ૧૫॥

એકદ્વારસ્ય યાત્રા તુ કૃતાઽઽવાભ્યાં તતઃ પરમ્ ।

જ્ઞાનં વિદ્યાયુતં પ્રાપ્તં સમ્પૂર્ણાં કિં સ્તુવઃ કૃતામ્ ॥ ૧૬॥

તતઃ સ્વનગરં ગત્વા સર્વમાન્યૌ બભૂવતુઃ ।
તેન સંસ્કારયોગેન ગણેશભજને રતૌ ॥ ૧૭॥

ભક્તેર્બલેન તૌ દેવા અન્તે સ્વાનન્દલોકગૌ ।
તત્ર વિઘ્નેશ્વરં દૃષ્ટ્વા બ્રહ્મભૂતૌ બભૂવતુઃ ॥ ૧૮॥

એવં નાના જના દ્વારસિદ્ધિં તત્ર પ્રલેભિરે ।
ન મયા વર્ણનં શક્યમન્યૈર્વર્ષશતૈરપિ ॥ ૧૯॥

અન્યદ્વારેષુ સર્વેષુ યથોક્તફલભોગિનઃ ।
ન સન્દેહો બભૂવુઃ કથયિતું નૈવ શક્યતે ॥ ૨૦॥

મયૂરે યે મૃતાઃ ક્ષેત્રે તેષાં સિદ્ધિં વદામ્યહમ્ ।
દેવમુખ્યાશ્ચ શ◌ૃણુત સર્વસન્તોષવર્ધિનીમ્ ॥ ૨૧॥

પુરા શૂદ્રઃ સમાયાતઃ કશ્ચિદ્દૈવવશેન તુ ।
કુષ્ઠરોગસમાયુક્તો મયૂરે ધૂમ્રનામકઃ ॥ ૨૨॥

તત્રોચ્છિષ્ટાદિકં ભુઞ્જન્ ભિક્ષાયાં નિરતોઽભવત્ ।
માસમધ્યે મૃતઃ સોઽપિ ભૃશં રોગેણ પીડિતઃ ॥ ૨૩॥

સ સ્વાનન્દં સમાશ્રિત્ય બ્રહ્મભૂતો બભૂવ હ ।
એવં નાના જનાઃ ક્ષેત્રે બ્રહ્મભૂતા મયૂરકે ॥ ૨૪॥

તેષાં ન શક્યતે વક્તું ચરિત્રં દેવસત્તમાઃ ।
યથોક્તફલભોક્તારો બભૂવુર્નાત્ર સંશયઃ ॥ ૨૫॥

તત્ર ક્ષેત્રસ્થિતા દેવા નરાઃ પાપપરાયણાઃ ।
મૃતા ક્ષેત્રે યદા તેષાં ભયં યમકૃતં ન હિ ॥ ૨૬॥

નગ્નભૈરવનામાઽસૌ કથિતઃ ક્ષેત્રપાલકઃ ।
દણ્ડધારક એવં તુ સદા માયૂરવાસિનામ્ ॥ ૨૭॥

તસ્યાધીનં સમગ્રં તુ ક્ષેત્રં વૈનાયકં પરમ્ ।
શુદ્ધં કૃત્વા નરં દણ્ડ્યં સ્વાનન્દે સ્થાપકોઽભવત્ ॥ ૨૮॥

દેવેશા ઊચુઃ ।
કોઽસૌ નગ્નસ્વરૂપેણ ભૈરવઃ સર્વભૈરવઃ ।
કીદૃશી યાતના વિપ્ર મયૂરે પાપકારિણામ્ ॥ ૨૯॥

ભૃશુણ્ડ્યુવાચ ।
માયાસઙ્ગવિહીનોઽયં સદા સાક્ષિવદુચ્યતે ।
તેન નગ્ન ઇતિ ખ્યાતો ગાણપત્યાગ્રણીઃ પરઃ ॥ ૩૦॥

યસ્માદ્ભીતાનિ તત્ત્વાનિ જગત્ સંવર્તયન્તિ તુ ।
બ્રહ્મા સૃષ્ટિકરો દેવા વિષ્ણુઃ પાતા ચ તદ્ભયાત્ ॥ ૩૧॥

હરઃ સંહારકારી ચ સૂર્યસ્તપતિ નિત્યદા ।
સમ્મોહધારિણી શક્તિઃ સદા ભવતિ તદ્ભયાત્ ॥ ૩૨॥

ઇત્યાદિ સકલં તસ્માદ્ભીતં સ્વસ્વપદે સ્થિતમ્ ।
સ્વસ્વકર્મકરં પ્રોક્તં તેન ભૈરવકઃ સ્મૃતઃ ॥ ૩૩॥

માયયા ગણરાજેન સૃષ્ટઃ સર્વાર્થદાયકઃ ।
(Page ખં. ૬ અ. ૧૨ પાન ૨૭)
ગાણેશાનાં ન સન્દેહ ઇતરેષાં ભયઙ્કરઃ ॥ ૩૪॥

ગર્ભાગારં ગણેશસ્ય રહસ્યં રૂપમુચ્યતે ।
અતસ્તત્રૈવ દેવેશાઃ સ્થાતવ્યં યત્નતઃ સદા ॥ ૩૫॥

તત્ર પૂજાદિકં કાર્યં સત્કર્માદિકમુત્તમમ્ ।
ન તત્રાનૃતકામાદિકર્તવ્યં માનવેન ચ ॥ ૩૬॥

ન ચ મૂત્રમલત્યાગઃ કર્તવ્યસ્તત્ર દેવપાઃ ।
સદા ગાણેશભાવેન સ્થાતવ્યં માનવૈઃ સદા ॥ ૩૭॥

ક્ષેત્રે પુણ્યં યથા પ્રોક્તમધિકં હ્યન્યદેશતઃ ।
તથા તત્ર કૃતં પાપમધિકં ભવતીત્યહો ॥ ૩૮॥

અતઃ ક્ષેત્રેષુ પાપાનિ નાચરેત્તુ નરોત્તમઃ ।
યથાશાસ્ત્રં વિધાનેન પુણ્યં તેષુ સમાચરેત્ ॥ ૩૯॥

અન્યક્ષેત્રેષુ પાપં યત્ કૃતં નશ્યતિ તત્ક્ષણાત્ ।
ક્ષેત્રેષુ પઞ્ચદેવાનાં બ્રહ્માદિપદગેષુ વૈ ॥ ૪૦॥

નરૈસ્તેષુ કૃતં પાપં મયૂરે નશ્યતિ ક્ષણાત્ ।
મયૂરે યત્ કૃતં પાપં વજ્રલેપં તુ તત્ સ્મૃતમ્ ॥ ૪૧॥

વિધિં તત્ર પ્રવક્ષ્યામિ શ◌ૃણુત દેવસત્તમાઃ ।

યેન સંશયહીનાશ્ચ ભવિષ્યથ વિચારતઃ ॥ ૪૨॥

મયૂરે યત્ કૃતં પાપં દેવાલયે વિનશ્યતિ ।
દેવાલયે કૃતં ચૈતદ્ગર્ભાગારે લયં વ્રજેત્ ॥ ૪૩॥

ગર્ભાગારે કૃતં પાપં દ્વારયાત્રાબલેન ચ ।
નશ્યત્યત્ર ન સન્દેહઃ પ્રદક્ષિણવિધાનતઃ ॥ ૪૪॥

દ્વારયાત્રાકૃતં પાપં વજ્રલેપમયં ભવેત્ ।
તદેવ યાતનાં દત્ત્વા નરસ્ય નાશમેષ્યતિ ॥ ૪૫॥

યદા જન્માદિ પ્રારભ્ય મરણાન્તં સમાચરેત્ ।
પાપં મયૂરક્ષેત્રે સ યાતનાં પ્રલભેન્નરઃ ॥ ૪૬॥

દશવર્ષસહસ્રાણિ નગ્નભૈરવનાયકઃ ।
ભૈરવીં યાતનાં દત્ત્વા શુદ્ધં કરોતિ માનવમ્ ॥ ૪૭॥

યાતના ત્રિવિધા તસ્ય ભૈરવસ્ય મહાત્મનઃ ।
કથયામિ સમાસેન તાં શ◌ૃણુધ્વં મહેશ્વરાઃ ॥ ૪૮॥

અગ્નિકુણ્ડાદિકં તત્ર સંસ્થિતં ભૈરવસ્થલે ।
યામ્યાલ્લક્ષાધિકં પ્રોક્તમુગ્રં વક્તું ન શક્યતે ॥ ૪૯॥

આદાવેવ સ તાં દત્ત્વા પશ્ચાદ યમસમાં પ્રભુઃ ।
દદાતિ યાતનાં ઘોરાં ભૈરવો ભયદાયકઃ ॥ ૫૦॥

તતો ભૂતપિશાચાદિ સમ્ભૂતાં પ્રદદાતિ સઃ ।
તતઃ શુદ્ધં નરં કૃત્વા સ્વાનન્દે સ્થાપયિષ્યતિ ॥ ૫૧॥

ચત્વારિંશત્સહસ્રાણિ ભૈરવીં યાતનાં સ્વયમ્ ।
દદાતિ તુ તતો યામ્યાં ત્રીણિ સાહસ્રકાણિ હિ ॥ ૫૨॥

તતસ્ત્રીણિ સહસ્રાણિ પૈશાચીયોનિસમ્ભવામ્ ।
દદાતિ ક્રોધસંયુક્તો નગ્નઃ શૂલધરઃ પ્રભુઃ ॥ ૫૩॥

એવં સર્વં સમાખ્યાતં યાતનાજં મહદ્ભયમ્ ।
યથા મયૂરક્ષેત્રસ્થો નરો વિન્દ્યાન્ મૃતઃ પરમ્ ॥ ૫૪॥

પાપરૂપા નરા યે વૈ ગાણેશે સંસ્થિતાઃ ખલાઃ ।
તાન્ સ્વયં ભૈરવાધીશો બહિઃ કુર્યાદ્ભયપ્રદઃ ॥ ૫૫॥

પુણ્યશીલાન્ હૃદિસ્થશ્ચ સમાનાય્ય મહેશ્વરાઃ ।
ભૈરવઃ ક્ષેત્રગાન્ કૃત્વા રક્ષેદ્વૈ નિત્યમાદરાત્ ॥ ૫૬॥

મયૂરક્ષેત્રસંસ્થા યે ક્ષેત્રસંન્યાસધારકાઃ ।
ન તેષાં દુઃખલેશશ્ચ ભવેદ્દેવેન્દ્રસત્તમાઃ ॥ ૫૭॥

લક્ષ્મ્યા નારાયણસ્તાન્ વૈ ધર્મયુક્તાન્ કરોતિ સઃ ।
પાર્વત્યા શઙ્કરસ્તદ્વન્નાનાર્થાન્ સન્દદાતિ વૈ ॥ ૫૮॥

રત્યા કામઃ સ્વયં તેભ્યો નાના કામાન્ દદાતિ હિ ।
ભૂમ્યા વરાહકશ્ચૈવ જ્ઞાનં દદાતિ શાશ્વતમ્ ॥ ૫૯॥

અતઃ સર્વં પરિત્યજ્ય મયૂરં તત્ સમાશ્રયેત્ ।
સુહૃદ્ભિસ્તં તુ દેવેશા બ્રહ્મભૂતં વદન્તિ હિ ॥ ૬૦॥

નાનાયોનિગતો જન્તુસ્તત્ર સ્ત્રીપુત્રસંયુતઃ ।
દેહપોષણસક્તશ્ચ બભૂવે દેવસત્તમાઃ ॥ ૬૧॥

નરદેહં સમાશ્રિત્ય ગાણેશક્ષેત્રગો યદિ ।
ન ભવેત્ સ સદા જ્ઞેયો રાસભૈસ્તુલ્યભાવગઃ ॥ ૬૨॥

પઞ્ચમં બ્રહ્મરૂપં યત્તદેવ ભૂમિગં મતમ્ ।
ક્ષેત્રરૂપેણ તદ્ધે વૈ ન સેવન્તે સમાઃ પશોઃ ॥ ૬૩॥

સ્વર્ગેષુ દેવમુખ્યાશ્ચેચ્છન્તિ માનવદેહકમ્ ।
ગત્વા મયૂરક્ષેત્રે તુ મરિષ્યામઃ સુભાગ્યતઃ ॥ ૬૪॥

તત્રૈવ મરણે બ્રહ્મ પ્રાપ્યતે પઞ્ચમં પરમ્ ।
ધર્માર્થકામમોક્ષાસ્તુ યદિચ્છન્તિ પરાત્પરમ્ ॥ ૬૫॥

કાશ્યાદિક્ષેત્રમુખ્યેષુ યત્કૃતં સુકૃતં નરૈઃ ।
તેન સંસ્કારયોગેન મયૂરં લભ્યતે પરમ્ ॥ ૬૬॥

ઇતિ સર્વં સમાખ્યાતં વાસરૂપં વિશેષતઃ ।
પઠનાચ્છ્રવણાન્નિત્યં ક્ષેત્રવાસફલપ્રદમ્ ॥ ૬૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે મયૂરક્ષેત્રવાસશુભાશુભવર્ણનં નામ દ્વાદશોઽધ્યાયઃ ॥ ૬.૧૨

## ૬.૧૩ મયૂરેશનામદણ્ડકારણ્યવરપ્રદાનવર્ણનં નામ ત્રયોદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દેવા ઊચુઃ ।
કથં ગણેશક્ષેત્રસ્ય નામ જાતં મયૂરકમ્ ।
એતત્ કૌતૂહલં બ્રૂહિ ભૃશુણ્ડિન્ પરમાર્થદ ॥ ૧॥

ભૃશુણ્ડ્યુવાચ ।
પુરા કલ્પે મહેશાના ભવદ્ભિસ્તત્ર વિઘ્નપઃ ।
આરાધિતઃ સ વૈ સાક્ષાદ્વરદસ્તાન્ સમાયયૌ ॥ ૨॥

મયૂરવાહનો ભૂત્વા દશહસ્તો દશાયુધઃ ।
લમ્બોદરો ગજમુખઃ પ્રસન્નાત્મા મહેશ્વરઃ ॥ ૩॥

ઉવાચ તાન્ વૃણુધ્વં મે વરાંશ્ચ મનસીપ્સિતાન્ ।
દાસ્યામિ તપસા તુષ્ટો ભક્ત્યા સ્તોત્રાદિના પરાન્ ॥ ૪॥

તૈર્માનસેપ્સિતં સર્વં વૃત્તં તસ્માદ્ગજાનનાત્ ।
પુનસ્તં તે ગણાધ્યક્ષમૂચુઃ પ્રાઞ્જલયોઽમરાઃ ॥ ૫॥

મૂષકો વાહનં તેઽભૂન્ મયૂરધ્વજ ચાધુના ।
મયૂરારૂઢ એવ ત્વમાગતોઽસિ ગજાનન ॥ ૬॥

અસ્મિન્ ક્ષેત્રે મયૂરસ્થો દૃષ્ટસ્ત્વં ગણનાયક ।
અતો મયૂરજન્માખ્યં ક્ષેત્રં જાતં ત્વયા કૃતમ્ ॥ ૭॥

અદ્ય પ્રભૃતિરેતત્તુ ક્ષેત્રં માયૂરનામકમ્ ।
ભવેત્તત્ સર્વવિખ્યાતં ત્વત્પ્રસાદાદ્ગજાનન ॥ ૮॥

મયૂરક્ષેત્રનાથસ્ત્વં મયૂરેશો ભવ પ્રભો ।
નામ્ના સર્વત્ર વિખ્યાતો ભક્તાનુગ્રહકારકઃ ॥ ૯॥

તથેતિ તાનુવાચાથ ગણેશોંઽતર્દધે સ્વયમ્ ।
દેવેશા અભવન્નત્વા સ્વસ્વકાર્યપરાયણાઃ ॥ ૧૦॥

એતદ્વઃ સર્વમાખ્યાતં કારણં નામધારણે ।
ક્ષેત્રસ્ય ક્ષેત્રનાથસ્યાન્યચ્છૃણુધ્વં મહેશ્વરાઃ ॥ ૧૧॥

ચિત્રાકારા મહામાયા હ્યનન્તખેલકારિણી ।
મયૂરા સા સમાખ્યાતા મયૂરેશસ્તુ તત્પતિઃ ॥ ૧૨॥

ચતુર્બ્રહ્મમયં ક્ષેત્રં માયારૂપં મયૂરકમ્ ।
વિહારતસ્તત્ર દેવા મયૂરેશઃ પ્રકીર્તિતઃ ॥ ૧૩॥

(Page ખં. ૬ અ. ૧૩ પાન ૨૯)
દેવેશા ઊચુઃ ।
ચતુર્ભુજો ગણાધ્યક્ષો મયૂરે સંસ્થિતોઽભવત્ ।
કથં દશભુજઃ સોઽપિ બભૂવ વદ યોગિપ ॥ ૧૪॥

ભૃશુણ્ડ્યુવાચ ।
ભૂસ્વાનન્દમયં ક્ષેત્રમેકં સર્વાદિસમ્મતમ્ ।
ગાણેશં તત્ર દેવેશા ન ચિત્રં કિઞ્ચિદગ્જસા ॥ ૧૫॥

એકાક્ષરભવં ધ્યાનં પ્રથમં પરિકીર્તિતમ્ ।
સર્વાદૌ તત્ સુવિખ્યાતં ક્ષેત્રસંસ્થં બભૂવ હ ॥ ૧૬॥

સપ્તકોટ્યો મહામન્ત્રા ગણેશસ્ય મહાત્મનઃ ।
સર્વે મયૂરક્ષેત્રે તે કલ્પભેદે સ્થિતા બભુઃ ॥ ૧૭॥

અનન્તરૂપધારી સ હિતાય ગણપોઽભવત્ ।
લોકાનાં તાનિ સર્વાણિ મયૂરે સમ્ભવન્તિ હિ ॥ ૧૮॥

મયૂરક્ષેત્રગશ્ચૈવ ગણેશો ભક્તકારણાત્ ।
નાનાક્ષેત્રસ્ય ભાવેન તિષ્ઠતિ કલયાઽમરઃ ॥ ૧૯॥

અતઃ સર્વાણિ રૂપાણિ ગાણેશાનિ વિશેષતઃ ।
માયૂરે સંસ્થિતાન્યેવ મૂલભૂતે મહેશ્વરાઃ ॥ ૨૦॥

શક્તિરુવાચ ।
ભૃશુણ્ડિવચનં શ્રુત્વા હર્ષયુક્તાઃ સુરેશ્વરાઃ ।
ઊચુસ્તં પ્રણિપત્યાદૌ ભક્તિનમ્રાત્મકન્ધરાઃ ॥ ૨૧॥

બ્રહ્માદ્યા ઊચુઃ ।
દણ્ડકારણ્યદેશે તુ ગણેશસ્ય મહાત્મનઃ ।
ક્ષેત્રં મુખ્યં કથં જાતં તન્નો વદ મહામુને ॥ ૨૨॥

ભૃશુણ્ડ્યુવાચ ।
સ્વસ્વકર્મકૃતં દેવાસ્તસ્ય દણ્ડઃ પ્રકીર્તિતઃ ।
શુભાશુભમયઃ શાસ્ત્રે નરૈર્ભોક્તવ્ય એવ ચ ॥ ૨૩॥

દણ્ડાનાં નાશકં પૂર્ણં તેનારણ્યં પ્રકીર્તિતમ્ ।
શૂન્યવત્ સર્વશાસ્ત્રેષ્વરણ્યં તત્કથ્યતે બુધૈઃ ॥ ૨૪॥

બ્રહ્મભૂયપદં પૂર્ણં પરં ચાદણ્ડવાચકમ્ ।
દણ્ડકારણ્યકં તેન નામ તસ્ય વિશેષતઃ ॥ ૨૫॥

દણ્ડકારણ્યગે દેવો બ્રહ્મભૂતમયઃ પરઃ ।
ગણેશો વેદવાદેષ્વદણ્ડિનાં સ હિતાવહઃ ॥ ૨૬॥

અદણ્ડિનશ્ચ યોગીન્દ્રાઃ કથિતાઃ શુકમુખ્યકાઃ ।
યોગેશો બ્રહ્મણાં નાથો ગણેશસ્તત્ર રાજતિ ॥ ૨૭॥

ઇતિહાસં પ્રવક્ષ્યામિ પુરા વૃત્તં સુરેશ્વરાઃ ।
સૃષ્ટાન્યરણ્યમુખ્યાનિ બ્રહ્મણા કાર્યસિદ્ધયે ॥ ૨૮॥

દણ્ડકારણ્યકં તેષુ ગણેશં લાલસં સદા ।
ઉવાચ વેધસં નત્વા કૃત્વા કરપુટં પુરા ॥ ૨૯॥

દણ્ડકારણ્યમુવાચ ।
બ્રહ્મભૂયપ્રદં દેવં ભજિષ્યામિ પિતામહ ।
તદર્થં મન્ત્રરાજં મે દેહિ સર્વજ્ઞ મુખ્યક ॥ ૩૦॥

બ્રહ્મોવાચ ।
ગણેશં ભજ ભાવેન બ્રહ્મભૂતઃ સ વૈ સ્મૃતઃ ।
સમૂહાનાં પ્રભુઃ પૂર્ણઃ સમૂહા બ્રહ્મવાચકાઃ ॥ ૩૧॥

સ્વાનન્દનગરં યસ્ય સિદ્ધિર્બુદ્ધિઃ પ્રિયે પરે ।
લક્ષલાભૌ સુતૌ પ્રોક્તૌ વાહનં મૂષકઃ પરઃ ॥ ૩૨॥

ગજાનનમયો યસ્ય દેહશ્ચ નરરૂપધૃક્ ।
સર્વં બ્રહ્મમયં તેન બ્રહ્મણસ્પતિરુચ્યતે ॥ ૩૩॥

એવમુક્ત્વા દદૌ તસ્મૈ મન્ત્રમેકાક્ષરં પરમ્ ।
તં નમસ્કૃત્ય તચ્ચૈવ જગામ તપસે સ્વયમ્ ॥ ૩૪॥

દિવ્યવર્ષસહસ્રેણ જ્ઞાનં ગાણેશકં પરમ્ ।
લબ્ધ્વાઽરણ્યં મહાદેવસ્તતો ભક્તિં ચકાર હ ॥ ૩૫॥

તદ્યયૌ ગણરાજસ્તુ પ્રસન્નો ભક્તવત્સલઃ ।

જગાદ વૃણુ તે ચિત્તે સ્થિતં વરમરણ્યક ॥ ૩૬॥

તં દૃષ્ટ્વા દણ્ડકારણ્યં સમુત્થાય નનામ તુ ।
પૂજ્યં સ્તોતું ગણાધીશં ચક્રમે તત્કૃતાઞ્જલિઃ ॥ ૩૭॥

દણ્ડકારણ્યમુવાચ ।
નમસ્તે ગજવક્ત્રાય ગણેશાય મહોદર ।
બ્રહ્મણે બ્રહ્મપાલાય વિઘ્નેશાય નમો નમઃ ॥ ૩૮॥

હેરમ્બાય ચતુર્બાહુધરાય કઞ્જપાણયે ।
(Page ખં. ૬ અ. ૧૩ પાન ૩૦)
પાશાઙ્કુશધરાયૈવ પરેશાય નમો નમઃ ॥ ૩૯॥

અનાદયે ચ સર્વેષામાદિરૂપાય તે નમઃ ।
જ્યેષ્ઠાનાં જ્યેષ્ઠરૂપાય જ્યેષ્ઠાય વૈ નમો નમઃ ॥ ૪૦॥

સ્વાનન્દવાસિને તુભ્યં સિદ્ધિબુદ્ધિવરાય ચ ।
સિદ્ધિબુદ્ધિપ્રદાત્રે તે મૂષકધ્વજિને નમઃ ॥ ૪૧॥

મૂષકોપરિસંસ્થાય ગણેશાય પરાત્મને ।
નાનામાયાપ્રચાલાય મયૂરેશાય તે નમઃ ॥ ૪૨॥

નાયકાનાં વિશેષેણ નાયકાય વિનાયક ।
નાયકૈર્વર્જિતાયૈવ નાયકત્વપ્રદાયિને ॥ ૪૩॥

વિઘ્નેશાય મહાવિઘ્નધારિણે સર્વદાયિને ।
પદદાત્રે તથા હન્ત્રે વિઘ્નેશૈસ્તે નમો નમઃ ॥ ૪૪॥

અમેયશક્તયે તુભ્યં સર્વપૂજ્યાય તે નમઃ ।
કિં સ્તૌમિ ત્વાં ગણાધીશ યોગાકારસ્વરૂપિણમ્ ॥ ૪૫॥

અધુના વરદોઽસિ ત્વં તદા મે નામ સાર્થકમ્ ।
કુરુ નિત્યં વસ સ્વામિન્ મમ દેહે ગજાનન ॥ ૪૬॥

ભક્તિં દેહિ ત્વદીયાં મે સદા બ્રહ્મપ્રકાશિનીમ્ ।
તેનાઽહં કૃતકૃત્યશ્ચ ભવિષ્યામિ ગજાનન ॥ ૪૭॥

એવમુક્ત્વા ગણેશાનં પ્રણનામ કૃતાઞ્જલિઃ ।
ભક્તિભાવસમાયુક્તં તઞ્જગાદ ગજાનનઃ ॥ ૪૮॥

શ્રીગજાનન ઉવાચ ।

ત્વયા કૃતમિદં સ્તોત્રં મદીયં સર્વસિદ્ધિદમ્ ।
ભવિષ્યતિ મહારણ્ય ભુક્તિમુક્તિપ્રદં પરમ્ ॥ ૪૯॥

ત્વયોક્તં સફલં સર્વં ભવિષ્યતિ સદા પ્રિયમ્ ।
મામેવ સર્વભાવેન ભજિષ્યસિ ન સંશયઃ ॥ ૫૦॥

નાનાવતારવાંશ્ચૈવ ત્વદ્દેહસ્થોઽહમઞ્જસા ।
ભવિષ્યામિ ગણેશોક્ત્વાંઽતર્દધે દેવસત્તમાઃ ॥ ૫૧॥

અતો ગણેશક્ષેત્રં તુ દણ્ડકારણ્યમુત્તમમ્ ।
સકલં તત્ર સેવાર્થં દેવાસ્તસ્ય સમાયયુઃ ॥ ૫૨॥

તેષાં ક્ષેત્રાણિ દેવેશા દણ્ડકારણ્યગાનિ તુ ।
તેષુ સ્થિતા વિશેષેણ ભજન્તે ગણનાયકમ્ ॥ ૫૩॥

સર્વેષ્વરણ્યદેશેષુ ગણેશઃ પ્રતિતિષ્ઠતિ ।
દણ્ડકારણ્યમધ્યે સ વિશેષેણાવતારકૃત્ ॥ ૫૪॥

દણ્ડકારણ્યકં સર્વં ગણેશક્ષેત્રમુચ્યતે ।
મયૂરક્ષેત્રં તન્મધ્યે ભિન્નં સ્વાનન્દવાચકમ્ ॥ ૫૫॥

બ્રહ્માદ્યા ઊચુઃ ।
ધન્યોઽસિ યોગિનાં મધ્યે સર્વસંશયનાશકઃ ।
શ્રુત્વા ત્વદ્વદનામ્ભોજાન્ન તૃપ્યામઃ કથામૃતમ્ ॥ ૫૬॥

અધુના કૃપયા વિપ્ર દ્વારયાત્રાં વિધાનતઃ ।
વદ ક્ષેત્રસ્ય ત્રિવિધામિતિહાસયુતાં પ્રભો ॥ ૫૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે મયૂરેશનામદણ્ડકારણ્યવરપ્રદાનવર્ણનં નામ ત્રયોદશોઽધ્યાયઃ ॥ ૬.૧૩
(Page ખં. ૬ અ. ૧૪ પાન ૩૧)

## ૬.૧૪ દ્વારયાત્રાવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ભૃશુણ્ડ્યુવાચ ।
પુરાકલ્પભવાં સર્વાં કથયામિ કથાં પરામ્ ।
સઙ્ક્ષેપેણ મહાભાગાઃ શૃણુધ્વં ભક્તિસંયુતાઃ ॥ ૧॥

કાચિદ્વિપ્રસ્ય ભાર્યા તુ પીડિતા દુર્જનૈઃ પુરા ।
સા સતીભાવરક્ષાર્થં યત્નયુક્તા બભૂવ હ ॥ ૨॥

વને પતિવિહીના સા તાનુવાચ મહાખલાન્ ।
અદ્ય પ્રારભ્ય વશ્યાહ્નિ પઞ્ચમે સ્ત્રી ભવામ્યહમ્ ॥ ૩॥

સત્યં વાક્યં ન સન્દેહો ગચ્છધ્વં વનવાસિનઃ ।
એવમુક્ત્વા ગતાશ્ચૌરા હર્ષિતાઃ સ્વગૃહં તતઃ ॥ ૪॥

સા વને શોકસંયુક્તા વિચારમકરોત્તદા ।
યજ્ઞાર્થં યજમાનસ્ય ભર્તા મે સઙ્ગતોઽભવત્ ॥ ૫॥

કરોમિ કિં સમીપસ્થં ગચ્છામિ ચ મયૂરકમ્ ।
તત્ર ધર્મસ્ય સંસ્થાનં વર્તતે નાત્ર સંશયઃ ॥ ૬॥

યાત્રામાત્રેણ તત્રૈવ સ્વસ્વધર્મઃ પ્રલભ્યતે ।
એવં વિચાર્ય સા દેવી મયૂરેશં જગામ હ ॥ ૭॥

સ્નાત્વા ગણેશતીર્થે સા સમ્પૂજ્ય ગણનાયકમ્ ।
પૂર્વદ્વારસ્થિતાં શક્તિં સર્વયુક્તાં પુપૂજ હ ॥ ૮॥

પુનશ્ચૈવ મયૂરેશં પૂજયિત્વા વિધાનતઃ ।
સત્યસમ્પાલનાર્થાય સ્વગૃહં તત્ક્ષણાદ્યયૌ ॥ ૯॥

તતસ્તે વનગા દુષ્ટાસ્તાં યયૌ પઞ્ચમેઽહનિ ।
સા સસ્માર ગણેશાનં ધર્મશક્તિયુતં પરમ્ ॥ ૧૦॥

તસ્યાઃ સ્મરણમાત્રેણાગ્નિસ્તાન્ સર્વાન્ દદાહ ચ ।
સા વિસ્મિતા ગણેશાનમમન્યત વિશેષતઃ ॥ ૧૧॥

મૃતા સા ધર્મશક્તિસ્થં ગણેશં ચિન્ત્ય માનદા ।
વિકુણ્ઠમગમત્ સા વૈ વિષ્ણુના માનિતા ભૃશમ્ ॥ ૧૨॥

પુનઃ કલ્પે મયૂરે સા પતિયુક્તા બભૂવ હ ।
બ્રાહ્મણી તં પુનર્ભક્ત્યા સિષેવે ધર્મતત્પરા ॥ ૧૩॥

અન્તે સ્વાનન્દગા ચૈવ બભૂવે દેવનાયિકા ।
બ્રહ્મભૂતા મહાભક્ત્યા પત્યા યુક્તા મહાદ્ભુતમ્ ॥ ૧૪॥

એવં નાના જનાસ્તત્ર નાના વર્ણસમુદ્ભવાઃ ।
નરા નાર્યશ્ચ દેવેશા મહાસિદ્ધિં પ્રલેભિરે ॥ ૧૫॥

અન્યચ્ચ દક્ષિણદ્વારસંસ્થાં શ ृણુત ચાદરાત્ ।
યેન સંશયહીનાશ્ચ ભવિષ્યથ વિશેષતઃ ॥ ૧૬॥

મદ્રદેશમહીપાલઃ શાસ્ત્રજ્ઞો બલસંયુતઃ ।
બભૂવ સર્વનીતિજ્ઞઃ પ્રજાપાલનલાલસઃ ॥ ૧૭॥

કદા સામન્તકૈઃ સર્વૈઃ પીડિતોઽતિતરાં નૃપઃ ।
ન સમર્થો બભૂવૈવ તેષાં નિગ્રહણે બલાત્ ॥ ૧૮॥

તતોઽતિશોકસંયુક્તો રાજ્યં ત્યક્ત્વા મહામતિઃ ।
જગામ મુનિશાર્દૂલં શૌનકં કર્મસિદ્ધયે ॥ ૧૯॥

જ્ઞાત્વા વૃત્તાન્તમેવં તુ તસ્ય રાજ્ઞશ્ચ શૌનકઃ ।
જગાદ ગચ્છ રાજેન્દ્ર મયૂરેશં સુસિદ્ધિદમ્ ॥ ૨૦॥

તત્ર દક્ષિણભાગે તુ દ્વારમર્થાત્મકં પરમ્ ।
યાત્રામાત્રેણ સર્વાર્થદાયકં તત્ સમાચર ॥ ૨૧॥

પ્રણમ્ય ભદ્રસેનસ્તં મયૂરેશં સમાગતઃ ।
દક્ષિણદ્વારગાં યાત્રાં ચકાર ભક્તિસંયુતઃ ॥ ૨૨॥

પુનઃ સ્વનગરં ગત્વા સ્મૃત્વા વિઘ્નેશ્વરં નૃપઃ ।
જિત્વા સર્વાન્ ભદ્રસેનઃ શત્રૂન્ રાજ્યં ચકાર હ ॥ ૨૩॥

એવં યાત્રાવિધાનેન સમર્થો જાયતે નરઃ ।
સ્વસ્વજાતિભવં દેવા અર્થં વિન્દતિ નિશ્ચિતમ્ ॥ ૨૪॥

તતઃ સોઽપિ ગણેશાનં દક્ષિણદ્વારગં સદા ।
ભુઞ્જાનો ભોગમભજન્ મૃતઃ કૈલાસગોઽભવત્ ॥ ૨૫॥

(Page ખં. ૬ અ. ૧૪ પાન ૩૨)
પુનર્વૈશ્યોઽભવત્ સોઽપિ મયૂરે દેવસત્તમાઃ ।
નિત્યં ગણેશ્વરં દેવેમભજદ્ભક્તિસંયુતઃ ॥ ૨૬॥

અન્તે સ્વાનન્દગો ભૂત્વા ક્ષેત્રે મરણતઃ સ્વયમ્ ।
બ્રહ્મભૂતઃ સ વૈશ્યોઽપિ નામ્ના મેઘો બભૂવ હ ॥ ૨૭॥

એવં નાના જના દેવા અર્થયુક્તા બભૂવિરે ।
તત્રૈવં કતિ વો બ્રૂયાં શક્યતે ન મયા ક્વચિત્ ॥ ૨૮॥

અધુના પશ્ચિમદ્વારસમ્ભૂતં કથયામ્યહમ્ ।
ચરિત્રં સર્વભાવજ્ઞાઃ શ‍ૃણુધ્વં પરમાર્થદમ્ ॥ ૨૯॥

ભારકે નગરે રોગાદિભિર્વૈશ્યઃ પ્રપીડિતઃ ।
દરિદ્રો ભોગહીનશ્ચ સામો નામ્ના બભૂવ હ ॥ ૩૦॥

તેન સ્કન્દપુરાણસ્થં માહાત્મ્યં સંશ્રુતં કદા ।
સ્વાનન્દક્ષેત્રજં તેન વિસ્મિતઃ પ્રબભૂવ હ ॥ ૩૧॥

દેવાઃ સમાગતો યાત્રાર્થં મયૂરે પુરા સ વૈ ।
યથાશાસ્ત્રં વિધાનેન તીર્થદેવં પુપૂજ હ ॥ ૩૨॥

અતીવ પીડિતઃ સોઽપિ રોગૈસ્તેન ચકાર હ ।
દારિદ્ર્યેણ તથા યાત્રાં પશ્ચિમદ્વારસંસ્થિતામ્ ॥ ૩૩॥

તતો રોગવિનિર્મુક્તો બભૂવે હર્ષસંયુતઃ ।
સ્વગૃહં પુનરાગત્ય વૈશ્યવૃત્તિં ચકાર હ ॥ ૩૪॥

ધનાઢ્યઃ સ બભૂવાઽપિ સર્વમાન્યઃ સુરેશ્વરાઃ ।
પશ્ચિમદ્વારસંયુક્તમભજદ્ગણનાયકમ્ ॥ ૩૫॥

સ્વગૃહે ભોગસંયુક્તો બુભુજે વિવિધાન્ રસાન્ ।
અન્તે જગામ શક્તેઃ સ લોકં પરમસૌખ્યદમ્ ॥ ૩૬॥

પુનઃ ક્ષેત્રે બભૂવાઽપિ બ્રાહ્મણો વેદપારગઃ ।
મયૂરે ગણનાથં સ શિવશર્માઽભજત્પરમ્ ॥ ૩૭॥

ક્ષેત્રસંન્યાસભાવેન મયૂરેશં સમાશ્રિતઃ ।
અન્તે સ્વાનન્દગો ભૂત્વા બ્રહ્મભૂતો બભૂવ હ ॥ ૩૮॥

અથોત્તરભવાં યાત્રાં શ‍ૃણુધ્વં દેવસત્તમાઃ ।
કર્ણાટે શૂદ્રજાતિસ્થો બભૂવે ભીમનામકઃ ॥ ૩૯॥

કદા શ્રુત્વા પુરાણં સ ખેદયુક્તો બભૂવ હ ।
વ્યર્થં માયામયં સર્વં તત્ત્યજામ્યહમાદરાત્ ॥ ૪૦॥

મુક્તિઃ સમ્પૂર્ણભાવેન લભ્યતે કેન કર્મણા ।
તદેવ સાધનીયં વૈ મયા માનવદેહિના ॥ ૪૧॥

તતો બભ્રામાતિખેદસંયુક્તો યત્ર તત્ર હ ।
વને દદર્શ શૂદ્રઃ સ વિશ્વામિત્રં તપોધનમ્ ॥ ૪૨॥

તં પ્રણમ્ય સ્થિતસ્તત્ર બભૌ તેનાઽપિ સત્કૃતઃ ।
પપ્રચ્છ મુક્તિદં માર્ગં તં જગાદ સ હર્ષિતઃ ॥ ૪૩॥

વિશ્વામિત્ર ઉવાચ ।
મહાશ્રમયુતૈશ્ચૈવ સત્કર્મભિર્વિશેષતઃ ।
અનેકજન્મસમ્ભૂતૈર્નરો મુક્તિમવાપ્નુયાત્ ॥ ૪૪॥

અતો ગચ્છ મહાક્ષેત્રે મયૂરેશસ્ય શૂદ્રજ ।
ઉત્તરદ્વારગાં યાત્રાં કુરુ મુક્તિમવાપ્સ્યસિ ॥ ૪૫॥

આયાસેન વિહીનસ્તુ મુક્તિં તત્રૈવમાપ્નુયાઃ ।
મા ખેદં કુરુ શૂદ્ર ત્વં ગચ્છ ગચ્છ મમાજ્ઞયા ॥ ૪૬॥

ભીમસ્તં કૌશિકં નત્વા મયૂરેશં સમાયયૌ ।
ઉત્તરદ્વારગાં યાત્રાં ચકાર વિધિસંયુતઃ ॥ ૪૭॥

અત્યન્તલોલુપત્વાત્ સ મુક્તિદ્વારં ચકાર હ ।
પુનઃ સ્વગૃહમાગત્ય ચકાર કર્મ દેહજમ્ ॥ ૪૮॥

સ્વધર્મેણ યુતો નિત્યં સ્ત્રીપુત્રાદ્યૈઃ સ સંયુતઃ ।
ત્રિવર્ણસ્થજનાનાં વૈ સેવાં ચકાર હર્ષિતઃ ॥ ૪૯॥

મુક્તિયુક્તં ગણેશાનમભજન્નિત્યમાદરાત્ ।
(Page ખં. ૬ અ. ૧૪ પાન ૩૩)
અન્તે જગામ સૂર્યસ્ય લોકં તેજોમયં પરમ્ ॥ ૫૦॥

તતઃ ક્રમેણ શૂદ્રઃ સ શુક્લગત્યા મહેશ્વરાઃ ।
મોક્ષરૂપો બભૂવાઽપિ ક્ષેત્રયાત્રાપ્રભાવતઃ ॥ ૫૧॥

એવં નાનાવિધાસ્તત્ર મુક્તિં પ્રાપ્તા વિશેષતઃ ।
તેષાં મયા ચરિત્રં યત્તદ્વક્તું ન પ્રશક્યતે ॥ ૫૨॥

અથ દેવેશ્વરાઃ પૂર્ણાં યાત્રાં દ્વારસમાશ્રિતામ્ ।
કથયામિ ભવત્પ્રીત્યા સર્વસિદ્ધિપ્રદાયિનીમ્ ॥ ૫૩॥

માલવેંઽત્યજજાતિસ્થો બભૂવે દુન્દુભિસ્વનઃ ।
નામ્ના ખ્યાતશ્ચ પાપાત્મા વિચચાર મહીતલમ્ ॥ ૫૪॥

દ્રવ્યલોભી નરાદીંશ્ચ હત્વા કોટરગોઽભવત્ ।

મુમોચ બ્રાહ્મણં સોઽપિ ન ગાં વા પાપનિશ્ચયઃ ॥ ૫૫॥

કદાચિન્ માર્ગગઃ કશ્ચિદ્વૈશ્યો દ્રવ્યસમન્વિતઃ ।
માલવાદ્દણ્ડકારણ્યં જગામ ક્રયકારણાત્ ॥ ૫૬॥

સ દૃષ્ટ્વા દ્રવ્યસંયુક્તં મહામાર્ગસમાશ્રિતમ્ ।
નાના જનૈશ્ચ સઙ્કીર્ણં તમનુ પ્રયયૌ ખલઃ ॥ ૫૭॥

વૈશ્યં ક્રમેણ દેવેશા મયૂરેશં સમાગતમ્ ।
અનુ તં સોઽપિ દુર્બુદ્ધિરાયયૌ દુન્દુભિસ્વનઃ ॥ ૫૮॥

સ વૈશ્યો ગણનાથસ્ય યાત્રાયાં નિરતોઽભવત્ ।
અન્ત્યજોઽપિ તથા તત્ર યાત્રાં તેન ચકાર હ ॥ ૫૯॥

ચતુર્દ્વારાણિ કૃત્વા તુ સંસ્થિતા વિવિધા જનાઃ ।
ચાણ્ડાલસ્તત્ર માયૂરે તદ્વત્તસ્થૌ સ વૈ ખલઃ ॥ ૬૦॥

તતસ્તસ્ય ચ દુર્બુદ્ધેર્બુદ્ધિભેદો બભૂવ હ ।
વિચારમકરોચ્ચિત્તે સ સ્વયં દુન્દુભિસ્વનઃ ॥ ૬૧॥

અહો મયાઽતિમૂર્ખેણ પાપં નાનાવિધં કૃતમ્ ।
કા ગતિર્મરણે મે તુ ભવિષ્યતિ સુદારુણા ॥ ૬૨॥

તતો વૈશ્યં પ્રણમ્યૈવ ગતઃ સ્વસ્થાનમાદરાત્ ।
સ્વધર્મસંયુતો ભૂત્વા ચકાર કર્મ દેહજમ્ ॥ ૬૩॥

પૂર્વદ્વારજપુણ્યેન સ્વધર્માચારસંયુતઃ ।
દક્ષિણદ્વારજેનૈવ સત્તાયુક્તો બભૂવ હ ॥ ૬૪॥

પશ્ચિમદ્વારપુણ્યેન રોગાદ્યભિવિવર્જિતઃ ।
ધનાઢ્યો વિવિધાન્ ભોગાન્ બુભુજેઽસૌ સુહૃદ્વૃતઃ ॥ ૬૫॥

ઉત્તરદ્વારજેનૈવ યાત્રાયાઃ ફલરૂપિણા ।
મહામોક્ષં શુક્લગત્યાંઽત્યજો લેભે મહેશ્વરાઃ ॥ ૬૬॥

ન શક્યતે મયા વક્તું ચરિત્રં દ્વારકારિણામ્ ।
નાનાવર્ણાશ્રમે સંસ્થાશ્ચતુર્વર્ગયુતા બભુઃ ॥ ૬૭॥

નારીનરઃ પશુસ્થશ્ચ જીવસ્તત્ર સમાગતઃ ।
દ્વારયાત્રાં તુ કુર્યાત્ સ ચતુર્વિધં ફલં લભેત્ ॥ ૬૮॥

ઇતિ દ્વારસ્ય યાત્રાયાશ્ચરિતં સંશ્ૃણોતિ ચેત્ ।
પઠતિ તસ્ય સર્વં તુ સફલં કર્મ સમ્ભવેત્ ॥ ૬૯॥

॥ ॐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે દ્વારયાત્રાવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૬.૧૪
(Page ખં. ૬ અ. ૧૫ પાન ૩૪)

## ૬.૧૫ દેવાગારદ્વારયાત્રામાહાત્મ્યવર્ણનં નામ પઞ્ચદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ભૃશુણ્ડ્યુવાચ ।
દેવાલયસ્ય દ્વારાણિ ચત્વારિ કથિતાનિ ચ ।
તેષાં ચરિત્રકં દેવાઃ કથયામિ સુસેવિનામ્ ॥ ૧॥

બભૂવ શૂદ્રજાતિસ્થો ગુર્જરે માનવઃ ખલઃ ।
નામ્ના શમ્ભુરિતિ ખ્યાતો દ્રવ્યયુક્તઃ સુહૃત્પ્રિયઃ ॥ ૨॥

સ સાયાહ્ને જગામૈવ કિઞ્ચિત્ કાર્યાર્થમાદરાત્ ।
ગ્રામાદ્બહિશ્ચ તત્રાઽપિ પ્રેતૈઃ સંવેષ્ટિતોઽભવત્ ॥ ૩॥

દૃષ્ટ્વા પ્રેતાન્ મહોગ્રાન્ સ ભયભીતો બભૂવ હ ।
તતસ્તં વિવિશુઃ સર્વે પ્રેતાઃ પરમદારુણાઃ ॥ ૪॥

તત્રૈવ પતિતઃ શૂદ્રસ્તદર્થં સુહૃદસ્તતઃ ।
સમાયયુસ્તં સઙ્ગૃહ્ય સ્વગૃહં પ્રયયુઃ ખલમ્ ॥ ૫॥

તતઃ પિશાચતુલ્યઃ સ વિચચાર મહીતલમ્ ।
તદર્થં સુહૃદઃ સર્વેઽભવન્ યત્નપરાયણાઃ ॥ ૬॥

તથાઽપિ તં મહાપ્રેતા મુમુચુર્ન કદાચન ।
તત્તત્ ક્ષેત્રાણિ તીર્થાનિ બભ્રમુસ્તેન સંયુતાઃ ॥ ૭॥

તદપિ પ્રેતરાજાસ્તં મુમુચુર્ન પ્રતાપતઃ ।
સુહૃદસ્તેન સંયુક્તા મહત્ ક્ષેત્રં સમાયયુઃ ॥ ૮॥

મયૂરેશં સમભ્યર્ચ્ય શમ્ભું ગૃહ્ય સુહૃજ્જનાઃ ।
જગ્મુસ્તે ભૈરવં દેવં નગ્નરૂપધરં પરમ્ ॥ ૯॥

દર્શનેન મહેશાના ભૈરવસ્ય મહાત્મનઃ ।

પ્રેતાસ્ત્યક્ત્વા યયુઃ સર્વે શમ્ભું ભીતા ન સંશયઃ ॥ ૧૦॥

સ્વસ્થપ્રકૃતિગં દૃષ્ટ્વા વિસ્મિતાઃ સુહૃદોઽખિલાઃ ।
પુનર્વિઘ્નેશમાપૂજ્ય યયુઃ સ્વનગરં તતઃ ॥ ૧૧॥

નગ્નભૈરવદેવસ્ય દર્શનેન મહેશ્વરાઃ ।
પિશાચપ્રેતદોષેભ્યો મુક્તઃ સઞ્જાયતે નરઃ ॥ ૧૨॥

ગ્રહભૂતાદિજા નાના પીડાદોષા ભવન્તિ ન ।
કદાચિદપિ દેવેશા નગ્નભૈરવદર્શનાત્ ॥ ૧૩॥

નાના જના મહાક્ષેત્રે તં પ્રણમ્ય વિધાનતઃ ।
યાત્રામાત્રેણ દોષૈશ્ચ બભૂવુર્વર્જિતાઃ પુરા ॥ ૧૪॥

ન વક્તું શક્યતે તત્ર મયા વર્ષશતૈરપિ ।
સઙ્ક્ષેપેણ તતો દેવાઃ કથિતં તસ્ય ચેષ્ટિતમ્ ॥ ૧૫॥

અથ દક્ષિણદ્વારસ્ય ચરિત્રં કથયામિ વઃ ।
તત્ર દેવેશ્વરઃ સાક્ષાન્નીલકણ્ઠઃ સ્થિતોઽભવત્ ॥ ૧૬॥

ગણેશાનં સમારાધ્ય પપૌ વિષં સમુદ્રજમ્ ।
મહોગ્રં શઙ્કરો દેવઃ સર્વભસ્મકરં પરમ્ ॥ ૧૭॥

યસ્ય સ્પર્શેન વિષ્ણુશ્ચ શ્યામરૂપો બભૂવ હ ।
વિષયુક્તઃ પપાતાઽસૌ ગર્વયુક્તપ્રભાવતઃ ॥ ૧૮॥

ગણેશસ્મરણં કૃત્વા વિષહીનો બભૂવ હ ।
મહાવિષ્ણુઃ શિવેનૈવોપદિષ્ટઃ પરવીરહા ॥ ૧૯॥

ગણેશકૃપયા તત્તુ વિષં પીતં મહાત્મના ।
શઙ્કરેણ તતો દાહસંયુક્તઃ સ બભૂવ હ ॥ ૨૦॥

મયૂરેશેતિ સંસ્મૃત્ય દાહહીનો બભૂવ હ ।
સકૃચ્છીતલદેહઃ સ મયૂરેશં સમાયયૌ ॥ ૨૧॥

તત્રૈવ સંસ્થિતઃ સોઽપિ નીલકણ્ઠો મહેશ્વરઃ ।
સેવાર્થં ગણરાજસ્ય ધારાધીશો બભૂવ હ ॥ ૨૨॥

તં પ્રણમ્ય જનાઃ સર્વે વિષહીના ભવન્તિ તે ।
ઇતિહાસં વદામ્યત્ર શૃણુધ્વં પરમેશ્વરાઃ ॥ ૨૩॥

દણ્ડકારણ્યદેશસ્થઃ કશ્ચિત્તુ ક્ષત્રિયોઽભવત્ ।
સુલોચન ઇતિ ખ્યાતો નાનાશાસ્ત્રવિશારદઃ ॥ ૨૪॥

તેન ભૂપેન રાજાનો જિતાઃ શસ્ત્રબલેન વૈ ।
નિસ્તેજસઃ પુનસ્તં તે શરણં જગ્મુરાદૃતાઃ ॥ ૨૫॥

તમુગ્રદણ્ડકર્તારં જ્ઞાત્વા સર્વે નૃપાસ્તતઃ ।
વિષબાધાં દદુસ્તસ્મૈ કિઞ્ચિચ્છદ્મબલેન વૈ ॥ ૨૬॥

સ્વયં વ્યાકુલચિત્તઃ સન્ જ્ઞાત્વા વિષભવાં વ્યથામ્ ।
(Page ખં. ૬ અ. ૧૫ પાન ૩૫)
સ જગામ મયૂરેશં પ્રધાનૈસ્તત્ક્ષણાન્નૃપઃ ॥ ૨૭॥

ઉદ્દેશેન ગણેશસ્ય મહદ્વિષં મહેશ્વરાઃ ।
સ્તમ્ભિતં સ તતો રાજા ક્ષેત્રે સમાગતોઽભવત્ ॥ ૨૮॥

તાવદ્વિષેણ ભૂપાલઃ પીડિતોઽતિતરાં કિલ ।
દેહચેષ્ટાવિહીનઃ સ બભૂવે દેવસન્નિધૌ ॥ ૨૯॥

પ્રધાનાસ્તં પ્રગૃહ્યૈવ યાત્રાં ચક્રુર્યથાવિધિ ।
દેવાલયસ્ય દ્વારસ્થાં દક્ષિણે નીલકણ્ઠજામ્ ॥ ૩૦॥

નીલકણ્ઠં પ્રપૂજ્યૈવ તસ્ય તીર્થં સ્વમસ્તકે ।
રાજા વન્દ્ય મહેશાનં વિષહીનો બભૂવ હ ॥ ૩૧॥

તતો વિઘ્નેશ્વરં રાજા પૂજ્ય સ્વસ્થાનગોઽભવત્ ।
સુલોચનઃ શશાસૈવ ધરાં સન્દણ્ડ્ય દુર્જનાન્ ॥ ૩૨॥

એવં યાત્રાવિધાનેન વિષહીનો નરાધિપઃ ।
નીલકણ્ઠસમાયુક્તં ગણેશમભજત્ પરમ્ ॥ ૩૩॥

અન્તે કૈલાસગો રાજા બુભુજે વિવિધં સુખમ્ ।
પુનશ્ચ બ્રાહ્મણો જાતઃ ક્ષેત્રે માયૂરસંજ્ઞિતે ॥ ૩૪॥

તત્રૈવ ગણરાજં સ સદા ભક્તિપરાયણઃ ।
અભજદ્ધર્મશીલશ્ચ નામ્ના ખ્યાતો મહેશ્વરાઃ ॥ ૩૫॥

એવમન્તે જગામાઽસૌ સ્વાનન્દે ગણપં પરમ્ ।
બ્રાહ્મણો બ્રહ્મભૂતો વૈ બભૂવ પરમદ્યુતિઃ ॥ ૩૬॥

એવં નાના જનાસ્તત્ર નીલકણ્ઠં પ્રદૃશ્ય વૈ ।

સિદ્ધિં પ્રાપ્તા મહેશાના મયા વક્તું ન શક્યતે ॥ ૩૭॥

અધુના પશ્ચિમદ્વારસંસ્થં માહાત્મ્યમુત્તમમ્ ।
કથયામિ મહેશાના દેવાગારસ્ય સિદ્ધિદમ્ ॥ ૩૮॥

મહિષાસુરપુત્રશ્ચ બભૂવ હ ગજાસુરઃ ।
તેન ત્રૈલોક્યગં સર્વં પીડિતં સચરાચરમ્ ॥ ૩૯॥

અજેયઃ સર્વભૂતાનાં મહાબલયુતો સુરઃ ।
કર્મખણ્ડનભાવેનાપીડયત્ સકલામરાન્ ॥ ૪૦॥

તતશ્ચ શોકસંયુક્તો શઙ્કરશ્ચ મયૂરગઃ ।
પૂજયામાસ વિઘ્નેશં તતો દૈત્યં જઘાન હ ॥ ૪૧॥

તતઃ ક્ષેત્રં સમાશ્રિત્ય સંસ્થિતઃ પાર્વતીપતિઃ ।
ગણેશેન કૃતઃ સોઽપિ દ્વારાધીશો મહેશ્વરઃ ॥ ૪૨॥

કૃત્તિવાસાઃ સ્વયં શમ્ભુર્દેવાગારસ્ય માનદઃ ।
પશ્ચિમદ્વારસંસ્થોઽભૂદ્ભજતાં ભાવપૂરકઃ ॥ ૪૩॥

અત્રેતિહાસં મુખ્યં યત્ સઙ્ક્ષેપેણ વદામ્યહમ્ ।
શૃણુધ્વં સર્વપાપઘ્નં ગણેશે ભક્તિદાયકમ્ ॥ ૪૪॥

આન્ધ્રદેશે દ્વિજઃ કશ્ચિત્ પાપકર્મપરાયણઃ ।
આસુરં ધર્મમાશ્રિત્ય દુર્વિનીતો બભૂવ હ ॥ ૪૫॥

તદર્થં સુહૃદઃ સર્વે નાના યત્નપરાયણાઃ ।
હૃદિસ્થં રાક્ષસં વારયિતું શેકુર્ન તે કદા ॥ ૪૬॥

તદાઽતિશોકસંયુક્તા યયુઃ કઞ્ચિત્તપસ્વિનમ્ ।
તેનૈવ કથિતઃ સર્વવૃત્તાન્તો દ્વિજસમ્ભવઃ ॥ ૪૭॥

તપસ્વી ઉવાચ ।
મલં ત્યક્ત્વા દ્વિજશ્ચાયમકરોન્ન કદા પુરા ।
શૌચભ્રમયુતસ્તત્ર રાક્ષસઃ પિઙ્ગલો યયૌ ॥ ૪૮॥

અપવિત્રં દ્વિજં દૃષ્ટ્વા સસાર હૃદિ રાક્ષસઃ ।
કરોતિ કર્મ તેનાઽયમાસુરં નિત્યમાદરાત્ ॥ ૪૯॥

અતઃ ક્ષેત્રે મયૂરે વૈ કૃત્તિવાસોઽધરઙ્ગતઃ ।
દ્વારયાત્રાવિધાનેન પૂજયધ્વમનેન તુ ॥ ૫૦॥

તેનાયં રાક્ષસો મુક્તો ભવિષ્યતિ ન સંશયઃ ।
નાન્યથાઽયુતવર્ષૈશ્ચ સમીચીનઃ કદાચન ॥ ૫૧॥

તતસ્તે હર્ષિતાઃ સર્વે તં ગૃહ્ય ક્ષેત્રમાયયુઃ ।
દેવાગારસ્ય યાત્રાં તે ચક્રુઃ પશ્ચિમદ્વારગામ્ ॥ ૫૨॥

કૃત્તિવાસસમભ્યર્ચ્ય દ્વિજઃ સદ્યશ્ચ દેવપાઃ ।
(Page ખં. ૬ અ. ૧૫ પાન ૩૬)
રક્ષોહીનો બભૂવાઽપિ સ્વધર્મસહિતોઽભવત્ ॥ ૫૩॥

તતઃ સ્વગૃહમાગત્ય ગણેશમભજદ્ દ્વિજઃ ।
કૃત્તિવાસઃ સમાયુક્તમન્તે કૈલાસગોઽભવત્ ॥ ૫૪॥

પુનઃ સ બ્રાહ્મણો ભૂત્વા મયૂરેશં સમાશ્રિતઃ ।
ક્ષેત્રસંન્યાસભાવેનાઽભજત્તં નિત્યમાદરાત્ ॥ ૫૫॥

અન્તે ગણપતૌ સોઽપિ બ્રહ્મભૂતો બભૂવ હ ।
એવં પશ્ચિમદ્વારસ્ય માહાત્મ્યં કથિતં મયા ॥ ૫૬॥

નાના જના મહેશાનાઃ પશ્ચિમદ્વારકારિણઃ ।
રક્ષોભાવવિહીનાશ્ચ બભૂવુર્નાઽત્ર સંશયઃ ॥ ૫૭॥

અતઃ પરં પ્રવક્ષ્યામિ દેવાગારસ્ય દેવપાઃ ।
ઉત્તરદ્વારસંયુક્તં ચરિત્રં સર્વકામદમ્ ॥ ૫૮॥

રાક્ષસ્યાં કુમ્ભકર્ણાત્તુ બભૂવે રાક્ષસાધિપઃ ।
ભીમઃ સર્વત્ર શૈવસ્ય માર્ગધ્વંસનકારકઃ ॥ ૫૯॥

તેન શૈવા ધૃતાઃ કેચિત્ પુરા કેચિચ્ચ્ સંહતાઃ ।
તતઃ કદા દ્વિજઃ કોઽપિ મહાપાશુપતો ધૃતઃ ॥ ૬૦॥

સ ઉપોષણસંયુક્તઃ શિવં ધ્યાત્વા સમાસ્થિતઃ ।
કારાગારે રાક્ષસસ્ય વધાર્થં હ્યુદ્યતોઽભવત્ ॥ ૬૧॥

હૃદિસ્થં શઙ્કરં સોઽપિ તં પુપૂજ વિશેષતઃ ॥ ૬૨॥

શઙ્કરઃ ક્ષુભિતોઽત્યન્તં ભીમં હન્તું સમાયયૌ ।
યુદ્ધં કૃત્વા સ ભીમેન તાડિતસ્તુ પપાલ હ ॥ ૬૩॥

સમાગત્ય મયૂરેશં પ્રાર્થયામાસ શઙ્કરઃ ।

તં પૂજ્ય પ્રયયૌ તત્ર જઘાન ભીમમુલ્બણમ્ ॥ ૬૪॥

સ એવ ભીમનાથસ્તુ સ્થાપિતોઽભૂદ્ દ્વિજૈઃ પુરા ।
શૈવાસ્તં હર્ષસંયુક્તાઃ પુપૂજુર્ભક્તિભાવતઃ ॥ ૬૫॥

તતઃ સ ભીમનાથસ્તુ મયૂરે ભક્તિકારણાત્ ।
સમાગતો મયૂરેશં પૂજયામાસ નિત્યદા ॥ ૬૬॥

દ્વારાધીશં ચકારૈવ ગણેશસ્તં મહેશ્વરાઃ ।
દેવાગારસ્ય દેવેશમુત્તરે ભીમશઙ્કરમ્ ॥ ૬૭॥

પૂજયિત્વાઽમરેશાનં સત્તાયુક્તો નરોઽભવત્ ।
અત્રેતિહાસમાદ્યં યત્ કથયામિ સમાસતઃ ॥ ૬૮॥

દણ્ડકારણ્યદેશસ્થો રાજા પરમધાર્મિકઃ ।
ઉગ્રસેન ઇતિ ખ્યાતઃ સર્વવિદ્યાવિશારદઃ ॥ ૬૯॥

બલહીનો મહીપાલો બભૂવે વાયુદૂષિતઃ ।
જડવચ્ચેષ્ટયા હીનઃ સંસ્થિતો દુઃખસંયુતઃ ॥ ૭૦॥

નાનોપાયાંશ્ચકારાઽસૌ શાન્તયે વૈદ્યનાયકૈઃ ।
તથાઽપિ રોગનિર્મુક્તો ન બભૂવ નરાધિપઃ ॥ ૭૧॥

તતોઽકસ્માન્ મહાદૈત્યઃ સુખભોક્તા સમાગતઃ ।
બલાત્ સર્વં નરેન્દ્રસ્ય રાજ્યં જગ્રાહ તત્ક્ષણાત્ ॥ ૭૨॥

તતોઽતિભયસંયુક્તાઃ પ્રધાનાસ્તં પ્રગૃહ્ય વૈ ।
મયૂરેશં સમાયાતાઃ પપ્રચ્છુર્જયદાયકમ્ ॥ ૭૩॥

ગાણેશૈઃ ક્ષેત્રસંસ્થૈશ્ચ કથિતં દ્વારસમ્ભવમ્ ।
માહાત્મ્યં તચ્ચ તે શ્રુત્વા હર્ષયુક્તા બભૂવિરે ॥ ૭૪॥

નૃપં ગૃહ્ય પ્રધાનાસ્તે દેવાગારસ્ય ચોત્તરે ।
દ્વારયાત્રાં વિધાનેન ચક્રુઃ પરમભક્તિતઃ ॥ ૭૫॥

તતો રોગવિહીનસ્તુ રાજા સત્તાયુતોઽભવત્ ।
ગણેશં પૂજ્ય સૈન્યેન યુતઃ સ્વનગરં યયૌ ॥ ૭૬॥

દેવં ગણેશં સ્મૃત્વા યુતં ભીમેશેન ભૂમિપઃ ।
યુયુધે તેન દૈત્યેન શસ્ત્રાસ્ત્રૈર્વિવિધૈર્બલાત્ ॥ ૭૭॥

તતો દૈત્યઃ સમાક્રુદ્ધો મલ્લયુદ્ધાય તં યયૌ ।
રાજા તં યોધયામાસ સ્મૃત્વા વિઘ્નેશ્વરં હૃદિ ॥ ૭૮॥

દૈવી સત્તા સમાયાતા રાજ્ઞો દેહે તયામરઃ ।
ક્ષીણશક્તિઃ પપાલૈવ સુખભોક્તા મહાબલઃ ॥ ૭૯॥

(Page ખં. ૬ અ. ૧૫ પાન ૩૭)
ચકાર નગરં ગત્વા સ તતો રાજ્યમુત્તમમ્ ।
ભીમેશસંયુતં નિત્યમભજદ્ગણનાયકમ્ ॥ ૮૦॥

અન્તે કૈલાસગો ભૂત્વા બુભુજે ભોગમુત્તમમ્ ।
પુનર્મયૂરક્ષેત્રે ચ બ્રાહ્મણઃ સ બભૂવ હ ॥ ૮૧॥

ગાણેશાનેન માર્ગેણાભજત્તં ગણનાયકમ્ ।
અન્તે સ્વાનન્દગઃ સોઽપિ તલ્લીનઃ પ્રબભૂવ હ ॥ ૮૨॥

એવં નાનાવિધા દેવાઃ સિદ્ધિં પ્રાપ્તા વિશેષતઃ ।
દેવાગારસ્થભીમેશયાત્રયા નાત્ર સંશયઃ ॥ ૮૩॥

અધુના પૂર્ણયાત્રાયા દેવાલયસ્ય દેવપાઃ ।
માહાત્મ્યં કથયામીહ સઙ્ક્ષેપેણ પુરા ભવમ્ ॥ ૮૪॥

દ્રાવિડે શૂદ્રજાતિસ્થો બભૂવ વિષયપ્રિયઃ ।
નામ્ના કદા સ્વકાર્યાર્થં માર્ગસંસ્થો બભૂવ હ ॥ ૮૫॥

તત્રાશુચિસ્વભાવસ્થં રાક્ષસઃ પ્રવિવેશ તમ્ ।
તેનાસુરસ્વભાવસ્થઃ શૂદ્રો બભૂવ સર્વદા ॥ ૮૬॥

તતઃ પિશાચકૈઃ સોઽપિ ધૃતો હૃદિ વિશેષતઃ ।
પ્રવિશ્ય ચેષ્ટયા હીનઃ કૃતઃ પૈશાચકોઽભવત્ ॥ ૮૭॥

તતો વીર્યવિહીનં તં નાનારોગૈઃ પ્રપીડિતમ્ ।
એતાદૃશં ગૃહીત્વા તુ સુહૃદો દુઃખમાયયુઃ ॥ ૮૮॥

વિદુષા બ્રાહ્મણેનાઽપિ સુહૃદશ્ચોપદેશિતાઃ ।
મયૂરેશં સમાગમ્ય યાત્રાં ચક્રુર્યથાવિધિ ॥ ૮૯॥

દેવાગારસ્ય સમ્પૂર્ણાં ચતુર્દ્વારસમન્વિતામ્ ।
તત્ર સર્પેણ દષ્ટાશ્ચ યાત્રાં ચક્રુસ્તથાઽપિ તે ॥ ૯૦॥

નગ્નભૈરવદેવસ્ય પૂજનેન પિશાચકાઃ ।

તં ત્યક્ત્વા પ્રયયુઃ સર્વે ભયભીતાઃ સુરેશ્વરાઃ ॥ ૯૧॥

નીલકણ્ઠં સમાલોક્ય વિષબાધા પપાલ હ ।
કૃત્તિવાસઃ સમાલોક્ય રાક્ષસઃ પ્રયયૌ તતઃ ॥ ૯૨॥

ભીમેશં પૂજયિત્વા તુ વીર્યયુક્તો બભૂવ હ ।
તતો વિઘ્નેશમાપૂજ્ય સ્વગૃહં સ જગામ હ ॥ ૯૩॥

વિસ્મિતો માનસેઽત્યન્તં સસ્માર ગણનાયકમ્ ।
ચતુર્દ્વારયુતં તં સોઽભજદ્ભાવસમન્વિતઃ ॥ ૯૪॥

અન્તે શૈવે સમાગમ્ય લોકે ભોગાન્ મનોગતાન્ ।
બુભુજે સ પુનઃ ક્ષેત્રે મયૂરે ક્ષત્રિયોઽભવત્ ॥ ૯૫॥

ક્ષેત્રસંન્યાસસંયુક્તોઽભજત્તં ગણનાયકમ્ ।
સ્વાનન્દે બ્રહ્મભૂતઃ સ બભૂવાન્તે સુરેશ્વરાઃ ॥ ૯૬॥

એવં નાનાવિધા લોકા યયુઃ સિદ્ધિં મહેશ્વરાઃ ।
દેવાગારસ્ય તત્રૈવ બ્રૂયાં કતિ તુ યાત્રયા ॥ ૯૭॥

દેવાલયસ્ય યાત્રાયા માહાત્મ્યં યઃ શ‍ૃણોતિ ચેત્ ।
પઠેદ્વા તસ્ય વિઘ્નેશઃ પ્રસન્નો ભવતિ પ્રભુઃ ॥ ૯૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે દેવાગારદ્વારયાત્રામાહાત્મ્યવર્ણનં નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૬.૧૫
(Page ખં. ૬ અ. ૧૬ પાન ૩૮)

## ૬.૧૬ ગર્ભાગારયાત્રામાહાત્મ્યવર્ણનં નામ ષોડશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ભૃશુણ્ડ્યુવાચ ।
ગર્ભાલયસ્ય યાત્રાયા માહાત્મ્યં કથયામ્યહમ્ ।
શ‍ૃણુધ્વં ભાગ્યસંયુક્તા દેવેશાસ્તત્ સમાસતઃ ॥ ૧॥

મૂર્ખઃ કોઽપિ પુરા વિપ્રો વઙ્ગદેશે બભૂવ હ ।
વિષ્ણુદત્ત ઇતિ ખ્યાતઃ પશુતુલ્યઃ સ્વભાવતઃ ॥ ૨॥

તં દૃષ્ટ્વા પિતરૌ તસ્ય કાશ્યપૌ દુઃખસંયુતૌ ।
કશ્યપં જગ્મતુસ્તેન શ્રુતો વૃત્તાન્ત ઉલ્બણઃ ॥ ૩॥

ગર્ભાગારસ્ય માહાત્મ્યં કથયામાસ કશ્યપઃ ।
પૂર્વદ્વારભવં તૌ તં પ્રણમ્ય યયતુર્ગૃહમ્ ॥ ૪॥

પુત્રં ગૃહ્ય મયૂરેશં જગ્મતુર્ભક્તિસંયુતૌ ।
યાત્રાં પુત્રેણ સંયુક્તૌ ચક્રતુઃ પરમાદરાત્ ॥ ૫॥

ગર્ભાલયસ્ય પૂર્વસ્થદ્વારગાં બુદ્ધિમાલભત્ ।
સમ્પૂજ્ય સ મહાવિદ્યાં જ્ઞાનયુક્તો બભૂવ હ ॥ ૬॥

તતો હર્ષસમાયુક્તૌ પિતરૌ તં પ્રગૃહ્ય ચ ।
સ્વાશ્રમં જગ્મતુર્દેવા વિસ્મિતૌ પુત્રચેષ્ટયા ॥ ૭॥

તતો બુદ્ધિયુતં દેવં ગણેશમભજન્ પરમ્ ।
અન્તે કૈલાસસંસ્થં તં ગણપં જગ્મુરાદરાત્ ॥ ૮॥

તત્રૈવ વિવિધાન્ ભોગાન્ પુનર્ભુક્ત્વા મહેશ્વરાઃ ।
મયૂરે બ્રાહ્મણાઃ ક્ષેત્રે બભૂવુઃ શીલસંયુતાઃ ॥ ૯॥

તત્ર વિઘ્નેશ્વરં નિત્યમભજન્ ભક્તિભાવતઃ ।
અન્તે સ્વાનન્દગા ભૂત્વા બ્રહ્મભૂતા બભૂવિરે ॥ ૧૦॥

એવં નાના જના દેવાઃ સિદ્ધિં પ્રાપ્તા મયૂરકે ।
ગર્ભાગારસ્ય પૂર્વદ્વારસ્થયાત્રાવિધાનતઃ ॥ ૧૧॥

તત્ર વક્તું મહાદેવાઃ શક્યતે ન કદાચન ।
અતઃ સઙ્ક્ષેપતઃ પ્રોક્તં પૂર્વદ્વારયશોઽમલમ્ ॥ ૧૨॥

અધુના દક્ષિણદ્વારયાત્રામાહાત્મ્યમુત્તમમ્ ।
ગર્ભાગારસ્ય વક્ષ્યામિ શૃણુધ્વં ચૈકચેતસઃ ॥ ૧૩॥

કાશ્મીરે શૂદ્રજાત્યાં કઃ પાપકર્મા બભૂવ ચ ।
દેવાલયં સમાલોક્યાભજદ્દેવાન્ સુદારુણઃ ॥ ૧૪॥

કદા વૈશ્યં સમાલોક્ય દ્રવ્યયુક્તં પ્રલોભતઃ ।
તમનુપ્રયયૌ દુષ્ટઃ પ્રહન્તું ખડ્ગધારકઃ ॥ ૧૫॥

વૈશ્યોઽપિ યત્નમાસ્થાય સાર્થયુક્તો બભૂવ હ ।
તથાપિ પાપકર્મા તં ન મુમોચ કદાચન ॥ ૧૬॥

વૈશ્યઃ સમાગતઃ સાર્થૈર્જનૈઃ ક્ષેત્રે મયૂરકે ।
શૂદ્રસ્તત્ર સમાયાતો જિઘાંસુર્ભાગ્યગૌરવાત્ ॥ ૧૭॥

તત્ર યાત્રાં ચકારાઽસૌ વૈશ્યો ભાવસમન્વિતઃ ।
શૂદ્રઃ સ્વયં સ્થિતશ્ચૈવ યાત્રાહીનઃ ખલાત્મવાન્ ॥ ૧૮॥

દ્વિતીયે દિવસે સર્વે દક્ષિણદ્વારગાં પરામ્ ।
યાત્રાં ચક્રુસ્તતઃ શૂદ્રસ્તેષામનુયયૌ ખલઃ ॥ ૧૯॥

ગર્ભાગારસ્થિતાન્ પૂજ્ય દક્ષિણદ્વારપાન્ જનાઃ ।
પ્રમોદાઘાસ્તતઃ સર્વે પુરો જગ્મુર્મહેશ્વરાઃ ॥ ૨૦॥

શૂદ્રસ્તત્ર સમાસીનઃ પુનઃ સ્વસ્થાનમાયયૌ ।
ગણેશં પૂજ્ય પાપાત્મા પુણ્યવાન્ સ બભૂવ હ ॥ ૨૧॥

વિચારમકરોચ્ચિત્તે મયા પાપાનિ નિત્યશઃ ।
અહો કૃતાનિ તાન્યેવ પીડયિષ્યન્તિ માં કિલ ॥ ૨૨॥

અહો દેવાલયે દેવા મયા સઙ્ખણ્ડિતા મુધા ।
જનાઃ સમ્પૂજયન્તસ્તાન્ કિં કૃતં પાપરૂપિણા ॥ ૨૩॥

એવં વિચાર્ય સ્વસ્થાને ત્યક્ત્વા વૈશ્યં જગામ હ ।
કાશ્મીરમમરાન્ સર્વાનભજદ્ભક્તિસંયુતઃ ॥ ૨૪॥

અન્તે જગામ કૈલાસે ગણેશં ભક્તિસંયુતઃ ।
અભજત્ સ પુનર્દેવાન્ મયૂરે વૈશ્યજોઽભવત્ ॥ ૨૫॥

(Page ખં. ૬ અ. ૧૬ પાન ૩૯)
ગણેશ્વરં તત્ર દેવં ક્ષેત્રસંન્યાસમાર્ગતઃ ।
અભજચ્ચાન્તકાલે સ તદ્દેહે લીનતાં યયૌ ॥ ૨૬॥

નાનાવિધા જના એવં યયુઃ સિદ્ધિં સુરેશ્વરાઃ ।
તત્ર વક્તું ન શક્યં તુ મયા ભવતિ નિત્યશઃ ॥ ૨૭॥

અતઃ પરં પ્રવક્ષ્યામિ પશ્ચિમદ્વારસંશ્રિતમ્ ।
માહાત્મ્યં યત્ પુરા જાતં ગર્ભાગારસ્ય સૌખ્યદમ્ ॥ ૨૮॥

વિદર્ભે ક્ષત્રિયઃ કશ્ચિદ્રાજ્યહીનો બભૂવ હ ।
સુદાસઃ સર્વશાસ્ત્રજ્ઞઃ ક્ષત્રિયો પીડિતો ભૃશમ્ ॥ ૨૯॥

વનં ગત્વા સ રાજર્ષિઃ શોકયુક્તો બભૂવ હ ।
તત્રાઽઽજગામ દેવર્ષિર્નારદઃ પરમાર્થવિત્ ॥ ૩૦॥

રાજ્ઞા સમ્પૂજિતો યોગી હર્ષયંશ્ચ જગાદ તમ્ ।
ગચ્છ ક્ષેત્રે મયૂરે ત્વં તતઃ સિદ્ધિમવાપ્સ્યસિ ॥ ૩૧॥

ગર્ભાગારસ્ય રાજેન્દ્ર પશ્ચિમદ્વારસંશ્રિતામ્ ।
સિન્દિં પૂજ્ય મહારાજો ભવિષ્યસિ યથા પુરા ॥ ૩૨॥

એવમુક્ત્વા નારદશ્ચ વિઘ્નેશં સંસ્મરન્ યયૌ ।
રાજા તથા ચકારાઽસૌ ભક્તિયુક્તેન ચેતસા ॥ ૩૩॥

ગર્ભાગારસ્ય યાત્રાં સ ચકાર વિધિસંયુતઃ ।
પશ્ચિમદ્વારગામેકાં તતસ્તત્રૈવ સંસ્થિતઃ ॥ ૩૪॥

કૌડિન્યનગરે રાજા સુબાહુઃ પીડિતોઽભવત્ ।
શૂલેન દારુણેનૈવ મૃત્યુરૂપેણ દેવપાઃ ॥ ૩૫॥

રાત્રૌ સ્વપ્ને મહાભીમં પુરુષં સ દદર્શ હ ।
તેન સન્તાડિતોઽત્યન્તં મુમૂર્છ ભયસંયુતઃ ॥ ૩૬॥

પુનઃ સંજ્ઞાયુતં ભૂપમુવાચ પુરુષઃ પરઃ ।
રાજ્યં દેહિ સુદાસાય વિદર્ભદેશસમ્ભવમ્ ॥ ૩૭॥

મરિષ્યસિ ન ચેદ્રાજન્ સકુલો નાત્ર સંશયઃ ।
મયૂરેશં સમાશ્રિત્ય સ્થિતં ગચ્છાધુના ખલ ॥ ૩૮॥

તતઃ પુરુષરૂપં તં ન દદર્શ મહીપતિઃ ।
શૂલહીનો બભૂવાઽસૌ તં જગામ સુદાસકમ્ ॥ ૩૯॥

વિદર્ભદેશગં રાજ્યં તં પ્રણમ્ય દદૌ પરમ્ ।
સ્વરાજ્યં સ જગામૈવ વૈરમુત્સૃજ્ય દેવપાઃ ॥ ૪૦॥

રાજા સિદ્ધિયુતં નિત્યમભજદ્ગણનાયકમ્ ।
અન્તે કૈલાસગઃ સોઽપિ બભૂવે કામનાયુતઃ ॥ ૪૧॥

પુનઃ સ બ્રાહ્મણો જાતો મયૂરે વર્મસંયુતઃ ।
ગણેશ્વરં તત્ર નિત્યમભજદ્ભક્તિસંયુતઃ ॥ ૪૨॥

અન્તે જગામ સ્વાનન્દે ગણેશં ગણપપ્રિયઃ ।
બ્રહ્મભૂતોઽભવત્તત્ર ક્ષેત્રવાસપ્રભાવતઃ ॥ ૪૩॥

એવં નાના જનાઃ સિદ્ધિં પશ્ચિમદ્વારતો યયુઃ ।
યાત્રામાત્રેણ ગર્ભાગારસ્ય કતિ વદામ્યહમ્ ॥ ૪૪॥

અથોત્તરસ્થિતં દ્વારં ગર્ભાગારસ્ય માનદાઃ ।
ચરિત્રં તસ્ય વક્ષ્યામિ શ્રવણાત્ સર્વસૌખ્યદમ્ ॥ ૪૫॥

પાઞ્ચાલદેશગઃ કશ્ચિદ્વૈશ્યો વિષયલમ્પટઃ ।
ન બુબોધ ગતં કાલં દ્રવ્યયુક્તઃ સ્વભાવતઃ ॥ ૪૬॥

સ્ત્રીમાંસમદિરાસક્તો બભૂવે નિત્યમાદરાત્ ।
એકદા તત્ર દેશે તુ પરચક્રાદ્ભયં પરમ્ ॥ ૪૭॥

ત્યક્ત્વા સ્વદેશં વૈશ્યશ્ચ પપાલ સકુટુમ્બકઃ ।
આયયૌ દણ્ડકારણ્યં નિવાસાર્થં ભયાતુરઃ ॥ ૪૮॥

તત્ર માર્ગસ્થભાવેન ક્ષેત્રં પ્રાપ્તં મયૂરકમ્ ।
તદ્દિને પશ્ચિમદ્વારયાત્રાં ચક્રુર્જનાઃ પરામ્ ॥ ૪૯॥

દ્વિતીયેઽહ્નિ સ વૈશ્યસ્તુ લજ્જયા સંયુતોઽભવત્ ।
ઉત્તરદ્વારયાત્રાર્થમુદ્યતોઽભૂજ્જનૈઃ સ્વયમ્ ॥ ૫૦॥

ગણેશં પૂજયિત્વા સ ગર્ભાગારં જગામ હ ।
પુપૂજ તત્ર વૈશ્યોઽપિ ચતુઃષષ્ટિશ્ચ યોગિનીઃ ॥ ૫૧॥

(Page ખં. ૬ અ. ૧૬ પાન ૪૦)
તતઃ શ્રમેણ સંયુક્તઃ પુનર્ગણપતિં યયૌ ।
પૂજયિત્વા જગામાઽસૌ યથેષ્ટં વિષયપ્રિયઃ ॥ ૫૨॥

તતો બુદ્ધિશ્ચ વૈશ્યસ્ય વિપરીતા બભૂવ હ ।
તયા યુક્તો મહેશાના વિચારમકરોદ્ હૃદિ ॥ ૫૩॥

મયા વિષયયુક્તેન કૃતં કર્મ ભયાવહમ્ ।
કા ગતિર્મરણે મે તુ ભવિષ્યતિ સુદારુણા ॥ ૫૪॥

અહો ક્ષેત્રસ્ય માહાત્મ્યં મયા વક્તું ન શક્યતે ।
વિપરીતા મતિર્જાતા મમાપિ દુષ્ટચેતસઃ ॥ ૫૫॥

યોગિનીનાં દર્શનેન શુદ્ધચિત્તો ભવેન્નરઃ ।
યોગપ્રિયસ્તથાઽહં વૈ જાતઃ સત્યં ચ શાસ્ત્રગમ્ ॥ ૫૬॥

યોગિનીસંયુતં ઢુણ્ઢિં વૈશ્યઃ સ્વધર્મમાસ્થિતઃ ।
અભજન્નિત્યમાનન્દાન્નિન્દયન્ વિષયાન્ સદા ॥ ૫૭॥

અન્તે જગામ કૈલાસે ગણેશે કામનાયુતઃ ।
તત્ર ભુક્ત્વા મહાભોગાન્ પુનઃ પપાત ભૂતલમ્ ॥ ૫૮॥

મયૂરક્ષેત્રગો ભૂત્વા ક્ષત્રિયો ધર્મસંયુતઃ ।
ક્ષેત્રસંન્યાસભાવેન વિઘ્નેશમભજત્ સદા ॥ ૫૯॥

અન્તે વિઘ્નેશ્વરઃ સોઽપિ બ્રહ્મભૂતો બભૂવ હ ।
પૂર્વસંસ્કારભાવેન યોગસિદ્ધો મહેશ્વરાઃ ॥ ૬૦॥

એવં નાના જનાસ્તત્ર યયુઃ સિદ્ધિમનુત્તમામ્ ।
તત્રૈવં કતિ વો બ્રૂયાં સઙ્ખ્યાતું ન પ્રશક્યતે ॥ ૬૧॥

અતઃ પરં પ્રવક્ષ્યામિ સમ્પૂર્ણાં તુ મહેશ્વરાઃ ।
ગર્ભાગારાશ્રિતાં યાત્રાં પરાં માહાત્મ્યસંયુતામ્ ॥ ૬૨॥

આત્રેયો બ્રાહ્મણઃ કશ્ચિત્ પુરા મૂર્ખો બભૂવ હ ।
પિતરૌ સમ્મૃતૌ તસ્યાઽનાથો બભ્રામ ભૂતલે ॥ ૬૩॥

વિષયેષુ વિશેષેણ પ્રીતિયુક્તસ્તથાઽમરાઃ ।
ભ્રમન્ સમાગતઃ સોઽપિ મયૂરે દૈવગૌરવાત્ ॥ ૬૪॥

તત્ર કશ્ચિદ્ દ્વિજઃ સુજ્ઞઃ સેવાર્થં ક્ષેત્રગોઽભવત્ ।
તં ગૃહ્ય બ્રાહ્મણો ગર્ભાગારયાત્રાં ચકાર હ ॥ ૬૬॥

સંસર્ગેણ દ્વિજસ્યાઽસૌ યાત્રાં ચકાર દુષ્ટધીઃ ।
સ્વયં વિદ્યાનિધિર્જાતો યથાઽન્યે બ્રાહ્મણાસ્તથા ॥ ૬૬॥

પૂર્વદ્વારં સમાલોક્ય દક્ષિણસ્થં જગામ હ ।
તત્ર માર્ગે પપાતાઽસૌ તથાપિ દ્વારગોઽભવત્ ॥ ૬૫॥

પ્રમોદાદીન્ સમાલોક્ય વિષયે નિઃસ્પૃહોઽભવત્ ।
પશ્ચિમે સિદ્ધિમાલોક્ય ભાગ્યયુક્તો મહેશ્વરઃ ॥ ૬૮॥

યોગિનીસ્તત આલોક્ય પુણ્યશીલો બભૂવ હ ।
એવં યાત્રાં સકૃત્ કૃત્વા પુનઃ સ્વગૃહગોઽભવત્ ॥ ૬૯॥

તતો દ્વિજં પ્રણમ્યાઽસૌ સ્વદેશં તુ જગામ હ ।
તં તાદૃશં વિલોક્યૈવ વિસ્મિતાઃ સુહૃદોઽભવન્ ॥ ૭૦॥

વિવાહં કારયામાસુઃ સુહૃદસ્તસ્ય ધીમતઃ ।
સ ગણેશં વિચિન્ત્યૈવાઽભજદ્ગર્ભાશ્રિતં તદા ॥ ૭૧॥

અન્તે કૈલાસગો ભૂત્વા ગણેશં તત્ર ચાભજત્ ।
ભુક્ત્વા ભોગાન્ પપાતાઽસૌ મયૂરે બ્રાહ્મણોઽભવત્ ॥ ૭૨॥

ગણેશ્વરં તત્ર દેવા અભજન્ નાન્યચેતસા ।
અન્તે સ્વાનન્દગઃ સોઽપિ બ્રહ્મભૂતો બભૂવ હ ॥ ૭૩॥

મયૂરે ગર્ભયાત્રાયાં નિરતાઃ સકૃદપ્યહો ।
યયુસ્તે સિદ્ધિમાદ્યં કથયિતું ન પ્રશક્યતે ॥ ૭૪॥

ગર્ભાગારસ્ય માહાત્મ્યં શ‍ૃણોતિ દ્વારજં ત્વિદમ્ ।
પઠેદ્વા તસ્ય વિઘ્નેશો દદતે ચેપ્સિતં ફલમ્ ॥ ૭૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે ગર્ભાગારયાત્રામાહાત્મ્યવર્ણનં નામ ષોડશોઽધ્યાયઃ ॥ ૬.૧૬
(Page ખં. ૬ અ. ૧૭ પાન ૪૧)

## ૬.૧૭ મયૂરક્ષેત્રમરણપ્રાપ્તિમાહાત્મ્યવર્ણનં નામ સપ્તદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શિવાદ્યા ઊચુઃ ।
એતાદૃશા મહાભાગાઃ કથં કૈલાસમાયયુઃ ।
અઞ્જસા સેવ્ય યોગીન્દ્ર ગણેશં વદ કારણમ્ ॥ ૧॥

ભૃશુણ્ડ્યુવાચ ।
સકામા ગણરાજસ્ય ભક્તા યે દેવસત્તમાઃ ।
અન્તરે વિષયેષ્વેતે સંસક્તાઃ સમ્ભવન્તિ ચ ॥ ૨॥

ન તેષાં ગણરાજસ્ય સ્વાનન્દે ગતિરુચ્યતે ।
નિષ્કામાનાં પદં તદ્વૈ ભક્તાનાં જન્મનાશનમ્ ॥ ૩॥

અતઃ કૈલાસગાઃ સર્વે ગણેશં પૂજ્ય યોગિનઃ ।
બભૂવુસ્તત્ર વિઘ્નેશમભજન્નાન્યચેતસઃ ॥ ૪॥

તદા કૈલાસનાથે તે સ્વાનન્દં દેવસત્તમાઃ ।
ગમિષ્યન્તિ ન સન્દેહઃ પુનરાવૃત્તિવર્જિતમ્ ॥ ૫॥

ભુક્તિમુક્તિપ્રિયા યે વૈ કૈલાસાત્ સમ્પતન્તિ ચેત્ ।

તે પુનર્વિઘ્નરાજં તં ભજન્તે નાન્યચેતસઃ ॥ ૬॥

કૈલાસે ગણપં ગત્વા ભોગયુક્તા ભવન્તિ યે ।
તે પુનર્મૃત્યુલોકેષુ પતન્ત્યત્ર ન સંશયઃ ॥ ૭॥

બ્રહ્મભૂતા ભવન્ત્યન્તે સ્વાનન્દસ્થા મહેશ્વરાઃ ।
ગણેશેનૈવ રચિતં ક્રીડાર્થં તત્તથાઽભવત્ ॥ ૮॥

અધુના ક્ષેત્રબાહ્યા વૈ દેવભૂમિઃ પ્રકીર્તિતા ।
તસ્યા માહાત્મ્યમુખ્યં યત્ કથયામિ સમાસતઃ ॥ ૯॥

દણ્ડકારણ્યદેશસ્થઃ શૂદ્રઃ કશ્ચિદ્બભૂવ હ ।
દારિદ્ર્યદોષસંયુક્તો બભ્રામ વસુધાતલે ॥ ૧૦॥

ક્ષુધયા પીડિતોઽત્યન્તં જ્વરયુક્તો બભૂવ હ ।
સ પૂર્વદ્વારબાહ્યાયાં દેવભૂમ્યાં મમાર હ ॥ ૧૧॥

સઙ્ગૃહ્ય વૈષ્ણવા દેવા વિમાનેન ગણા નરમ્ ।
વિકુણ્ઠે સ્થાપયામાસુઃ શૂદ્રં ક્ષેત્રપ્રભાવતઃ ॥ ૧૨॥

પૂર્વદ્વારાત્ સમારભ્ય યોજનં વૈષ્ણવં મતમ્ ।
તત્ર સિદ્ધિં યયુઃ કેચિદ્વક્તું શક્યં ન વૈ ભવેત્ ॥ ૧૩॥

અન્યચ્ચ દેવદેવશાઃ શ‍ૃણુધ્વં દક્ષિણે ભવમ્ ।
ચરિત્રં શિવભાવાખ્યં દ્વારાત્ સઙ્ક્ષેપતઃ પરમ્ ॥ ૧૪॥

બ્રાહ્મણસ્તત્ર સમ્ભૂતો જગામ વૃત્તિકારણાત્ ।
તસ્માત્ સમાગતઃ સોઽપિ શ્રમયુક્તોઽભવત્ પરમ્ ॥ ૧૫॥

મમારાહ્નિ દ્વિતીયે સ સદ્યઃ કૈલાસગોઽભવત્ ।
માહાત્મ્યાદ્દેવભૂમ્યાસ્તુ શૈવ્યાઃ ક્ષેત્રાન્ મહેશ્વરાઃ ॥ ૧૬॥

અથ પશ્ચિમભાગાત્તુ દ્વારાચ્છાક્તં મતં પરમ્ ।
ક્ષેત્રં યોજનમાત્રં તુ તસ્ય વક્ષ્યામિ ચેષ્ટિતમ્ ॥ ૧૭॥

ચાણ્ડાલઃ કોઽપિ દેવેશા વિદર્ભાદાગતોઽભવત્ ।
કાર્યાર્થં જ્વરયુક્તશ્ચ બભૂવાઽતીવ પીડિતઃ ॥ ૧૮॥

મમાર પઞ્ચમે દેવા દિવસે દૈવગૌરવાત્ ।
શક્તિલોકં જગામાઽસૌ માહાત્મ્યાચ્છાક્તસમ્ભવાત્ ॥ ૧૯॥

અથોત્તરભવં ચિત્રં ચરિત્રં શ‍ૃણુત પ્રિયાઃ ।
સૌરલોકપ્રદં પૂર્ણં ક્ષેત્રાદુત્તરભાગતઃ ॥ ૨૦॥

ભિલ્લઃ કશ્ચિન્ મહાભાગાઃ કદા કાર્યાર્થમાયયૌ ।
દષ્ટઃ સર્પેણ તત્રૈવ મમાર ભાગ્યગૌરવાત્ ॥ ૨૧॥

સૌરં લોકં સમાશ્રિત્ય મુમુદે સોઽપિ દેવપાઃ ।
મયૂરક્ષેત્રદ્વારાત્તૂત્તરે સૌરપ્રભાવતઃ ॥ ૨૨॥

અનેકનાર્ય એવં ચ નરા વર્ણાશ્રમસ્થિતાઃ ।
ભ્રષ્ટાશ્ચાઽપિ મહેશાના યયુઃ સિદ્ધિં વિશેષતઃ ॥ ૨૩॥

તેષાં ચરિત્રકં કૈસ્તુ વક્તુમત્ર ન શક્યતે ।
સઙ્ક્ષેપેણ મયા કિઞ્ચિત્ કથિતં પૂર્વસમ્ભવમ્ ॥ ૨૪॥

ફલં મયૂરક્ષેત્રેઽપિ મરણેનાઽધુના લભેત્ ।
તસ્ય માહાત્મ્યમુખ્યં યત્ કથયામિ સમાસતઃ ॥ ૨૫॥

(Page ખં. ૬ અ. ૧૭ પાન ૪૨)
ચાણ્ડાલઃ કોઽપિ પાપાત્મા પરસ્ત્રીલાલસોઽભવત્ ।
આન્ધ્રે વનં સમાશ્રિત્ય જઘ્ને લોકાન્ સમાગતાન્ ॥ ૨૬॥

નાનાપાપયુતો દુષ્ટો વર્ણને ન પ્રશક્યતે ।
ગ્રન્થબાહુલ્યભાવાદ્વૈ પરદોષપ્રકીર્તનાત્ ॥ ૨૭॥

દુષ્ટો જગામ માયૂરે સુહૃજ્જનયુતઃ કદા ।
ભગિનીગૃહસંસ્થે સ ભાગિનેયવિવાહગઃ ॥ ૨૮॥

પાપાનિ તસ્ય દુષ્ટસ્ય બહિઃ ક્ષેત્રાત્ સ્થિતાનિ ચ ।
પુનઃ પ્રતીક્ષયન્તે તં ક્રોધયુક્તાનિ દેવપાઃ ॥ ૨૯॥

નરં મયૂરે પાપાનિ યત્ર કુત્ર કૃતાનિ વૈ ।
તં મુક્ત્વા બહિરેવાઽપિ પ્રવેશાત્ સંસ્થિતાનિ તુ ॥ ૩૦॥

પુનર્યદિ સમાયાતમનુ તં પાપકાનિ તુ ।
ગચ્છન્તિ શુદ્ધરૂપસ્થં યત્ર સોઽપિ ગમિષ્યતિ ॥ ૩૧॥

કદાચિત્તેન કિઞ્ચિદ્વૈ યદિ પાપં કૃતં ભવેત્ ।
તતઃ પુનઃ પ્રવિશ્યાઽપિ ભુઞ્જતે તાનિ તં નરમ્ ॥ ૩૨॥

અતો મયૂરક્ષેત્રં વૈ ન ત્યાજ્યં દેહધારિણા ।

પાપપ્રવેશહીનત્વાત્ સદા સેવ્યં મહેશ્વરાઃ ॥ ૩૩॥

યદા નરઃ સમુદ્યુક્તો ભવતિ સ્વગૃહાત્ કદા ।
મયૂરેશં ગમિષ્યામિ યાત્રાર્થં નાત્ર સંશયઃ ॥ ૩૪॥

તદા પાપાનિ તસ્યૈવ વિચારં કુર્વતે પરમ્ ।
મહાભયકરો વિઘ્નઃ પ્રાપ્તશ્ચાસ્માકમુલ્બણઃ ॥ ૩૫॥

મયૂરે યદિ દેહી તુ ગમિષ્યતિ તદા વયમ્ ।
સ્થાસ્યામઃ કુત્ર પાપાનિ ચરિતું વિઘ્નમુત્તમમ્ ॥ ૩૬॥

તતઃ પાપાનિ સર્વાણિ તં નરં યત્નભાવતઃ ।
પીડયામાસુરત્યન્તં યેન વ્યગ્રો નરો ભવેત્ ॥ ૩૭॥

દ્રવ્યહાનિં તથા પુત્રં પુરં પશુગૃહાદિકમ્ ।
પાપાનિ કુર્વતે નાશસંયુક્તં દેવસત્તમાઃ ॥ ૩૮॥

તેન સમ્પીડિતો ધત્તે યાત્રાર્થં ન મનોઽપિ સઃ ।
અતઃ સર્વમનાદૃત્ય મયૂરેશં સમાશ્રયેત્ ॥ ૩૯॥

કામં નાનાવિધાન્યેવ પાપાનિ કુરુતાં સદા ।
અન્તે મયૂરકં ગચ્છેત્ કિં કરિષ્યન્તિ તાનિ તમ્ ॥ ૪૦॥

યેન કેન વિચારેણ મયૂરે દેવસત્તમાઃ ।
વાસઃ સદા પ્રકર્તવ્યો બ્રહ્મભૂયસ્ય કારણાત્ ॥ ૪૧॥

અન્યત્ર વિવિધૈર્યુક્તો ભોગૈ રાજ્યાદિભિસ્તથા ।
મયૂરે શ્રેષ્ઠકસ્તસ્માદ્દારિદ્ર્યાદિયુતો ભવેત્ ॥ ૪૨॥

મયૂરક્ષેત્રે મરણે સ્વાનન્દં લભતે નરઃ ।
અન્યત્ર ભોગયુક્તશ્ચેજ્જન્મમૃત્યુયુતો ભવેત્ ॥ ૪૩॥

વિષયાસક્તચિત્તશ્ચેન્ મયૂરેશં તથાપિ હિ ।
સમાશ્રયેદ્ દુરાચારો યાતનાં લભતે પરામ્ ॥ ૪૪॥

અધુના શ‍ૃણુત પ્રાજ્ઞા અન્ત્યજસ્ય તુ ચેષ્ટિતમ્ ।
પ્રકૃતં કથયિષ્યામિ બહુના કિં વિચક્ષણાઃ ॥ ૪૫॥

ચાણ્ડાલો ભગિનીગેહે મયૂરે સંસ્થિતોઽભવત્ ।
મમાર તત્ર સર્પેણ સ દષ્ટો દેવસત્તમાઃ ॥ ૪૬॥

ગાણપત્યા વિમાનં તુ સમાનીય તદર્થતઃ ।
સઙ્ગૃહ્ય બ્રહ્મભૂતં તં ચક્રુઃ ક્ષેત્રમૃતેઃ ફલાત્ ॥ ૪૭॥

મયૂરે ન ચકારાઽસૌ ચાણ્ડાલઃ પાપમલ્પકમ્ ।
તેન સદ્યો બભૂવૈવ બ્રહ્મસ્થો નીચયોનિજઃ ॥ ૪૮॥

મરણે બ્રહ્મભૂતશ્ચ ભવત્યત્ર ન સંશયઃ ।
મયૂરે તસ્ય કિં દેવાઃ કથયામિ ચરિત્રકમ્ ॥ ૪૯॥

એવં નાના જનાદ્યાશ્ચ પશુપક્ષ્યાદિ સમ્ભવાઃ ।
મયૂરે બ્રહ્મભૂતાશ્ચ બભૂવુર્મરણાત્ પુરા ॥ ૫૦॥

અથો દેવેશમુખ્યાશ્ચ શ‍ૃણુધ્વં ત્વેકચેતસઃ ।
(Page ખં. ૬ અ. ૧૮ પાન ૪૩)
ચિત્રં ચરિત્રકં વક્ષ્યે મયૂરે સમ્ભવં પરમ્ ॥ ૫૧॥

વણિજો ગર્દભં ચૈકં ધૃત્વા કાર્યાર્થમાદરાત્ ।
ભારેણ સંયુતં ચક્રુરન્નાદ્યૈસ્તં મહેશ્વરાઃ ॥ ૫૨॥

તે તં ગૃહ્ય મયૂરેશં સમાજગ્મુઃ સ્વકારણાત્ ।
ગર્દભસ્તત્ર ભારેણ પીડિતસ્તુ મમાર હ ॥ ૫૩॥

સ બ્રહ્મણિ તદાકારો બભૂવે દેવસત્તમાઃ ।
પશુજાતિજ એવં તુ નરાણાં તત્ર કા કથા ॥ ૫૪॥

એવં ક્ષેત્રપ્રભાવેણ જના નાના મહેશ્વરાઃ ।
સિદ્ધિં પ્રાપ્તા વિશેષેણ મયા વક્તું ન શક્યતે ॥ ૫૫॥

ઇદં ક્ષેત્રભવં ચિત્રં ચરિતં શ‍ૃણુયાન્નરઃ ।
પઠેદ્યઃ શ્રાવયેદ્વાઽપિ સર્વાર્થં પ્રલભેત્ સદા ॥ ૫૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે મયૂરક્ષેત્રમરણપ્રાપ્તિમાહાત્મ્યવર્ણનં નામ સપ્તદશોઽધ્યાયઃ ॥ ૬.૧૭

## ૬.૧૮ ગર્ભાગારસ્ય પ્રમાણવર્ણનં નામ અષ્ટાદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દેવેશા ઊચુઃ ।
ક્ષેત્રસ્થાનાં ચ યાત્રાયા માહાત્મ્યં વદ યોગિપ ।

કે કે મુખ્યા મહાક્ષેત્રે પૂજ્યા લોકૈર્નિરન્તરમ્ ॥ ૧॥

ભૃશુણ્ડ્યુવાચ ।
ઉત્તરાભિમુખો દેવો ગણેશઃ ક્ષેત્રમધ્યગઃ ।
સંસ્થિતસ્તસ્ય વામાઙ્ગે સિદ્ધિઃ સેવાર્થમાસ્થિતા ॥ ૨॥

ચામરૈર્વ્યજનૈર્યુક્તા નાનાસિદ્ધિસમન્વિતા ।
સેવતે ગણરાજં સા સતી ભક્તિસમન્વિતા ॥ ૩॥

દક્ષિણાઙ્ગે તથા બુદ્ધિર્વિદ્યાભિઃ સંયુતા સ્વયમ્ ।
કલાભિશ્ચ સરસ્વત્યાઃ સમીપે સેવને સ્થિતા ॥ ૪॥

સુગન્ધિવસ્તુભિર્યુક્તા સતી પરમાર્થવાચકા ।
ગણેશં ભાવસંયુક્તા ભજતે નિત્યમાદરાત્ ॥ ૫॥

પુરતો લક્ષલાભૌ તુ ભક્તિનમ્રાત્મકન્ધરૌ ।
સેવેતે તં ગણાધ્યક્ષં નાનોપચારસંયુતૌ ॥ ૬॥

પૃષ્ઠભાગે મહાદેવ્યો ભ્રામર્યા ધારકા મદાઃ ।
નાનાશક્તિયુતા દેવં સેવન્તે ભક્તિસંયુતાઃ ॥ ૭॥

સમાસ્થિતશ્ચાસનાધો ગણેશસ્યેક્ષુસાગરઃ ।
કમલં સાગરોત્થં તુ સહસ્રદલરાજિતમ્ ॥ ૮॥

તીવ્રાદિશક્તિસંયુક્તે તત્ર વિઘ્નેશ્વરઃ સદા ।
તિષ્ઠન્તીમે હિતં દેવાઃ સેવન્તે રસસંયુતાઃ ॥ ૯॥

એવં ગણેશ્વરઃ સર્વૈઃ પૂજનીયો વિશેષતઃ ।
તૈર્યુક્તઃ સર્વદશ્ચૈવ ભવત્યત્ર ન સંશયઃ ॥ ૧૦॥

મયૂરાખૂ તત્પુરશ્ચ સંસ્થિતૌ કરસમ્પુટૈઃ ।
તત્પુરઃ સિદ્ધયોગિન્યો નીરાજયન્તિ વિઘ્નપમ્ ॥ ૧૧॥

પૃષ્ઠભાગે તથા તસ્ય પ્રમોદાદ્યાશ્ચ સાયુધાઃ ।
સંસ્થિતા ભક્તિસંયુક્તાઃ પૂજનીયા નરેણ તે ॥ ૧૨॥

અથ પૂર્વદિશાયાં તુ ધર્મમણ્ડપ ઉચ્યતે ।
તત્ર વિષ્ણુઃ સ્વયં સાક્ષાત્તિષ્ઠતિ સેવનોત્સુકઃ ॥ ૧૩॥

સર્વાન્ કથયતે ધર્માન્ ગાણેશાન્ તત્ર સંસ્થિતઃ ।
ગાણપત્યપ્રિયત્વાત્ સ પૂજનીયો વિશેષતઃ ॥ ૧૪॥

(Page ખં. ૬ અ. ૧૮ પાન ૪૪)
તથા દક્ષિણગઃ શમ્ભુરર્થમણ્ડપમાશ્રિતઃ ।
સ ગાણેશાન્ કથયતે શબ્દાર્થાન્ વિવિધાન્ પરાન્ ॥ ૧૫॥

ગુહ્યાનર્થાન્ સદા દેવઃ પ્રકાશયતિ સર્વદા ।
ગાણેશજ્ઞાનકુશલા ભવન્તે તેન માનવાઃ ॥ ૧૬॥

મણ્ડપઃ કામસંજ્ઞસ્તુ દિશિ દેવાઃ સમીપગાઃ ।
પશ્ચિમાયાં સ્થિતા તત્ર મહાશક્તિર્મહેશ્વરઃ ॥ ૧૭॥

ગણેશકામાનાયાં સા કુરુતે સર્વમાનવાન્ ।
સૌખ્યમાદ્યં કથયતે ગાણેશં પરમાદ્ભુતમ્ ॥ ૧૮॥

ઉત્તરે મણ્ડપો મુક્તેસ્તત્ર સૂર્યઃ પ્રતિષ્ઠતે ।
ગણેશભક્તિયુક્તો બોધયતે વિવિધાન્ નરાન્ ॥ ૧૯॥

ગાણેશીં મુક્તિમાદ્યાં તુ પૂર્ણમોક્ષપ્રદાયિનીમ્ ।
પ્રકાશયતિ તત્રસ્થો જનૈઃ સમ્પૂજિતો રવિઃ ॥ ૨૦॥

ગણેશસન્નિધાને તુ મુદ્ગલાદ્યા મહેશ્વરાઃ ।
મહાભક્તાઃ પ્રતિષ્ઠન્તે ભક્તિં સમ્બોધયન્તિ તે ॥ ૨૧॥

દક્ષિણાઙ્ગે પુરસ્તસ્ય મુદ્ગલો ભક્તનાયકૈઃ ।
અવ્યાહતગતિઃ સોઽપિ ગુહ્યધારક ઉચ્યતે ॥ ૨૨॥

વામાઙ્ગે ગણરાજસ્ય પુરો યોગિસમન્વિતઃ ।
શુકો ગાણેશયોગં બોધયતે સકલાન્ પરમ્ ॥ ૨૩॥

પૂજનીયૌ પ્રયત્નેન ગણેશપુરતઃ સ્થિતૌ ।
મુદ્ગલશ્ચ શુકો દેવાઃ પ્રિયૌ વિઘ્નેશ્વરસ્ય તૌ ॥ ૨૪॥

મણ્ડપા દેવમુખ્યાનાં કથિતાશ્ચ તતઃ પરમ્ ।
વિનાયકાઃ સ્થિતા અષ્ટૌ વક્રતુણ્ડાદયઃ પરાઃ ॥ ૨૫॥

તતોઽષ્ટમાતરઃ પ્રોક્તાસ્તતોઽષ્ટૌ ભૈરવા મતાઃ ।
દિશાં ભાગેષુ દેવેશાઃ પૂજનીયાઃ પ્રયત્નતઃ ॥ ૨૬॥

તતો ગણેશવામાઙ્ગે ચતુર્થી સઙ્કુટા સ્થિતા ।
દક્ષિણાઙ્ગે તથા શુક્લા તિષ્ઠતિ સેવનોત્સુકા ॥ ૨૭॥

પૃષ્ઠભાગે શમી તદ્વત્ પુરો મન્દાર એવ ચ ।
દૂર્વા પુરઃ સ્થિતા એતે સેવન્તે ગણનાયકમ્ ॥ ૨૮॥

નગ્નભૈરવદેવશ્ચ પૂર્વભાગે સમાશ્રિતઃ ।
ભક્તિયુક્તઃ સ્વભાવેન સેવતે ગણનાયકમ્ ॥ ૨૯॥

તથા દક્ષિણગો દેવા નીલકણ્ઠઃ પ્રતાપવાન્ ।
સેવતે વિઘ્નરાજં સ સમાગત્ય નિરન્તરમ્ ॥ ૩૦॥

પશ્ચિમે કૃત્તિવાસાસ્તુ ભીમેશશ્ચોત્તરે તથા ।
સમાગત્ય ગણેશાનં સેવેતે ભક્તિસંયુતૌ ॥ ૩૧॥

તતો દિક્પાલરૂપાશ્ચ સેવન્તે દ્વિરદાનનમ્ ।
સમાગત્ય સશસ્ત્રાસ્તે નિત્યં ભક્તિસમન્વિતાઃ ॥ ૩૨॥

એતે મુખ્યાત્મકાઃ પ્રોક્તા ગર્ભાગારનિવાસિનઃ ।
કેચિદ્વાસકરાસ્તત્ર કેચિત્ સેવાર્થમાગતાઃ ॥ ૩૩॥

અતઃ પરં પ્રવક્ષ્યામિ સદા ગર્ભગૃહસ્થિતાન્ ।
વિનાયકાન્ મહાભાગાન્ સર્વસિદ્ધિપ્રદાયકાન્ ॥ ૩૪॥

વિદર્ભાદ્વક્રતુણ્ડશ્ચ બલ્લાળઃ યલ્લિગઃ તથા ।
હેરમ્બશ્ચ મહેશાના વિદ્યાપુરસમાશ્રિતઃ ॥ ૩૫॥

વિઘ્નેશઃ પારિનેરસ્થો ભાલચન્દ્રસ્તથૈવ ચ ।
ગઙ્ગાતટસ્થો જ્ઞાનેશો દત્તાત્રેયેણ સંયુતઃ ॥ ૩૬॥

ચિન્તામણિઃ સ્થાવરસ્થોઽમરાઃ સિદ્ધિવિનાયકઃ ।
સિદ્ધિક્ષેત્રસ્થ એવં તુ મહાગણપતિસ્તથા ॥ ૩૭॥

મણિપૂઃસ્થો વિઘ્નહરો વિજયસ્થો વિનાયકઃ ।
કશ્યપાલયસંસ્થશ્ચ એલાસ્થો લક્ષવિઘ્નપઃ ॥ ૩૮॥

બઙ્ગાલસ્થો ગણેશાનો વિઘ્નરાજો મહેશ્વરાઃ ।
જીર્ણપૂઃસ્થસ્તથાઽઽશાપૂરકો હ્યમલક્ષેત્રગઃ ॥ ૩૯॥

પ્રવાલસ્થો ગણેશશ્ચ રાજવેશ્મસ્થ એવ ચ ।
ઇત્યાદિ બહવસ્તત્ર ભવન્તિ ગણપાઃ સ્થિતાઃ ॥ ૪૦॥

મયૂરેશં સમાશ્રિત્ય ગર્ભાગારનિવાસિનઃ ।
(Page ખં. ૬ અ. ૧૮ પાન ૪૫)

ભવન્તિ વિઘ્નરાજાશ્ચ સર્વે તસ્ય કલાત્મકાઃ ॥ ૪૧॥

ગર્ભાગારં ગણેશસ્ય મૂર્તિરૂપં મહત્પરમ્ ।
જ્ઞાતવ્યં સર્વભાવેન સેવનીયં વિશેષતઃ ॥ ૪૨॥

શતકોટિગણેશાનાઃ સંસ્થિતા દેવસત્તમાઃ ।
ગર્ભાગારં સમાશ્રિત્ય નિશ્ચિતં ગણપેન ચ ॥ ૪૩॥

નરૈશ્ચ મુનિભિર્દેવૈઃ સ્થાપિતા ગણનાયકાઃ ।
ગર્ભાગારે ચ તે સર્વે બુધૈસ્તેભ્યોઽધિકા મતાઃ ॥ ૪૪॥

ગર્ભાગારે ગણેશાનં સ્વનામ્નાઙ્કિતમાદરાત્ ।
સ્થાપયેત્તેન દેવેશા જગદ્બ્રહ્મ ચ સ્થાપિતે ॥ ૪૫॥

કેનાઽપિ પુણ્યં વક્તું ન શક્યતે દેવસત્તમાઃ ।
મયૂરે ગણનાથસ્ય સ્થાપને સમ્ભવં પરમ્ ॥ ૪૬॥

જીર્ણોદ્ધારં તુ યઃ કુર્યાત્ સ સમ્પૂર્ણફલં લભેત્ ।
મૂર્તિખણ્ડં નરો દૃષ્ટ્વા સાઙ્ગં કુર્યાત્તથા ફલમ્ ॥ ૪૭॥

દેવેશા ઊચુઃ ।
આશ્ચર્યં ભાસતે વાક્યં ત્વદીયં ગુરુસત્તમ ।
એતે ગણેશ્વરાસ્તત્ર કથં તિષ્ઠન્તિ તદ્વદ ॥ ૪૮॥

માનં વદ મહાભાગ સર્વેષાં ચ યથાતથમ્ ।
તેન સંશયહીનાશ્ચ ભવિષ્યામો વયં પ્રભો ॥ ૪૯॥

ભૃશુણ્ડ્યુવાચ ।
પરમાણુસ્વરૂપેણ કેચિત્તત્ર ગણેશ્વરાઃ ।
કેચિત્તુ ત્રસરેણુભિઃ સમાને દેહધારકાઃ ॥ ૫૦॥

અઙ્ગુષ્ઠપર્વમાત્રેણ દેહેન શમ્ભુમુખ્યકાઃ ।
દેવાશ્ચ મુનયઃ સર્વે તિષ્ઠન્ત્યત્ર ન સંશયઃ ॥ ૫૧॥

ચતુર્હસ્તપ્રમાણેન મયૂરેશશ્ચ તિષ્ઠતિ ।
પીઠાદિસંયુતો દેવાઃ સિદ્ધિબુદ્ધી દ્વિહસ્તગે ॥ ૫૨॥

હસ્તમાત્રેણ સર્વે તે પૂર્વસ્મિન્ કથિતા મયા ।
તિષ્ઠન્તિ ગણરાજસ્ય સદા સેવાર્થલાલસાઃ ॥ ૫૩॥

ચતુર્ધનુઃ પ્રમાણેન ધર્મમણ્ડપ એવ યઃ ।

તસ્માદ્ દ્વિગુણિતઃ પ્રોક્તઃ સમન્તાદર્થમણ્ડપઃ ॥ ૫૪॥

તસ્માદ્ દ્વિગુણિતઃ પ્રોક્તઃ કામમણ્ડપ એવ ચ ।
પાદહીનસ્તથા પ્રોક્તસ્તસ્માન્ મુક્તેશ્ચ મણ્ડપઃ ॥ ૫૫॥

ગણેશાદ્વૈ દશધનુર્દ્વારે ધર્મસ્ય મણ્ડપઃ ।
પૂર્વવદ્ દ્વારગાઃ સર્વે મણ્ડપાઃ સ્વસ્વમાનતઃ ॥ ૫૬॥

મણ્ડપાત્ પૂર્વદિગ્દેશે વક્રતુણ્ડઃ સ્થિતો મતઃ ।
બુધૈર્દશધનુર્દૂરે જ્ઞાતવ્યં માનતોઽમરાઃ ॥ ૫૭॥

દશ પઞ્ચધનુર્દૂરે સંસ્થસ્તત્રૈકદન્તકઃ ।
એવં પઞ્ચ પ્રવૃદ્ધ્યા તુ ધનુષાં દિક્ષુ વિઘ્નપાઃ ॥ ૫૮॥

અષ્ટભ્યો ગણનાથેભ્યો દૂરે પઞ્ચધનુષ્કતઃ ।
માતૃકા સંસ્થિતાશ્ચૈવ વૃદ્ધ્યા ક્ષેત્રં યથાઽભવત્ ॥ ૫૯॥

તેભ્યઃ પઞ્ચધનુષ્કે તુ ચતુર્થી સંસ્થિતા મતા ।
વૃદ્ધિન્યૂનત્વમાનેન ક્ષેત્રસામાન્યભાવતઃ ॥ ૬૦॥

તેભ્યઃ પઞ્ચધનુષ્કે તુ ચતુર્થી સંસ્થિતા મતા ।
પૂર્વભાગે તથાઽન્યાશ્ચ વૃદ્ધિન્યૂનત્વમાનતઃ ॥ ૬૧॥

તતઃ પઞ્ચધનુષ્કે તુ દૂરે પૂર્વદિશિ સ્થિતઃ ।
નગ્નભૈરવનામા ચાન્યે તદ્વત્ ક્ષેત્રમાનતઃ ॥ ૬૨॥

તેભ્યઃ પઞ્ચધનુષ્કે તુ દિક્પાલાઃ સંસ્થિતા મતાઃ ।
વૃદ્ધિન્યૂનત્વમાનેન યથા ક્ષેત્રં પ્રકીર્તિતમ્ ॥ ૬૩॥

પૂર્વેશાનદિશોર્મધ્યે પ્રજાપતિઃ સ્થિતઃ સ્વયમ્ ।
નૈરૃતી પશ્ચિમાઽઽશાગઃ શેષસ્તત્ર મહેશ્વરાઃ ॥ ૬૪॥

તેભ્યઃ પઞ્ચધનુષ્કે તુ વજ્રાદીનિ સ્થિતાનિ ચ ।
ક્ષેત્રમાનપ્રમાણેન વૃદ્ધિન્યૂનેન નિશ્ચિતમ્ ॥ ૬૫॥

(Page ખં. ૬ અ. ૧૯ પાન ૪૬)
એવં સર્વં મયા પ્રોક્તં યથાશાસ્ત્રં વિધાનતઃ ।
ગર્ભાગારસ્ય વિસ્તારમાહાત્મ્યં દેવસત્તમાઃ ॥ ૬૬॥

અન્યે નાના ગણેશાના ગાણેશાઃ સંસ્થિતાઃ પરે ।
સેવાર્થં ગણનાથસ્ય ગર્ભાગારે જગદ્ધિતાઃ ॥ ૬૭॥

ઇદં શ્ૃણોતિ પઠતિ યશ્ચિત્રં ભક્તિસંયુતઃ ।
સ સર્વપાપહીનશ્ચ ભવેદ્વૈ દેવસત્તમાઃ ॥ ૬૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે ગર્ભાગારસ્ય પ્રમાણવર્ણનં નામ અષ્ટાદશોઽધ્યાયઃ ॥ ૬.૧૮

## ૬.૧૯ ક્ષેત્રવાસિચરિતવર્ણનં નામૈકોનવિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દેવેશા ઊચુઃ ।
અધુના વદ માહાત્મ્યં દેવાગારસ્ય માનદ ।
કે કે મુખ્યા જનૈઃ પૂજ્યાઃ સંસ્થિતા ગણપે રતાઃ ॥ ૧॥

ભૃશુણ્ડ્યુવાચ ।
દ્વારકાસહિતો વિષ્ણુર્દેવાગારે સમાશ્રિતઃ ।
પૂર્વભાગે ગણેશાત્તુ દિશિ દેવેન્દ્રસત્તમાઃ ॥ ૨॥

યાવન્તિ વૈષ્ણવાન્યેવ ક્ષેત્રાણિ વિવિધાનિ ચ ।
મથુરાદ્યાનિ સર્વાણિ પૂર્વભાગે સ્થિતાનિ વૈ ॥ ૩॥

તત્ર મધ્યે મહેશાના દ્વારકાશતમઞ્જસા ।
ધનુષાં તુ પ્રમાણેન ગર્ભાગારાત્ પ્રકીર્તિતા ॥ ૪॥

તત્ર કૃષ્ણશ્ચ રામશ્ચ પ્રદ્યુમ્નો હ્યનિરુદ્ધકઃ ।
સમાતસ્થુર્ગણેશસ્ય ભક્ત્યર્થં ભક્તસત્તમાઃ ॥ ૫॥

ગણેશાનં પુષ્ટિપતિં સ્થાપયિત્વા જનાર્દનઃ ।
સેવતે તં મહાભાગા દ્વારકાવાસિનસ્તથા ॥ ૬॥

ગોમતી કુણ્ડરૂપેણ સ્વયં તત્રૈવ સંસ્થિતા ।
સ્નાનમાત્રેણ જન્તૂનાં બ્રહ્મહત્યાં વિનશ્યતિ ॥ ૭॥

કૃષ્ણપક્ષે નરો નારી શ્રાવણે તુ જનાર્દનમ્ ।
મયૂરે પૂજયેત્ ક્ષેત્રે વાસકૃત્ સર્વદાયકમ્ ॥ ૮॥

તેષાં પૂજનમાત્રેણ સદ્યઃ પાપવિવર્જિતઃ ।
મનેપ્સિતં લભેદ્ દેવાઃ શતયજ્ઞફલં તથા ॥ ૯॥

મથુરાવામભાગે તુ દ્વારકાયાઃ સમાસ્થિતા ।
તાવન્માનેન દેવેશાઃ સર્વાર્થસ્ય પ્રદાયિની ॥ ૧૦॥

બાલરૂપધરૌ તત્ર રામકૃષ્ણૌ સમાસ્થિતૌ ।
પૂજનીયૌ નરેણૈવ સર્વકામફલપ્રદૌ ॥ ૧૧॥

ગૌરીવિનાયકં તત્ર સ્થાપયિત્વા સ્વહર્ષતઃ ।
જનૈઃ સહ મહાભક્તૌ સેવેતે તં જનાર્દનૌ ॥ ૧૨॥

તત્રૈવ યમુના સાક્ષાત્ સંસ્થિતા હૃદરૂપિણી ।
તસ્યાં સ્નાનેન દેવેશાઃ સર્વપાપક્ષયો ભવેત્ ॥ ૧૩॥

કૃષ્ણાષ્ટમ્યાં વિશેષેણ તયોર્યાત્રા પ્રકીર્તિતા ।
માસે માસે જનાનાં સા દહતિ હ્યશુભં મહત્ ॥ ૧૪॥

અયોધ્યા દક્ષિણાઙ્ગેઽસ્યાસ્તાવન્માનેન સંસ્થિતા ।
દ્વારકાયાશ્ચ તત્રૈવ શરયૂકુણ્ડકં સ્થિતમ્ ॥ ૧૫॥

તત્ર સ્નાનેન જન્તૂનાં પાપં નશ્યતિ તત્ક્ષણાત્ ।
ઇહજન્મકૃતં સર્વં સ્વર્ગદં કુણ્ડમઞ્જસા ॥ ૧૬॥

તત્ર રામો લક્ષ્મણશ્ચ ભરતઃ શત્રુસૂદનઃ ।
(Page  ખં. ૬ અ. ૧૯ પાન ૪૭)
સ્થિતાઃ સંસ્થાપ્ય હેરમ્બં સેવાયાં તત્પરા જનૈઃ ॥ ૧૭॥

ચૈત્રશુક્લનવમ્યાં તુ યાત્રાં તત્ર પ્રકુર્વતે ।
ક્ષેત્રવાસિન આનન્દાદ્વાર્ષિકીં દુરિતાપહામ્ ॥ ૧૮॥

દ્વારકાયાઃ પુરોભાગે વ્યાસઃ સત્યવતીસુતઃ ।
સંસ્થિતઃ સર્વધર્મજ્ઞો દશધનુઃપ્રમાણતઃ ॥ ૧૯॥

તત્પુરો નૃહરિશ્ચૈવ વામનસ્તત્પુરોઽભવત્ ।
મત્સ્યસ્તત્પુરતો વિષ્ણુસ્તતો બુદ્ધઃ પ્રકીર્તિતઃ ॥ ૨૦॥

નરનારાયણૌ દેવૌ તત્પુરઃ સંસ્થિતૌ કિલ ।
હયગ્રીવસ્તતઃ પ્રોક્તઃ સમાનમાનતઃ સ્થિતઃ ॥ ૨૧॥

તથા વામાઙ્ગભાગે યે ધનુષાં દશકે પરે ।
તિષ્ઠન્તિ વિષ્ણુરૂપાશ્ચ મથુરાયાઃ સુખપ્રદાઃ ॥ ૨૨॥

તાન્ શ ृણુધ્વં મહેશાનાઃ કથયામિ સમાસતઃ ।

કૂર્મઃ પરશુરામશ્ચ કલ્કી પૃશ્નિસુતસ્તસ્થા ॥ ૨૩॥

કપિલઃ સિદ્ધેશઃ શેષઃ સનકાદ્યાશ્ચ યોગિનઃ ।
ભજન્તિ સ્વસ્વનામાઙ્કાનાસ્થાપ્ય ગણનાયકાન્ ॥ ૨૪॥

અયોધ્યાયાઃ પુરઃ સમ સંસ્થિતાશ્ચ જનાર્દનાઃ ।
તાવન્માનેન દેવેશાસ્તાન્ શ઼ૃણુધ્વં સમાસતઃ ॥ ૨૫॥

નારદઃ કાર્તવીર્યશ્ચાત્રિતો યજ્ઞસ્તથા પરઃ ।
ઋષભશ્ચ પૃથુર્વૈન્યો મોહિની યા સ્મૃતા બુધૈઃ ॥ ૨૬॥

સ્વસ્વેષ્ટનામકાંસ્તત્રાસ્થાપ્ય વિઘ્નેશ્વરાન્ પરાન્ ।
ભજન્તે ભાવયુક્તાશ્ચ સદા ક્ષેત્રનિવાસનઃ ॥ ૨૭॥

દ્વાદશ્યાં પ્રતિમાસેષુ પૂજનીયાઃ ક્રમેણ તુ ।
ચતુર્વિંશતિદેવેશ વિષ્ણવઃ ક્ષેત્રવાસિભિઃ ॥ ૨૮॥

દ્વારકાસ્થસમાયુક્તાસ્તત્ર વિષ્ણવંશસમ્ભવાઃ ।
અવાન્તરે સ્થિતાઃ સર્વે મયૂરે હિતકારકાઃ ॥ ૨૯॥

સ્વયં વિષ્ણુસ્તતસ્તત્ર તિષ્ઠતિ ક્ષેત્રગોઽમરાઃ ।
વિકુણ્ઠં તત્ સમાખ્યાતં ધનુષાં દ્વિશતાત્મકમ્ ॥ ૩૦॥

એકાદશ્યાં જનાઃ સાક્ષાત્ પૂજયન્તિ નિરન્તરમ્ ।
તેન સૌભાગ્યસંયુક્તા ભવિષ્યંન્તિ મયૂરકે ॥ ૩૧॥

અન્યે નાનાઽવતારાશ્ચ ક્ષેત્રાણિ વિવિધાનિ તુ ।
સંસ્થિતાનિ મયૂરેઽસ્મિન્ ગણેશે ભક્તિકારણાત્ ॥ ૩૨॥

વિકુણ્ઠવાસી ભગવાન્ સદા સિદ્ધિવિનાયકમ્ ।
સ્થાપ્ય પૂજ્યં વિધાનેન ભજતેઽનન્યભાવતઃ ॥ ૩૩॥

અન્યે યે સ્વસ્વનામ્ના તે ગણેશાન્ સ્વેષ્ટરૂપકાન્ ।
વિષ્ણવઃ સ્થાપયિત્વા તં ભજન્તેઽનન્યભાવતઃ ॥ ૩૪॥

ગર્ભાગારસ્ય દેવેશાઃ પૂર્વાઙ્ગં વર્ણિતં મયા ।
સઙ્ક્ષેપેણાધુના તદ્વત્ દક્ષિણાઙ્ગં તુ વર્ણયે ॥ ૩૫॥

ગર્ભાગારાત્ સ્વયં કાશી સંસ્થિતા મધ્યભાગતઃ ।
ધનુષાં દ્વે શતે તસ્યા માનં ક્ષેત્રે પ્રકીર્તિતમ્ ॥ ૩૬॥

તત્ર તિષ્ઠતિ વિશ્વેશો દેવો ભક્તિપરાયણઃ ।
ઢુણ્ઢિરાજં સમાસ્થાપ્ય ભજતેઽનન્યચેતસા ॥ ૩૭॥

મણિકર્ણી હ્રદસ્તત્ર વર્તતે પાપહારકઃ ।
સ્નાનેન માનવસ્યૈવ બ્રહ્મઘ્નઃ પાતકં વ્રજેત્ ॥ ૩૮॥

ભાગીરથી સરસ્તત્ર વર્તતે દેવનાયકાઃ ।
સદ્યઃ સ્નાનેન પાપાનિ લયં ગચ્છન્તિ નિશ્ચિતમ્ ॥ ૩૯॥

પ્રદોષે પૂજનં તસ્ય કુર્વન્તિ ક્ષેત્રવાસિનઃ ।
માઘકૃષ્ણચતુર્દશ્યાં યાત્રાં કુર્વન્તિ માનવાઃ ॥ ૪૦॥

વાર્ષિકીં વિશ્વનાથસ્ય યાત્રાં ક્ષેત્રનિવાસિનઃ ।
જનાઃ કુર્વન્તિ તે સર્વે ભવન્તિ સુખભોગિનઃ ॥ ૪૧॥

તસ્યા વામાઙ્ગકે દેવાસ્તાવન્માનેન સંસ્થિતા ।
અવન્તી સર્વદા પુણ્યા મહાકાલશ્ચ શઙ્કરઃ ॥ ૪૨॥

ક્ષિપ્રાનદીભવં કુણ્ડં વર્તતે તત્ર પાપહૃત્ ।
(Page ખં. ૬ અ. ૧૯ પાન ૪૮)
મહાકાલસ્ય કુણ્ડં તુ સ્નાનેન પાપનાશનમ્ ॥ ૪૩॥

સોમવારે પ્રદોષે તમર્ચયન્તિ વિશેષતઃ ।
તે સર્વે ધનધાન્યૈશ્ચ સંયુક્તા નિવસન્તિ હિ ॥ ૪૪॥

કાશ્યા દક્ષિભાગે તુ તાવન્માનેન સંયુતા ।
માયાપુરી મહેશાના દક્ષયજ્ઞચ્છિદીશ્વરઃ ॥ ૪૫॥

પ્રદોષે ચ ત્રયોદશ્યાં શનિયુક્તે મહેશ્વરમ્ ।
પૂજયેત્તં નરશ્ચૈવ ક્ષેત્રસ્થઃ સર્વમાપ્નુયાત્ ॥ ૪૬॥

તત્ર દ્વારં ચ ગઙ્ગાયાઃ સંસ્થિતં કુણ્ડરૂપકમ્ ।
નરઃ સ્નાનેન સદ્યશ્ચ ફલં પ્રાપ્નોતિ વાઞ્છિતમ્ ॥ ૪૭॥

કાશ્યાશ્ચ પુરતો દેવાસ્ત્ર્યમ્બકઃ સંસ્થિતો મહાન્ ।
ધનુષાં શતકેનૈવ માનેન તસ્ય ક્ષેત્રકમ્ ॥ ૪૮॥

નદીસ્વરૂપેણ ગોદાવરી તત્ર મહાનદી ।
સંસ્થિતા સ્નાનમાત્રેણ ગોઘ્નાદ્યઘં વિનશ્યતિ ॥ ૪૯॥

કપિલં ગણનાથં સ ત્ર્યમ્બકઃ સ્થાપ્ય નિત્યદા ।

પુપૂજ ભક્તિસંયુક્તો ગાણપત્યપ્રભાવવિત્ ॥ ૫૦॥

ક્ષેત્રગો વૈદ્યનાથસ્તુ તાવન્માનેન તત્પુરઃ ।
સ્થિતઃ સર્વાર્થદો દેવો ભક્તાનાં ભવનાશકૃત્ ॥ ૫૧॥

ભવરોગવિનાશાર્થં વૈદ્ય એકઃ શિવઃ સ્મૃતઃ ।
દદાતિ ગણનાથાખ્યમૌષધં યોગમિચ્છતામ્ ॥ ૫૨॥

ઉત્કટેશસ્તત્પુરશ્ચ તાવન્માને સંસ્થિતઃ ।
ઉત્કણ્ઠાં ભક્તિમિચ્છન્ સન્ ગણેશસ્ય મહાત્મનઃ ॥ ૫૩॥

ત્ર્યમ્બકસ્ય તથા વામે રામેશઃ સંસ્થિતઃ શિવઃ ।
તાવન્માનેન તત્ ક્ષેત્રે સમુદ્રઃ કુણ્ડરૂપતઃ ॥ ૫૪॥

તત્પુરઃ સોમનાથસ્તુ તત્પુરો મલ્લિકાર્જુનઃ ।
તાવન્માનેન સંયુક્તૌ સ્વસ્વતીર્થસમન્વિતૌ ॥ ૫૫॥

દક્ષિણાઙ્ગે ત્ર્યમ્બકસ્ય ઘુસૃણેશઃ સ્થિતઃ પ્રભુઃ ।
તથોઙ્કારેશ્વરો દેવોઽપ્યમલેશ્વરસંયુતઃ ॥ ૫૬॥

સરઃસ્વરૂપેણ તત્ર નર્મદા સંસ્થિતા નદી ।
દર્શનેનેહ યત્ પાપં જન્તૂનાં નાશયેત્ સદા ॥ ૫૭॥

સ્નાનમાત્રેણ દેવેશા દશજન્મકૃતં મહત્ ।
પાપં નશ્યતિ જન્તોશ્ચ નિશ્ચિતં મુનિભિઃ પુરા ॥ ૫૮॥

તતઃ કેદારશમ્ભુશ્ચ ક્રમેણ દેવસત્તમાઃ ।
તાવન્માનેન સંયુક્તાઃ શિવા એતે પ્રકીર્તિતાઃ ॥ ૫૯॥

સ્વસ્વનામ્નાઙ્કિતાન્ સર્વે સદાઽઽસ્થાપ્ય ગણેશ્વરાન્ ।
સેવન્તે ભક્તિસંયુક્તાઃ શિવા એતે પ્રકીર્તિતાઃ ॥ ૬૦॥

કૃષ્ણપક્ષે ચતુર્દશ્યાં માસે માસે મહેશ્વરાઃ ।
સેવનીયાઃ પ્રયત્નેન ક્ષેત્રવાસિભિરાદરાત્ ॥ ૬૧॥

તતઃ પુરો મહાક્ષેત્રે કૈલાસે વાસકારકઃ ।
શિવઃ સાક્ષાત્ સ્થિતસ્તત્ર ધનુષાં ચ ચતુઃશતે ॥ ૬૨॥

ક્ષેત્રં કૈલાસનાથસ્ય તત્ર ભાગીરથી નદી ।
સ્વયં સ્થિતા વિશેષેણ સ્નાનમાત્રેણ સર્વદા ॥ ૬૩॥

મહાગણપતિં સ્થાપ્ય પૂજતિ નિત્યમાદરાત્ ।
ભજતે તં શિવઃ સાક્ષાદ્ગાણપત્યાગ્રણીર્મહાન્ ॥ ૬૪॥

અન્યશઙ્કરક્ષેત્રાણિ શિવા નાનાવિધા મતાઃ ।
સંસ્થિતાનિ સ્થિતાઃ સર્વે ક્ષેત્રસંન્યાસભક્તિતઃ ॥ ૬૫॥

તેષાં સ્થાનાદિકથયિતું દેવા ન પ્રશક્યતે ।
સ્વસ્વનામયુતાન્ પૂજન્ત્યાસ્થાપ્ય ગણનાયકાન્ ॥ ૬૬॥

દક્ષિણે કથિતં શૈવં પરં દેવાલયં મયા ।
સઙ્ક્ષેપેણ મહાભાગા અધુના પશ્ચિમં વદે ॥ ૬૭॥

શતેષુ ગર્ભાગારાચ્ચ ધનુષાં પઞ્ચસુ સ્થિતા ।
મહાલક્ષ્મીઃ સ્વયં સાક્ષાદ્ભક્તેભ્યઃ કામદાયિની ॥ ૬૮॥

લક્ષ્મીકુણ્ડભવં તીર્થં સંસ્થિતં તત્ર પાપહૃત્ ।
(Page ખં. ૬ અ. ૧૯ પાન ૪૯)
સ્નાનમાત્રેણ સદ્યો દરિદ્રતાનાશકારકમ્ ॥ ૬૯॥

તસ્યા વામાઙ્ગકે શક્તિર્મહાકાલી સમાસ્થિતા ।
કાલીસરશ્ચ તત્રૈવ સંસ્થિતં પાપનાશનમ્ ॥ ૭૦॥

મહાસરસ્વતી શક્તિર્દક્ષિણાઙ્ગે સ્થિતા તથા ।
સારસ્વતં મહત્ કુણ્ડં તત્ર જાડ્યવિનાશનમ્ ॥ ૭૧॥

સ્વાનન્દવાસમાસ્થાપ્ય ભજતે ગણનાયકમ્ ।
મહાલક્ષ્મીર્મહેશાના અષ્ટમ્યાં પૂજ્યતે નરૈઃ ॥ ૭૨॥

સિદ્ધીશં તુ મહાકાલ્યાસ્થાપ્ય ભક્તિપરાયણા ।
ભજતે નિત્યમાનન્દાદ્ભૂતાયાં પૂજ્યતે તથા ॥ ૭૩॥

બુદ્ધીશં તુ તૃતીયાયાં મહાસરસ્વતી નરૈઃ ।
શક્તિયુક્તા સ્થાપ્ય નિત્યં ભજતે પૂજ્યતે પરા ॥ ૭૪॥

મહાલક્ષ્મ્યાઃ પુરશ્ચૈવ વિષ્ણુકાઞ્ચી સ્થિતા પુરી ।
લક્ષ્મ્યા વિષ્ણુઃ સ્થિતસ્તત્ર ભજતે સ્થાપ્ય વિઘ્નપમ્ ॥ ૭૫॥

અષ્ટમ્યાં પૂજનીયોઽસૌ ક્ષેત્રવાસિભિરાદરાત્ ।
પાપનાશકરસ્તેષાં ભવતે સર્વદાયકઃ ॥ ૭૬॥

તત્પુરો માતૃકાણાં ચ ધનુષાં દ્વિશતાત્મકમ્ ।

ક્ષેત્રં તુ સંસ્થિતં તત્ર માહેશ્વર્યા મહાદ્ભુતમ્ ॥ ૭૭॥

તત્પુરસ્તાવતા માનેન યુતં ક્ષેત્રમુત્તમમ્ ।
કૌમાર્યસ્તત્ર સંસ્થા સા તીર્થૈનૈવ સમાયુતા ॥ ૭૮॥

તતઃ ક્ષેત્રં સમાખ્યાતં વારાહ્યાઃ સર્વદં પરમ્ ।
તત્ર શક્તિઃ સ્થિતા સાક્ષાદ્વારાહી દુરિતાપહા ॥ ૭૯॥

તત ઐન્દ્યા મહાક્ષેત્રં પૂર્વમાનેન કીર્તિતમ્ ।
ઐન્દ્રી ગણેશ્વરં તત્ર ભજતેઽનન્યચેતસા ॥ ૮૦॥

મહાકાલ્યાઃ પુરશ્ચૈવ પૂર્વમાનેન સંસ્થિતા ।
નારસિંહી મહાશક્તિર્દૈત્યેભ્યો ભયદાયિની ॥ ૮૧॥

તતઃ શાકમ્ભરી શક્તિશ્ચ તતો રક્તદન્તિકા ।
તતો ભીમા મહેશાનાઃ સંસ્થિતા તીર્થસંયુતા ॥ ૮૨॥

અથો મહાસરસ્વત્યાસ્તાવન્માનેન સંસ્થિતા ।
પુરસ્તુ વૈષ્ણવી દેવી તતો બ્રાહ્મી સ્થિતા મતા ॥ ૮૩॥

ચામુણ્ડા ચ તતઃ પ્રોક્તા તત્પુરસ્ત્રિપુરા મતા ।
સમાનમાનભાવેન સંસ્થિતા શક્તયઃ પરાઃ ॥ ૮૪॥

કુણ્ડરૂપેણ તીર્થાનિ સ્વસ્વક્ષેત્રગતાનિ તુ ।
કૃત્વા તાઃ શક્તયઃ સર્વાઃ મયૂરે સંસ્થિતાઃ સદા ॥ ૮૫॥

સ્વસ્વનામ્નાઙ્કિતાનાસ્થાપ્ય ગણેશાંશ્ચ દેવપાઃ ।
ભજન્તેઽનન્યભાવેન ગાણપત્યસ્વભાવતઃ ॥ ૮૬॥

અન્યાનિ શક્તિક્ષેત્રાણિ શક્તયશ્ચ સમાશ્રિતાઃ ।
નરૈસ્તાસાં નવમ્યાં તુ યાત્રા કાર્યા સુખપ્રદા ॥ ૮૭॥

તાસાં નામાદિકં દેવા મયા વક્તું ન શક્યતે ।
મુખ્યાસ્તુ નવકોટ્યો વૈ જ્ઞાતવ્યં વિબુધૈઃ સદા ॥ ૮૮॥

ધનુઃ પઞ્ચશતં તસ્માચ્છક્તિર્લમ્બોદરં પરમ્ ।
આસ્થાપ્ય ભજતે તસ્યા યાત્રાઽષ્ટમ્યાં પ્રકીર્તિતા ॥ ૮૯॥

અથોત્તરગતાન્ વક્ષ્યે દેવાન્ દેવાલયે સ્થિતાન્ ।
સમાસેન મહેશાનાઃ શ‍ૃણુત પરમાર્થદાન્ ॥ ૯૦॥

ગર્ભાગારાત્ સમારભ્ય ચતુઃશતં પિતામહઃ ।
ધનુષાં ક્ષેત્રગઃ સોऽપિ તિષ્ઠતિ વેદસંયુતઃ ॥ ૯૧॥

તાવન્માનેન વામાઙ્ગે તસ્યાગ્નિઃ સંસ્થિતો મહાન્ ।
અગ્નિભિઃ સહિતસ્તત્ર સેવતે ગણનાયકમ્ ॥ ૯૨॥

દક્ષિણાઙ્ગે સ્વયં કર્મ સહ તિષ્ઠતિ કર્મભિઃ ।
સૂર્યકલાંશસમ્ભૂતાસ્ત્રયો મુખ્યા ઇતિ સ્મૃતાઃ ॥ ૯૩॥

બ્રહ્માણં ચ સમાશ્રિત્ય સરઃ સારસ્વતં સ્થિતમ્ ।
સરસ્વતી નદીરૂપા તત્ર તિષ્ઠતિ નિત્યદા ॥ ૯૪॥

(Page ખં. ૬ અ. ૧૯ પાન ૫૦)
તત્ર સ્નાનેન પાપાનિ પ્રણશ્યન્તિ મહાન્તિ ચેત્ ।
જાડ્યભાવો નશ્યતિ ચ નરાણાં દેવસત્તમાઃ ॥ ૯૫॥

સિદ્ધિબુદ્ધિપતિં સ્થાપ્ય સેવતે ચતુરાનનઃ ।
સદા ગણેશપૂજાયાં તત્પરો ભક્તિસંયુતઃ ॥ ૯૬॥

તથાऽગ્નિશ્ચ મહાત્માનં વિનાયકં નિરન્તરમ્ ।
આસ્થાપ્ય ભક્તિસંયુક્તો ભજતે નિત્યમાદરાત્ ॥ ૯૭॥

આગ્નેયં તત્ર કુણ્ડં તુ સર્વાઘશમનં સ્થિતમ્ ।
સ્નાનમાત્રેણ જન્તૂનામગ્નિલોકપ્રદં ભવેત્ ॥ ૯૮॥

કર્મનાશકરં કુણ્ડં સમીપં કર્મણઃ સ્થિતમ્ ।
સ્નાનેન ત્રિવિધં તત્ર કૃતં કર્મ વિનશ્યતિ ॥ ૯૯॥

બ્રહ્મણઃ પુરતો દેવા ધનુષાં દ્વિશતાત્મકમ્ ।
ક્ષેત્રં વેદાઙ્ગનામ્નશ્ચ પરં સૂર્યસ્ય સંસ્થિતમ્ ॥ ૧૦૦॥

ભાનુક્ષેત્રં તત્પુરસ્તાવતા માનેન સંયુતમ્ ।
ઇન્દ્રનામ્નસ્તત્પુરસ્તુ ક્ષેત્રં સર્વપ્રદાયકમ્ ॥ ૧૦૧॥

અગ્નેઃ પુરસ્તથા ક્ષેત્રં રવેસ્તાવત્પ્રમાણકમ્ ।
તતઃ ક્ષેત્રં ગભસ્તેશ્ચ યમસ્ય ચ તતઃ પરમ્ ॥ ૧૦૨॥

કર્મણશ્ચ પુરોભાગે તાવન્માનયુતં મહત્ ।
સુવર્ણરેતસઃ ક્ષેત્રં તતો દૈવાકરં મતમ્ ॥ ૧૦૩॥

તતઃ ક્ષેત્રં તુ મિત્રસ્ય તતો વિષ્ણોઃ પ્રકીર્તિતમ્ ।

વરુણસ્ય ક્ષેત્રમિન્દ્રાત્ પુરઃ સર્વાઘનાશનમ્ ॥ ૧૦૪॥

યમાત્ પુરસ્તુ સૂર્યસ્ય ક્ષેત્રં તત્ર પ્રકીર્તિતમ્ ।
સમાનમાનભાવેન સ્થિતા દ્વાદશ ભાનવઃ ॥ ૧૦૫॥

સ્વસ્વતીર્થૈઃ સમાયુક્તાઃ કુણ્ડરૂપૈર્મહેશ્વરાઃ ।
સ્વસ્વનામ્ના સ્થાપ્ય સેવન્તે ગણેશાન્નિરન્તરમ્ ॥ ૧૦૬॥

તત્પુરઃ શિવકાઞ્ચી તુ તસ્યાં શક્ત્યા શિવઃ સ્થિતઃ ।
સોમયુક્તો પ્રદોષે સ જનૈઃ પૂજ્યઃ સુખપ્રદઃ ॥ ૧૦૭॥

ભજતે સર્વભાવેનાસ્થાપ્ય હેરમ્બમાદરાત્ ।
તીર્થં તસ્ય સ્થિતં તત્ર સર્વાઘશમનં પરમ્ ॥ ૧૦૮॥

જનૈઃ પૂજ્યઃ પ્રતિપદિ ક્ષેત્રસ્થોઽગ્નિઃ પ્રતાપવાન્ ।
સર્વપાપનિહન્તા ચ દ્રવ્યલાભપ્રદો ભવેત્ ॥ ૧૦૯॥

સપ્તમ્યાં સર્વદા દેવાઃ પૂજનીયઃ પિતામહઃ ।
જાડ્યભાવહરઃ સોઽપિ ભવત્યત્ર ન સંશયઃ ॥ ૧૧૦॥

ભાનુસપ્તમિકાયાં તુ કર્મ સમ્પૂજયન્તિ યે ।
સર્વદોષવિહીનાશ્ચ કર્મણાં સમ્ભવન્તિ તે ॥ ૧૧૧॥

સઙ્ક્રમેષુ સદા પૂજ્ય ભાનૂન્ દ્વાદશ સંસ્થિતાન્ ।
સર્વરોગાદિનિર્મુક્તા ભવન્તિ ક્ષેત્રવાસિનઃ ॥ ૧૧૨॥

તેષાં પુરઃ સ્વયં નિત્યં તિષ્ઠતિ સૌરલોકગઃ ।
ચતુઃશતં તુ ધનુષાં ક્ષેત્રં તસ્ય મહાત્મનઃ ॥ ૧૧૩॥

રવિવારે તુ દેવેશઃ પૂજનીયો નિરન્તરમ્ ।
નરઃ સર્વાર્થસંસિદ્ધિં લભતે મુક્તિમુત્તમામ્ ॥ ૧૧૪॥

વરદં ગણનાથં સંસ્થાપ્ય પૂજાપરાયણઃ ।
ભજતે આદિદેવસ્તં સૂર્યઃ કાલભૃતાં વરઃ ॥ ૧૧૫॥

તત્પુરશ્ચન્દ્રમા દેવાઃ સંસ્થિતઃ શતમાનતઃ ।
ધનુષાં ક્ષેત્રમેતત્તુ તસ્ય સર્વાન્નદાયકમ્ ॥ ૧૧૬॥

તતઃ પુરો બુધઃ પ્રોક્તસ્તાવતા માનકેન ચ ।
તત્પુરઃ સંસ્થિતો જીવઃ ક્ષેત્રવાસપરાયણઃ ॥ ૧૧૭॥

ચન્દ્રવામાઙ્ગસંસ્થશ્ચ ભૌમો દેવપરાયણઃ ।
તત્પુરો ભાર્ગવઃ શ્રેષ્ઠસ્તત્પુરસ્તુ શનૈશ્ચરઃ ॥ ૧૧૮॥

ચન્દ્રસ્ય દક્ષિણે ભાગે રાહુઃ સર્વારિમર્દનઃ ।
તત્પુરઃ કેતુરેવં ચ નક્ષત્રાણિ તતઃ પુરઃ ॥ ૧૧૯॥

આસ્થાપ્ય સ્વસ્વનામાઙ્કાન્ ગણેશાન્ ભક્તિતત્પરઃ ।
ભાનિ ગ્રહા ભજન્તે તં ક્ષેત્રવાસપરાયણાઃ ॥ ૧૨૦॥

(Page  ખં. ૬ અ. ૧૯ પાન ૫૧)
સ્વસ્વાઙ્કિતેષુ વારેષુ પૂજનીયા ઇમે નરૈઃ ।
પૂર્ણિમાયાં તમશ્ચૈવામાવાસ્યાયાં ચ કેતુકઃ ॥ ૧૨૧॥

અન્યે સૂર્યાવતારાશ્ચ સ્વસ્વક્ષેત્રૈઃ સ્થિતાઃ કિલ ।
તેષાં નામાદિ કથયિતું દેવાઃ શક્યતે ન વૈ ॥ ૧૨૨॥

દેવાલયાદષ્ટદિક્ષુ ભૈરવા અષ્ટમુખ્યકાઃ ।
નાના ભૈરવસંયુક્તાઃ સંસ્થિતા દેવતત્પરાઃ ॥ ૧૨૩॥

તત ઇન્દ્રો હવ્યવાહઃ પૂર્વભાગે સમાશ્રિતૌ ।
યમપો નિરૃતિસ્તદ્વદ્દક્ષિણાઙ્ગે ચ તિષ્ઠતઃ ॥ ૧૨૪॥

પશ્ચિમે વરુણો વાયુઃ તિષ્ઠતઃ ક્ષેત્રસેવકૌ ।
ધનપો નિરૃતિસ્તદ્વદુત્તરાઙ્ગે સમાસ્થિતૌ ॥ ૧૨૫॥

અષ્ટમ્યાં ભૈરવાઃ પૂજ્યા જનૈઃ પૈશાચનાયકાઃ ।
ભૂતાદીનાં વિશેષેણ ભવન્તિ ભયનાશકાઃ ॥ ૧૨૬॥

દશમ્યાં દશ દિક્પાલાઃ પૂજનીયાઃ પ્રયત્નતઃ ।
ચૌરાદિજં ભયં સર્વં નાશયિષ્યન્તિ સર્વદા ॥ ૧૨૭॥

સ્વસ્વનામાઙ્કિતાનાસ્થાપ્ય દિગીશા ગણેશ્વરાન્ ।
પૂજયન્તિ ભજન્તે તં ભૈરવાશ્ચ મહેશ્વરાઃ ॥ ૧૨૮॥

પૂજનીયૌ દ્વિતીયાયામશ્વિનૌ પૂર્વદિક્ સ્થિતૌ ।
દ્વારસ્ય સન્નિધાને તુ ધનુષાં શતમાનતઃ ॥ ૧૨૯॥

દેવાગારે ગણેશં સંસ્થાપ્ય નિત્યં મહાપ્રભુમ્ ।
ભજતસ્તેન સર્વેષાં રૂપલાવણ્યદૌ મતૌ ॥ ૧૩૦॥

દક્ષિણે સંસ્થિતૌ તદ્વદ્ગૌરીસ્કન્દૌ પરેશ્વરમ્ ।

આસ્થાપ્ય પૂજ્ય વિઘ્નેશં ભજતો નિત્યમાદરાત્ ॥ ૧૩૧॥

તયોઃ પૂજનમાત્રેણ ભવેત્ સૌભાગ્યસંયુતઃ ।
સ્વાચારનિષ્ઠભાવેન ચિત્તં સુનિયતં ભવેત્ ॥ ૧૩૨॥

ષષ્ઠ્યાં સ્કન્દં ભજેન્નિત્યં તૃતીયાયાં ચ પાર્વતીમ્ ।
મયૂરેશયુતે દેવાસ્તાભ્યાં સૌખ્યં લભેન્નરઃ ॥ ૧૩૩॥

સર્વે વાસુકિમુખ્યાઃ પશ્ચિમે નાગા મહાબલાઃ ।
સંસ્થિતા દ્વારસામીપ્યે નાગકુણ્ડં તથાઽમલમ્ ॥ ૧૩૪॥

પઞ્ચમ્યાં પૂજનીયાસ્તે દારિદ્ર્યનાશકારકાઃ ।
સર્વવ્યાધિવિહીનં તુ કુર્વતે માનવં સદા ॥ ૧૩૫॥

ઉત્તરે ધનનાથં તુ પૂજયેદ્ધનનાયકમ્ ।
એકાદશ્યાં વિશેષેણ દ્વારસામીપ્યસંસ્થિતમ્ ॥ ૧૩૬॥

ત્રયોદશ્યાં ધર્મરાજં પૂજયેન્નાત્ર સંશયઃ ।
ધર્મપ્રદં જનાનાં ચ સદા પુણ્યવિવર્ધનમ્ ॥ ૧૩૭॥

અન્યે દેવગણાઃ સર્વે સ્થિતા દેવાલયે કિલ ।
પૂર્ણિમાયાં જનૈઃ પૂજ્યાઃ ક્ષેત્રવાસિભિરાદરાત્ ॥ ૧૩૮॥

યમસ્ય સન્નિધાને તુ પિતરઃ ક્ષેત્રવાસિનઃ ।
સંસ્થિતાસ્તે નરૈઃ પૂજ્યા અમાયાં વંશવર્ધનાઃ ॥ ૧૩૯॥

ત્રયસ્ત્રિંશત્ કોટિમિતા દેવાઃ સર્વત્ર સંસ્થિતાઃ ।
તેષાં સ્થાનાદિ દેવાઃ કથયિતું નૈવ શક્યતે ॥ ૧૪૦॥

દેવાગારસ્ય દેવેશાઃ કથિતં યાત્રયા યુતમ્ ।
માહાત્મ્યં દેવજાતીનાં સર્વકામફલપ્રદમ્ ॥ ૧૪૧॥

મયૂરસ્યાપિ અધુના કથયામિ ચરિત્રકમ્ ।
તત્સ્થાનાં શૃણુત પ્રાજ્ઞાઃ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૧૪૨॥

દેવાગારાચ્છતે દ્વે તુ ધનુષાં સંસ્થિતો ભૃગુઃ ।
ભૃગુતીર્થં મહત્ ક્ષેત્રે કુણ્ડં પાપપ્રદાહકમ્ ॥ ૧૪૩॥

તત્ર સ્નાનેન જન્તૂનાં વન્ધ્યદોષો વિનશ્યતિ ।
તથા પૂજ્ય પ્રજાનાથં ભૃગું સર્વમવાપ્નુયાત્ ॥ ૧૪૪॥

રોહિણ્યાં તસ્ય યાત્રા વૈ કર્તવ્યા ક્ષેત્રવાસિભિઃ ।
તેન તુષ્ટો મહાયોગી ભૃગુઃ સર્વાર્થદો ભવેત્ ॥ ૧૪૫॥

સ્વનામસંયુતં સોપ્યાસ્થાપ્ય વિઘ્નેશ્વરં પરમ્ ।
પૂજત્યનન્યભાવેન ગાણપત્યસ્વભાવતઃ ॥ ૧૪૬॥

(Page ખં. ૬ અ. ૧૯ પાન ૫૨)
તસ્ય વામાઙ્ગગઃ સાક્ષાત્તાવન્માનેન સંસ્થિતઃ ।
પુલહસ્તં પ્રપૂજ્યૈવ કર્મયુક્તો ભવેન્નરઃ ॥ ૧૪૭॥

કુણ્ડં પુલહતીર્થાખ્યં દોષહન્તૃ સ્થિતં પરમ્ ।
ભજત્યાસ્થાપ્ય ગાણેશો ગણેશં નાન્યભાવતઃ ॥ ૧૪૮॥

યાત્રા મૃગશિરસિ ચ તસ્ય પ્રોક્તા મયૂરકે ।
કર્તવ્યા ક્ષેત્રવાસિભિર્મહાપુણ્યપ્રવર્દ્ધિની ॥ ૧૪૯॥

દક્ષિણાઙ્ગે ક્રતુશ્ચૈવ કુણ્ડં કૃત્વા સ્વતીર્થજમ્ ।
ગણેશ્વરં સ્થાપ્ય યોગી ભજતેઽનન્યચેતસા ॥ ૧૫૦॥

આર્દ્રાયાં સ જનૈઃ સર્વૈઃ પૂજનીયઃ પ્રયત્નતઃ ।
યજ્ઞસ્ય ફલદાતા ચ ભવેદ્યાત્રાવિધાનતઃ ॥ ૧૫૧॥

ભૃગોઃ પુરશ્ચ ધનુષાં શતં તત્ર સ્થિતો મતઃ ।
ચ્યવનશ્ચ તથા ધાતા વિધાતા દેવસત્તમૌ ॥ ૧૫૨॥

ક્રમેણ ભાર્ગવાઃ સર્વે મુનયસ્તત્ર સંસ્થિતાઃ ।
શતાનિ પઞ્ચ તત્ ક્ષેત્રં ધનુષાં શૌનકાદયઃ ॥ ૧૫૩॥

પૂજનીયાશ્ચ પઞ્ચમ્યામૃષયઃ સર્વભાવનાઃ ।
શ્રવણે માનવૈસ્તત્સ્થૈઃ પુણ્યદાઃ સમ્ભવન્તિ ચ ॥ ૧૫૪॥

પુલહસ્ય પુરસ્તદ્વત્ પૌલહા મુનયઃ સદા ।
તિષ્ઠન્તિ પૂજનીયાસ્તે રેવત્યાં સર્વદા મતાઃ ॥ ૧૫૫॥

ક્રતોરગ્રે મહેશાનાઃ ક્રતુવંશસમુદ્ભવાઃ ।
તિષ્ઠન્તિ મુનયઃ સર્વયોગજ્ઞાઃ પુણ્યવર્ધનાઃ ॥ ૧૫૬॥

અશ્વિન્યાં પૂજનીયાશ્ચ મતાઃ સર્વાર્થદાયકાઃ ।
ગણેશમાસ્થાપ્ય વિપ્રાઃ સેવન્તે ભક્તિતત્પરાઃ ॥ ૧૫૭॥

તત્પુરો દેવગન્ધર્વા વિશ્વાવસુપુરોગમાઃ ।

ધનુષાં દ્વે શતે તેષાં ક્ષેત્રં ખ્યાતં મયૂરકે ॥ ૧૫૮॥

ઉર્વશી ચૈવ રમ્ભાદ્યાસ્તતો હ્યપ્સરસઃ પુરઃ ।
ધનુષાં શતકં ક્ષેત્રં તાસાં તત્ર પ્રકીર્તિતમ્ ॥ ૧૫૯॥

પૂજનીયા નરૈઃ પુષ્પૈર્ગન્ધર્વાઃ પુણ્યવર્ધનાઃ ।
પુર્નવસાવપ્સરસઃ પૂજનીયા વિશેષતઃ ॥ ૧૬૦॥

નાનામુનિગણા અન્યે ભવન્તે સંસ્થિતાઃ પરાઃ ।
વિશ્વામિત્રો યાજ્ઞવલ્ક્યસ્તથા પારાશરોઽગ્રણીઃ ॥ ૧૬૧॥

શ્વેતકેતુર્વામદેવો પરો રૈભ્યો નિદાઘકઃ ।
ઇત્યાદ્યાઃ બહવો દેવાઃ કથયિતું ન શક્યતે ॥ ૧૬૨॥

સ્વસ્વનામ્નાઙ્કિતાંસ્તે સંસ્થાપ્ય લમ્બોદરાન્ સદા ।
ભજન્તે તીર્થસંયુક્તાઃ પૂજનીયાઃ સુખપ્રદાઃ ॥ ૧૬૩॥

પૂર્વભાગાશ્રિતં સર્વં કથિતં વઃ સમાસતઃ ।
અધુના દક્ષિણં વક્ષ્યે મયૂરં સર્વદાયકમ્ ॥ ૧૬૪॥

દેવાલયાદ્દક્ષિણાચ્ચતુઃશતં ચ પ્રકીર્તિતમ્ ।
ધનુષાં ક્ષેત્રરૂપં તુ વસિષ્ઠસ્ય મહાત્મનઃ ॥ ૧૬૫॥

સ્વનામાઙ્કિતમાસ્થાપ્ય ગણેશં ભજતે સદા ।
તત્ર કુણ્ડં તુ વાસિષ્ઠં સ્નાનેન પાપનાશનમ્ ॥ ૧૬૬॥

ભરણ્યાં પૂજનીયોઽસૌ વંશવૃદ્ધિકરો ભવેત્ ।
યાત્રા તસ્ય સમાખ્યાતા મયૂરે સુખદાયિકા ॥ ૧૬૭॥

તસ્ય વામાઙ્ગભાગે ચાત્રિઃ સર્વાર્થપ્રદાયકઃ ।
ગણેશ્વરં સ સંસ્થાપ્ય ભજતે સ્વાભિધાનકમ્ ॥ ૧૬૮॥

તીર્થં તત્ર સ્થિતં તસ્ય સ્નાનમાત્રેણ માનદમ્ ।
કૃત્તિકાયાં વિશેષેણ પૂજનીયો નરૈઃ સદા ॥ ૧૬૯॥

દક્ષિણાઙ્ગે વસિષ્ઠસ્ય પુલસ્ત્યઃ સંસ્થિતોઽભવત્ ।
સ્વનામાઙ્કિતમાસ્થાપ્ય ઢુણ્ઢિં ભજતિ દેવપાઃ ॥ ૧૭૦॥

કુણ્ડં તસ્ય ચ તીર્થાખ્યં પરં સ્નાનેન સત્વદમ્ ।
આસુરભાવસમ્ભૂતં મલં દહતિ સેવિનામ્ ॥ ૧૭૧॥

પૂજનીયો ધનિષ્ઠાયાં વિશેષેણ મહામુનિઃ ।
સર્વાર્થદાયકો ભાવી યાત્રાકારિણ એવ ચ ॥ ૧૭૨॥

વસિષ્ઠાચ્ચ પુરોભાગે વાસિષ્ઠા મુનયોઽપરે ।
(Page ખં. ૬ અ. ૧૯ પાન ૫૩)
દ્વે શતે ધનુષાં ક્ષેત્રં તેષાં તત્ર સ્થિતા દ્વિજાઃ ॥ ૧૭૩॥

અત્રેઃ પુરસ્તથાત્રેયાસ્તાવન્માનેન સંસ્થિતાઃ ।
પુલસ્ત્યાગ્રે ચ પૌલસ્ત્યા ભવન્તિ મુનયઃ સ્થિતાઃ ॥ ૧૭૪॥

સ્વસ્વતીર્થસમાસક્તાઃ સ્થાપ્ય વિઘ્નેશ્વરાંસ્તથા ।
પૂજયન્તિ સ્વનામસ્થાન્ ભક્તિયુક્તા મહર્ષયઃ ॥ ૧૭૫॥

મઘાયાં ચૈવ વાસિષ્ઠાશ્ચિત્રાયામત્રિસમ્ભવાઃ ।
હસ્તે પૌલસ્ત્યકાઃ પૂજ્યાઃ ક્ષેત્રવાસિભિરાદરાત્ ॥ ૧૭૬॥

અન્યે મુનિગણા નાના સદા તત્રૈવ સંસ્થિતાઃ ।
તેષુ મુખ્યાન્ પ્રવક્ષ્યામિ શ◌ૃણુધ્વં દેવસત્તમાઃ ॥ ૧૭૭॥

કણ્વશ્ચ જૈમિનિશ્ચૈકો દ્વિતશ્ચ ત્રિતરૈવતૌ ।
મેધાતિથિર્ભરદ્વાજો જમદગ્નિશ્ચ ગૌતમઃ ॥ ૧૭૮॥

ઇત્યાદિ બહવોઽન્યે સ્થિતાઃ સંસ્થાપ્ય ગણેશ્વરાન્ ।
પૂજનીયા નરેણૈવ સર્વધર્મવિવર્ધનાઃ ॥ ૧૭૯॥

કથિતેષુ મહેશાના નક્ષત્રેષુ વિશેષતઃ ।
યાત્રા તેષાં સમાખ્યાતા સર્વાઘશમની પરા ॥ ૧૮૦॥

તતઃ પુરઃ પિશાચેશા ભૂતેશાઃ સિદ્ધચારણાઃ ।
સંસ્થિતાઃ પૂજનીયાસ્તે ભૌમવારે વિશેષતઃ ॥ ૧૮૧॥

અતઃ પરં પશ્ચિમસ્થં વદામિ પાપહારકમ્ ।
ચિત્રં મયૂરે માહાત્મ્યં ક્ષેત્રવાસિભવં પરમ્ ॥ ૧૮૨॥

દેવાલયાદષ્ટશતં ધનુષાં સ્થાનમુત્તમમ્ ।
દક્ષસ્ય તત્ર દેવેશા દક્ષતીર્થં સરઃ સ્થિતમ્ ॥ ૧૮૩॥

તત્ર સ્નાનેન દુર્બુદ્ધિઃ પરા નશ્યતિ તત્ક્ષણાત્ ।
સુબુદ્ધિર્જાયતે સદ્યો જનાનાં ભાવિતાત્મનામ્ ॥ ૧૮૪॥

મહાયાત્રાઽયભિજિતિ તસ્ય પ્રોક્તા સુખપ્રદા ।

કર્તવ્યા ક્ષેત્રવાસીભિઃ પરા સદ્બુદ્ધિદાયિકા ॥ ૧૮૫॥

દક્ષસ્ય વામભાગે તુ મરીચિઃ સંસ્થિતો મહાન્ ।
તાવન્માનેન સંયુક્તઃ સ્વતીર્થેન સમન્વિતઃ ॥ ૧૮૬॥

સ્વાતૌ તસ્ય મહાયાત્રા કર્તવ્યા વૃદ્ધિદાયિની ।
ક્ષેત્રવાસિભિરાનન્દાદ્યોગીન્દ્રસ્ય મહાત્મનઃ ॥ ૧૮૭॥

અઙ્ગિરાસ્તસ્ય દક્ષસ્ય દક્ષિણે યોગિસત્તમઃ ।
પૂજનીયો વિશેષેણ જ્ઞાનદાતા ભવેત્ સદા ॥ ૧૮૮॥

તીર્થં તત્ર સમાખ્યાતં કુણ્ડરૂપેણ યોગિનઃ ।
સ્નાનેન ભક્તિસંયુક્તો લભેજ્જ્ઞાનં ચ માનવઃ ॥ ૧૮૯॥

દક્ષાદયસ્ત્રયઃ પ્રોક્તાઃ સંસ્થાપ્ય ગણનાયકમ્ ।
સ્વસ્વનામાઙ્કિતં દેવાઃ પૂજયન્તિ નિરન્તરમ્ ॥ ૧૯૦॥

દક્ષાગ્રે દક્ષસમ્ભૂતાશ્ચતુર્વર્ણપ્રકાશિકાઃ ।
પુત્ર્યઃ ષષ્ટીર્મહાભાગાઃ સેવન્તે ગણનાયકમ્ ॥ ૧૯૧॥

તાસાં ક્ષેત્રં સમાખ્યાતં ચતુઃ શતધનુર્મિતમ્ ।
રવિવારે પૂજનીયા વંશસૌભાગ્યવર્ધનાઃ ॥ ૧૯૨॥

તાસાં પુરઃ પ્રજાઃ સર્વા નરૈસ્તાભ્યઃ સમુદ્ભવાઃ ।
સંસ્થિતા પૂજનીયાસ્તા ધનિષ્ઠાયાં સુખપ્રદાઃ ॥ ૧૯૩॥

દ્વે શતે ધનુષાં તાસાં ક્ષેત્રં ચૈવ પ્રકીર્તિતમ્ ।
ગણેશમાસ્થાપ્ય સર્વાઃ સેવન્તે નિત્યમાદરાત્ ॥ ૧૯૪॥

મરીચેસ્તુ પુરોભાગે મારીચાઃ કાશ્યપાદયઃ ।
સંસ્થિતાસ્તે નરૈઃ પૂજ્યાઃ શતતારે ધનપ્રદાઃ ॥ ૧૯૫॥

ચતુઃશતાનિ તત્ ક્ષેત્રં ધનુષાં ચ પ્રકીર્તિતમ્ ।
સ્થાપ્ય વિઘ્નેશ્વરાન્ સર્વે પૂજયન્તિ નિરન્તરમ્ ॥ ૧૯૬॥

પુરોભાગે હ્યઙ્ગિરસઃ સ્થિતા આઙ્ગિરસાઃ સદા ।
તાવન્માનેન સંયુક્તાસ્તીર્થયુક્તા મહર્ષયઃ ॥ ૧૯૭॥

લમ્બોદરાંસ્ત આસ્થાપ્ય સ્વસ્વનામાઙ્કિતાન્ સદા ।
(Page ખં. ૬ અ. ૧૯ પાન ૫૪)
પૂજયન્તિ વિશેષેણ ભક્તિભાવસમન્વિતાઃ ॥ ૧૯૮॥

આશ્લેષાયાં મહાયાત્રા તેષાં કાર્યા નરૈઃ પરા ।
પુત્રપૌત્રપ્રવૃદ્ધ્યર્થં ક્ષેત્રવાસિભિરાદરાત્ ॥ ૧૯૯॥

અન્યે મુનિવરાસ્તત્ર સંસ્થિતા ગણપે રતાઃ ।
તેષુ શ્રેષ્ઠાન્ પ્રવક્ષ્યામિ મહાયોગીન્દ્રકાંસ્તથા ॥ ૨૦૦॥

દુર્વાસા ગાલવશ્ચૈવ ત્રિશિરા નૈ વો મુનિઃ ।
અગસ્ત્યશ્ચ મૃકણ્ડસ્તુ માર્કણ્ડેયો દધીચિકઃ ॥ ૨૦૧॥

કથિતેષુ દિનેષ્વેતે પૂજનીયા મહાત્મભિઃ ।
સર્વસૌખ્યપ્રદાતારો ભવન્તે યોગિસત્તમાઃ ॥ ૨૦૨॥

તીર્થયુક્તાં ગણેશાનાસ્થાપ્ય સમ્પૂજયન્તિ તે ।
મુનયો ભક્તિસંયુક્તા ક્ષેત્રવાસપરાયણાઃ ॥ ૨૦૩॥

અતશ્ચ કિન્નરાઃ સાધ્યાઃ પુરો વિદ્યાધરાસ્તથા ।
સેવન્તે ગણનાથં સંસ્થાપ્ય ક્ષેત્રનિવાસિનઃ ॥ ૨૦૪॥

પૂજનીયા નરૈઃ સર્વે સર્વકારિણ આદરાત્ ।
એવં સઙ્ક્ષેપતઃ પ્રોક્તં માહાત્મ્યં પશ્ચિમાશ્રિતમ્ ॥ ૨૦૫॥

અથોત્તરભવં દેવાઃ કથયામિ સમાસતઃ ।
મયૂરક્ષેત્રસંસ્થાનાં ચરિત્રં સુખદં ભવેત્ ॥ ૨૦૬॥

દેવાગારાત્તુ ધનુષાં દેવપાઃ શતપઞ્ચકે ।
વસવોઽષ્ટૌ સ્થિતાશ્ચૈવાસ્થાપ્ય ગાણેશ્વરં પરમ્ ॥ ૨૦૭॥

સ્વસ્વતીર્થભવં કુણ્ડં કૃત્વા ભક્તિપરાયણાઃ ।
ભજન્તે પૂર્ણિમાયાં તે પૂજનીયા વિશેષતઃ ॥ ૨૦૮॥

તેષાં વામાઙ્ગભાગે તુ ધેનવઃ કામદાયિકાઃ ।
સંસ્થિતા તાવતા માનેન યુતાસ્તીર્થસંયુતાઃ ॥ ૨૦૯॥

ગણેશ્વરં તાઃ સંસ્થાપ્ય સ્વસ્વનામયુતં પરાઃ ।
પૂજયન્તિ વિધાનેન ભક્તિયુક્તા મહૌજસઃ ॥ ૨૧૦॥

દ્વાદશ્યાં તા નરૈઃ પૂજ્યાઃ કામધેનુમુખાઃ સુરાઃ ।
ક્ષેત્રવાસિભિરાનન્દદાયિકાઃ કામપૂરિકાઃ ॥ ૨૧૧॥

દક્ષિણાઙ્ગે સિતશ્ચૈવ દેવલશ્ચ સમાસ્થિતૌ ।

ગણેશ્વરં તૌ સંસ્થાપ્ય પૂજતો યોગિસત્તમાઃ ॥ ૨૧૨॥

ઉત્તરાયાં વિશેષેણ પૂજનીયૌ નરૈઃ સદા ।
એકનિષ્ઠાપ્રદૌ સ્યાતાં નરાણાં પાપહારકૌ ॥ ૨૧૩॥

વસૂનાં ચ પુરોભાગે ક્ષેત્રં શતધનુર્દ્વયમ્ ।
ગાર્ગ્યાણાં તે નરૈર્વિદ્યાપ્રદાઃ પૂજ્યા વિશેષતઃ ॥ ૨૧૪॥

ઉત્તરાષાઢનક્ષત્રે યાત્રા તેષાં પ્રકીર્તિતા ।
ગર્ગઃ સ્વયં મહાયોગી ભજતે ગણનાયકમ્ ॥ ૨૧૫॥

ગવાં પુરો મહેશાના મૌદ્ગલા ગણપપ્રિયાઃ ।
સેવન્તે વિઘ્નરાજં તે તાવન્માનેન સંસ્થિતાઃ ॥ ૨૧૬॥

દેવા વિપ્રાશ્ચ માણ્ડૂકા દેવલાસિતયોઃ પુરઃ ।
સેવન્તે ગણનાથં તે સર્વે ભક્તિયુતાઃ સદા ॥ ૨૧૭॥

ઉત્તરાભાદ્રનક્ષત્રે મૌદ્ગલા માનવૈઃ સદા ।
પૂજનીયા વિશેષેણ યોગદાઃ સમ્ભવન્તિ તે ॥ ૨૧૮॥

માણ્ડૂકાઃ પૂર્વફલ્ગુન્યાં પૂજનીયા નરૈઃ સદા ।
વ્યાધિદોષહરાસ્તે તુ ભવન્ત્યત્ર ન સંશયઃ ॥ ૨૧૯॥

અસિતાદ્યા ઇમે સર્વે સ્વસ્વનામાઙ્કિતં પરમ્ ।
પૂજયન્તિ ગણેશં સંસ્થાપ્ય તીર્થસમન્વિતાઃ ॥ ૨૨૦॥

તેષાં પુરો મહાત્માનો મુનયસ્તત્ર સંસ્થિતાઃ ।
મુખ્યાંસ્તેષુ પ્રવક્ષ્યામિ શ ૃણુધ્વં યોગિસત્તમાન્ ॥ ૨૨૧॥

ધૌમ્યશ્ચ વાલ્મીકિવાચક્નવી મઙ્કણકો મુનિઃ ।
કહોડશ્ચ સુમન્તુર્વૈ વૈશમ્પાયન એવ ચ ॥ ૨૨૨॥

જાબાલિઃ પર્વતઃ પૈલ ઋષ્યશ ૃઙ્ગઃ પ્રતાપવાન્ ।
(Page ખં. ૬ અ. ૨૦ પાન ૫૫)
લોમશશ્ચ વિભાણ્ડોઽન્યો બલ્લવાદ્યા મહર્ષયઃ ॥ ૨૨૩॥

સ્વસ્વતીર્થયુતાસ્તે સંસ્થાપ્ય વિઘ્નેશ્વરાન્ સદા ।
પૂજયન્તિ મહાભાગાઃ સ્વસ્વનામસમન્વિતાન્ ॥ ૨૨૪॥

ઉત્તરાષાઢનક્ષત્રે પૂજનીયા નરૈઃ સદા ।
સર્વપાપહરાસ્તે વૈ ભવન્તે યોગિસત્તમાઃ ॥ ૨૨૫॥

તત્પુરો ગુહ્યકાશ્ચૈવ હનૂમાન્ પવનાત્મજઃ ।
યક્ષા રક્ષોગણાઃ સર્વે ભજન્તે ગણનાયકમ્ ॥ ૨૨૬॥

સ્થાપ્ય ઢુણ્ઢિં સ્વતીર્થૈસ્તુ યુતા ધ્યાનપરાયણાઃ ।
ઉત્તરાભાદ્રનક્ષત્રે પૂજનીયાઃ શુભપ્રદાઃ ॥ ૨૨૭॥

મુક્તેરીશાનભાગે તુ સરઃ પ્રણવસંજ્ઞિતમ્ ।
પ્રણવાકૃતિ તત્રૈવ સ્નાને મૂર્ધ્નિ ધ્વનિર્ભવેત્ ॥ ૨૨૮॥

તત્રોઙ્કારગણેશશ્ચ સરસ્વત્યા સમન્વિતઃ ।
ચતુર્થ્યાં પૂજનીયોऽસૌ સર્વસિદ્ધિપ્રદાયકઃ ॥ ૨૨૯॥

તત્પુરો ભૈરવસ્યૈવ દૂતા નગ્નસ્ય સર્વતઃ ।
રક્ષાર્થં સંસ્થિતા દેવા મહાબલસમન્વિતાઃ ॥ ૨૩૦॥

અન્યે નાનાવિધાસ્તત્ર સ્થિતાસ્તેષાં મહાત્મનામ્ ।
નામાદિકં બહુત્વાત્ કથયિતું નૈવ શક્યતે ॥ ૨૩૧॥

ઇદમુત્તરગં પ્રોક્તં મયૂરસ્ય ચરિત્રકમ્ ।
સઙ્ક્ષેપેણ મહાદેવાઃ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૨૩૨॥

યાત્રાદિસંયુતં યસ્તુ શ ૃણોતિ ક્ષેત્રવાસિનામ્ ।
મુખ્યાનાં ચરિતં પુણ્યં સ સર્વં પ્રલભેત્ સુખમ્ ॥ ૨૩૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે ક્ષેત્રવાસિચરિતવર્ણનં નામૈકોનવિંશતિતમોऽધ્યાયઃ ॥ ૬.૧૯

## ૬.૨૦ મલત્યાગયાતનાકથનં નામ વિંશતિતમોऽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દેવેશા ઊચુઃ ।
મયૂરં કીદૃશં દેવાલયં વિપ્ર કિમાત્મકમ્ ।
ગર્ભાગારં તથા યોગિન્ વદ ગાણેશરૂપકમ્ ॥ ૧॥

ભૃશુણ્ડ્યુવાચ ।
ચિત્રં નાનાવિધં સર્વં માયારૂપં મયૂરકમ્ ।
તદેવ ગણનાથસ્ય રૂપં જ્ઞાતવ્યમુત્તમમ્ ॥ ૨॥

દિવુઃ ક્રીડાત્મકો ધાતુર્માયાક્રીડાકરઃ સ્વયમ્ ।
ગણેશસ્તસ્ય રૂપં યદ્દેવાગારં પ્રકીર્તિતમ્ ॥ ૩॥

યથા ગર્ભશ્ચ દેવેન્દ્રાઃ શુક્રશોણિતસમ્ભવઃ ।
દ્વાભ્યામેકત્વમાપન્નો જાયતે દ્વન્દ્વધારકઃ ॥ ૪॥

માયામાયિકયોર્યોગે તથા સ્વાનન્દ ઉચ્યતે ।
ગર્ભાગારં તદેવાઽપિ જ્ઞાતવ્યં યોગિભિઃ પરમ્ ॥ ૫॥

સ્વાનન્દે વસતિસ્તસ્ય ગણેશસ્ય મહાત્મનઃ ।
સ એવ મૂર્તિમાસ્થાય સન્તસ્થાવુત્તરામુખઃ ॥ ૬॥

એતત્ સર્વં રહસ્યં યત્ કથિતં સર્વમઞ્જસા ।
તં સેવધ્વં મહેશાનાસ્તેન સર્વમવાપ્સ્યથ ॥ ૭॥

દેવેન્દ્રા ઊચુઃ ।
ક્ષેત્રં ગણપતેર્યોગિન્ સર્વં ગાણેશરૂપકમ્ ।
તત્ર સ્થિતા વિશેષેણ દેવવિપ્રાદયઃ પ્રભો ॥ ૮॥

તેષાં પુરીષમૂત્રાદિવ્યવહારઃ કથં ભવેત્ ।
સ્ત્રીસઙ્ગપુત્રપૌત્રાદ્યં સર્વં તદ્દુર્ઘટં ભવેત્ ॥ ૯॥

ભૃશુણ્ડ્યુવાચ ।
(Page ખં. ૬ અ. ૨૦ પાન ૫૬)
સાક્ષાદ્ગણેશ્વરસ્યૈવ દેહો યોગમયોઽમરાઃ ।
ન તસ્ય બાધતે કિઞ્ચિન્ મૃતરૂપમિદં કદા ॥ ૧૦॥

લોકાનામુપકારાય જલપૃથ્વ્યાદિકં તથા ।
રચિતં સર્વસામાન્યં તત્ર વાસેન લભ્યતે ॥ ૧૧॥

ગણેશઃ સર્વયોગાનામધિપો નાત્ર સંશયઃ ।
ન ગણેશસ્વરૂપસ્ય વિક્રિયા જાયતે તતઃ ॥ ૧૨॥

યોગરૂપે નરાસ્તત્ર નિશ્ચયે ન મૃતાઃ કિલ ।
ગાણેશે સમ્ભવિષ્યન્તિ તદાકારા ન સંશયઃ ॥ ૧૩॥

તથા નરાદયશ્ચાન્યે વસન્તિ ક્ષેત્રવાસિનઃ ।
કુર્વન્તિ મલમૂત્રાદિ દેવાદીનાં ન બાધતે ॥ ૧૪॥

દેવવિપ્રાદયસ્તત્ર સંસ્થિતા વ્યાપ્ય દેવપાઃ ।

અઙ્ગુષ્ઠપર્વમાત્રેણ રૂપેણ ક્ષેત્રવાસિનઃ ॥ ૧૫॥

મયૂરં તન્મયં ક્ષેત્રં જ્ઞાતવ્યં દિવ્યચક્ષુષા ।
મૃન્મયં માનવાનાં તુ તદ્દોષસ્તત્ર નો ભવેત્ ॥ ૧૬॥

તથાપિ મૃન્મયે ક્ષેત્રે ગર્ભાગારં વિશેષતઃ ।
મલમૂત્રાદિદોષૈશ્ચ સંયુતં નૈવ કારયેત્ ॥ ૧૭॥

તેન સર્વં શુભં સર્વૈર્લભ્યતે માનવૈઃ પરમ્ ।
યથા ધર્મયુતૈર્નિત્યં સેવનીયં મયૂરકમ્ ॥ ૧૮॥

ભવેદ્વિપથભાવેન મયૂરે સંસ્થિતો યદિ ।
સ યાતનાં લભેચ્ચોગ્રાં નગ્નભૈરવકારિતામ્ ॥ ૧૯॥

દેવેશા ઊચુઃ ।
ગર્ભાગારે મલસ્યૈવ નરસ્ત્યાગં સમાચરેત્ ।
તસ્મૈ ભૈરવદત્તાં તાં યાતનાં કીદૃશીં વદ ॥ ૨૦॥

મયૂરે પાપકર્માણિ યઃ કરોતિ તુ માનવઃ ।
સ ભુઙ્ક્તે યાતનાં વિપ્ર કીદૃશીં તાં વદસ્વ નઃ ॥ ૨૧॥

મયૂરં કેન પુણ્યેન લભ્યતે તદ્વદસ્વ ચ ।
ક્ષેત્રસંન્યાસિનાં ચૈવ દ્વારયાત્રાં કિમાત્મિકામ્ ॥ ૨૨॥

ભૃશુણ્ડ્યુવાચ ।
ઇતિહાસં પ્રવક્ષ્યામિ પુરાકલ્પસમુદ્ભવમ્ ।
તેન સંશયહીનાશ્ચ ભવિષ્યથ સુરોત્તમાઃ ॥ ૨૩॥

દેવાગારે દ્વિજઃ કશ્ચિદ્દેવાનીકેતિ નામતઃ ।
અત્રિગોત્રોદ્ભવઃ સુજ્ઞઃ સંસ્થિતોઽભૂત્ સુકર્મવાન્ ॥ ૨૪॥

સ્વધર્મસંયુતો નિત્યં સિષેવે ગણનાયકમ્ ।
દેવવિપ્રાતિથિપ્રેપ્સુઃ ક્ષેત્રયાત્રાપરાયણઃ ॥ ૨૫॥

એવં બહૌ ગતે કાલે વૃદ્ધસ્તત્ર બભૂવ હ ।
તથાપિ નિત્યયાત્રાયાં રતોઽભૂદ્ ધર્મધારકઃ ॥ ૨૬॥

એકદા જ્વરયુક્તશ્ચાજીર્ણાન્નેન પ્રપીડિતઃ ।
જગામ સ મયૂરેશં પૂજનાય મહાયશાઃ ॥ ૨૭॥

પૂજયિત્વા ગણેશાનં નિત્યયાત્રાં ચકાર હ ।

તત્રાપાનભવો વાયુઃ પીડયન્નતિદૂષિતઃ ॥ ૨૮॥

હઠાત્ સઙ્ગૃહ્ય વિપ્રસ્તં ત્યક્ત્વા યાત્રાં મહામતિઃ ।
સ્વગૃહં પ્રજગામાઽસૌ ત્વરાયુક્તોઽતિદુઃખિતઃ ॥ ૨૯॥

ગચ્છતોઽજીર્ણદોષેણાતિસારેણ મહાત્મનઃ ।
મલઃ શિથિલભાવેન નિઃસૃતો ગર્ભમન્દિરે ॥ ૩૦॥

તતોઽતિદુઃખસંયુક્તઃ સ્નાનં ચક્રે સ વાડવઃ ।
શનૈઃ સ્વગૃહમાગમ્ય શોકયુક્તો બભૂવ હ ॥ ૩૧॥

અહો મયાઽતિમૂર્ખેણ ગર્ભાગારે કૃતં પરમ્ ।
મલત્યાગભવં પાપં કા ગતિર્મે ભવિષ્યતિ ॥ ૩૨॥

તતસ્તત્ર મમારૈવ સ્વલ્પકાલેન વિપ્રપઃ ।
રોગેણ પીડિતોઽત્યન્તં દેવાનીકો મહાયશાઃ ॥ ૩૩॥

તતસ્તં ભૈરવસ્યાપિ દૂતા નેતું સમાગતાઃ ।
બદ્ધ્વા સન્તાડ્ય વિપ્રં સઙ્ગૃહ્ય તે ભૈરવં યયુઃ ॥ ૩૪॥

દૃષ્ટ્વા સ ભૈરવો દેવસ્તમુવાચ દ્વિજાધમમ્ ।
કિમર્થં રોગયુક્તસ્ત્વં ગર્ભાગારં ગતો વદ ॥ ૩૫॥

(Page ખં. ૬ અ. ૨૦ પાન ૫૭)
અત્યસાધ્યશરીરેણ ગમનં યત્ત્વયા કૃતમ્ ।
ભુઙ્ક્ષ્વ પાપં મહાદુષ્ટ મલત્યાગભવં પરમ્ ॥ ૩૬॥

સાક્ષાદ્ગણપતેઃ સ્થાને ગર્ભાગારે ગતો ભવાન્ ।
તસ્ય મસ્તકમધ્યે તુ પપાત કિલ તે મલઃ ॥ ૩૭॥

અસ્માભિશ્ચ સુવાસેન જલેન ક્ષાલિતં તદા ।
મસ્તકં તસ્ય દેવસ્ય વિષ્ઠાયુક્તં તયા કૃતમ્ ॥ ૩૮॥

ઇત્યુક્ત્વા ક્રૂરરૂપં સ દર્શયામાસ ભૈરવઃ ।
દેવાનીકાય તં સોઽપિ દૃષ્ટ્વા મૂર્ચ્છામવાપ હ ॥ ૩૯॥

તતસ્તં સાવધાનં સ પુનઃ કૃત્વાઽગ્નિચક્રગમ્ ।
ચકાર દૂતવર્યૈશ્ચ નગ્નભૈરવ એવ ચ ॥ ૪૦॥

અગ્નિચક્રે દ્વિજો નિત્યં દાહયુક્તો બભૂવ હ ।
બભ્રામ દેવમુખ્યાશ્ચ હાહાકારરવાકુલઃ ॥ ૪૧॥

ભૈરવાણાં મહાવહ્નિર્મતઃ કોટિગુણાધિકઃ ।
યમસ્યાગ્નેશ્ચ જન્તૂનાં તં સ્પ્રષ્ટું કઃ ક્ષમો ભવેત્ ॥ ૪૨॥

શતવર્ષાણિ વિપ્રેશોઽગ્નિચક્રં તત્ સમાશ્રિતઃ ।
બભ્રામ દાહસંયુક્તો ન મમાર સ માયયા ॥ ૪૩॥

ભૈરવેણ નિબદ્ધઃ સ દુઃખમેવ સુદારુણમ્ ।
બુભુજે બ્રાહ્મણસ્તત્ર મયા વક્તું ન શક્યતે ॥ ૪૪॥

તતો હૈમગુહાયાં સ નિક્ષિપ્તો બ્રાહ્મણાધમઃ ।
શતવર્ષાણિ તત્રૈવાભવચ્છૈત્યેન પીડિતઃ ॥ ૪૫॥

તતઃ સ રૌરવે તેન નિક્ષિપ્તો જન્તુભિસ્તથા ।
દંશિતસ્તત્ર સંસ્થશ્ચ કોટિવૃશ્ચિકસન્નિભૈઃ ॥ ૪૬॥

શતવર્ષાણિ તત્રૈવ પીડિતસ્તેન દારુણમ્ ।
તતસ્તપ્તશિલાયાં સ પોથિતોઽભૂત્ પુનઃ પુનઃ ॥ ૪૭॥

શતવર્ષાણિ તત્રૈવ યાતનાં બુભુજે પરામ્ ।
તતઃ પિશાચયોનિસ્થઃ ક્ષેત્રે પીડાયુતોઽભવત્ ॥ ૪૮॥

અન્નવસ્ત્રજલાદિભ્યો હીનો બભ્રામ વાડવઃ ।
અશુચીન્ સ નરાન્ પ્રાપ્ય તદ્દેહસ્થો બભૂવ હ ॥ ૪૯॥

તત્રૈવ શાસ્ત્રમન્ત્રેણ વૈદિકેન દ્વિજોત્તમૈઃ ।
તાડિતસ્તાન્ પરિત્યજ્ય બભ્રામ યત્ર તત્ર હ ॥ ૫૦॥

એવં વર્ષાણિ દેવેશાઃ શતં કૃત્વા પુનશ્ચ તમ્ ।
આનાય્ય ભૈરવો દેવો જગાદ વચનં હિતમ્ ॥ ૫૧॥

દેવાનીક ત્વયા ભક્ત્યા યાત્રાર્થં ગર્ભમન્દિરમ્ ।
અશક્તેન કૃતં ચૈવ મલયુક્તં મહામતે ॥ ૫૨॥

તેન ત્વં પઞ્ચશતકં વર્ષાણાં યાતનાભવમ્ ।
દુઃખં ભુક્ત્વા મહાવિપ્રાઽધુના તં ગણપં વ્રજ ॥ ૫૩॥

ઇત્યુક્ત્વા તં મહેશાના બ્રહ્મભૂતં ચકાર હ ।
એવં વઃ કથિતં તત્ર મલત્યાગે મહદ્ભયમ્ ॥ ૫૪॥

યદિ સ્વાધીનદેહશ્ચેત્ જ્ઞાત્વા ગર્ભાલયે મલમ્ ।

ત્યજેત્ સોઽપિ નરઃ પૂર્ણાં યાતનાં પ્રલભેત્ પરામ્ ॥ ૫૫॥

ઇદં શ્રુત્વા નરો યસ્તુ ત્રાસયુક્તો ભવેત્ કદા ।
તદારભ્ય મલત્યાગં ન કુર્યાત્ સ લભેદ્ગતિમ્ ॥ ૫૬॥

તં નિર્ભર્ત્સ્ર્ય મહાક્રૂરા ભૈરવા યાતનાભવમ્ ।
દર્શયિત્વા મહદ્ દુઃખં બ્રહ્મભૂતં તુ ચક્રિરે ॥ ૫૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે મલત્યાગયાતનાકથનં નામ વિંશતિતમોઽધ્યાયઃ ॥ ૬.૨૦
(Page ખં. ૬ અ. ૨૧ પાન ૫૮)

## ૬.૨૧ મયૂરે યાત્રાર્થપ્રવેશફલાદિવર્ણનં નામૈકવિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ભૃશુણ્ડ્યુવાચ ।
વિકર્મકારિણાં ક્ષેત્રે કથયિષ્યામિ ચાધુના ।
યથા દણ્ડઃ સ્વહસ્તૈશ્ચ ક્રિયતે ભૈરવૈર્મહાન્ ॥ ૧॥

મયૂરે ક્ષત્રિયઃ કશ્ચિદ્વાસં કૃત્વા સ્થિતોઽભવત્ ।
ગત્વા વનાન્તરે લોકાન્ હત્વા દ્રવ્યં સમગ્રહીત્ ॥ ૨॥

કુટુમ્બપોષણે સક્તઃ શિશ્નોદરપરાયણઃ ।
ચકાર વિવિધં પાપં ક્ષેત્રે માયૂરસંજ્ઞિતે ॥ ૩॥

પરસ્ત્રિયં બલાદ્ ગૃહ્યાયભત્તાં નિરપત્રપઃ ।
જાતિભેદાદિકં સોઽપિ માન્યં નૈવ ચકાર હ ॥ ૪॥

ભગિનીમેકલાં દૃષ્ટ્વા કદા મદ્યેન વિહ્વલઃ ।
હઠાત્ ગૃહ્ય મહેશાના બુભુજે કામનાયુતઃ ॥ ૫॥

ચૌરાદીનિ ચકારાપિ બ્રહ્મહત્યાં તથા ખલઃ ।
ગોસ્ત્રીવધાદિકં દુષ્ટઃ કિં વદામિ વિશેષતઃ ॥ ૬॥

ગણેશં ન પુપૂજાસૌ કદાચિદમરાન્ પરાન્ ।
યાત્રાં નૈવ ચકારાપિ પાપનિષ્ઠો મમાર હ ॥ ૭॥

ભૈરવાસ્તં સમાગૃહ્ય બદ્ધ્વા તાડ્ય નરાધમમ્ ।
નિન્યુઃ સ્વસ્થાનગં તે તુ નગ્નં ભૈરવનાયકમ્ ॥ ૮॥

ક્ષત્રિયોઽથ મહાક્રૂરં દૃષ્ટ્વા ભૈરવનાયકમ્ ।
હાહા કૃત્વા પપાતાઽસૌ મૂર્ચ્છિતો ધરણીતલે ॥ ૯॥

સાવધાનં તતઃ કૃત્વા માયયા નગ્નભૈરવઃ ।
મૃતિમૂર્ચ્છાવિહીનં ચ દુષ્ટં ચકાર સર્વપઃ ॥ ૧૦॥

તતસ્તં ગૃહ્ય દૂતાસ્તે ભૈરવસ્ય મહાત્મનઃ ।
અગ્નિકુણ્ડેષુ સઙ્ક્ષિપ્ય દાહયામાસુરઞ્જસા ॥ ૧૧॥

સહસ્રે તે તં ગતેષુ વર્ષેષુ ક્રોધસંયુતઃ ।
અગ્નિચક્રે સમાક્ષિપ્ય ભ્રામયામાસુરઞ્જસા ॥ ૧૨॥

હાહાકારરવૈર્યુક્તો બભ્રામાગ્નૌ નરાધમઃ ।
ન મમાર ન મૂર્ચ્છાં સોઽલભદ્ભૈરવમાયયા ॥ ૧૩॥

તતઃ સહસ્રવર્ષાન્તે હૈમકુણ્ડે સમાક્ષિપન્ ।
ભૈરવાસ્તં મહાદુષ્ટં શીતૈશ્ચક્રુઃ પ્રપીડિતમ્ ॥ ૧૪॥

તતઃ સહસ્રવર્ષાન્તે શિલાયાં સ્થાપ્ય મુદ્ગરૈઃ ।
ચૂર્ણયામાસુરુગ્રૈસ્તં ખલં કણ્ટકસંયુતૈઃ ॥ ૧૫॥

એવં ગતાનિ વર્ષાણિ સહસ્રં દેવસત્તમાઃ ।
તતો યામ્યાં દદુસ્તસ્મૈ યાતનાં દારુણાં પરામ્ ॥ ૧૬॥

રુરુર્જન્તુભિરાદષ્ટો રૌરવેઽભૂન્નરાધમઃ ।
સ સહસ્રં વર્ષકાણિ મહોગ્રૈર્વહ્નિસન્નિભૈઃ ॥ ૧૭॥

તતસ્તૈલકટાહેષુ સન્તપ્તેષુ ચ તં ભટાઃ ।
ચિક્ષિપુર્દારુણાં સોઽપિ વેદનાં બુભુજે પરામ્ ॥ ૧૮॥

તતઃ સહસ્ત્રવર્ષાન્તે તપ્તવાલુભિરેવ તમ્ ।
આચ્છાદ્ય સ્થાપયામાસુર્ભૈરવાઃ ક્ષત્રિયાધમમ્ ॥ ૧૯॥

સહસ્રં તત્ર વર્ષાણિ બુભુજે દુઃખમુલ્બણમ્ ।
તતઃ સ પપાત પિશાચયોન્યાં દુઃખસંયુતઃ ॥ ૨૦॥

ક્ષુધા તૃષા સમાયુક્તઃ સદા શીતોષ્ણભાવકૈઃ ।
બભ્રામ ક્ષેત્રમધ્યે સ પીડિતો યત્ર તત્ર ચ ॥ ૨૧॥

તત્ર તં દેવદૂતાશ્ચ દૃષ્ટ્વા સ્વનિકટે સ્થિતમ્ ।
તદા દણ્ડાદિભિઃ સર્વે તાડયામાસુરોજસા ॥ ૨૨॥

વેદશાસ્ત્રધ્વનિં શ્રુત્વા હોમધૂમાદિકં તથા ।
પપાલ દુઃખસંયુક્તો મન્ત્રશસ્ત્રભયાત્ કદા ॥ ૨૩॥

ત્રીણિ વર્ષસહસ્રાણિ ભુક્ત્વા દુઃખં તતઃ પરમ્ ।
ભૈરવૈશ્ચ સમાનીતો નનામ નગ્નભૈરવમ્ ॥ ૨૪॥

શુદ્ધસ્તેન સમાનીતો ગણેશસ્યૈવ મન્દિરે ।
ગણેશ્વરં તત્ર દૃષ્ટ્વા બ્રહ્મભૂતો બભૂવ હ ॥ ૨૫॥

એવં પાપપ્રચારાન્ સન્દણ્ડ્ય બ્રહ્મમયં પુનઃ ।
ચક્રુઃ ક્ષેત્રે મૃતત્વાત્ કથયિતું શક્યતે ન વૈ ॥ ૨૬॥

(Page ખં. ૬ અ. ૨૧ પાન ૫૯)
અન્યં પાપકૃતઃ કર્મ દાહકં વિધિમુત્તમમ્ ।
કથયામિ સમાસેન શ ृણુધ્વં શિવમુખ્યકાઃ ॥ ૨૭॥

બ્રાહ્મણઃ કાશ્યપઃ કશ્ચિત્ મયૂરે સંસ્થિતોઽભવત્ ।
ચૌર્યમદ્યાદિકં સોઽપિ ચકાર નિત્યમાદરાત્ ॥ ૨૮॥

પરસ્ત્રીલમ્પટઃ સોઽપિ શિશ્નોદરપરોઽભવત્ ।
બ્રહ્મહત્યાં દ્રવ્યલોભાચ્ચકાર કાશ્યપોઽધમઃ ॥ ૨૯॥

જ્ઞાત્વા રાજ્ઞા દ્વિજસ્યૈવાહૃત્ય સર્વં પુનર્દ્વિજમ્ ।
બદ્ધ્વા ક્ષેત્રાદ્બહિશ્ચક્રે નરૈર્ધર્મપરાયણૈઃ ॥ ૩૦॥

તતો દ્વિજો વિલપ્યૈવ કૃત્વા શપથમાગતઃ ।
મયૂરં તત્ર લોકૈઃ સ દ્વારયાત્રા પરોઽભવત્ ॥ ૩૧॥

દ્વારયાત્રારતં દૃષ્ટ્વા લોકાસ્તં મેનિરે પુનઃ ।
બ્રાહ્મણં શ્રદ્ધયા યુક્તા વસ્ત્રાન્નં ચ દદુઃ પરમ્ ॥ ૩૨॥

ચતુર્દ્વારમયીં યાત્રાં ચકાર બ્રાહ્મણાધમઃ ।
પઞ્ચમ્યાં પારણં ચક્રે ષષ્ઠ્યાં સર્પેણ દંશિતઃ ॥ ૩૩॥

મૃતં મયૂરક્ષેત્રે તં વિષોગ્રેણ પ્રપીડિતમ્ ।
સઙ્ગૃહ્ય ભૈરવાઃ સર્વે નગ્નભૈરવમાયયુઃ ॥ ૩૪॥

યાતનાગારકં દેવો દર્શયામાસ ભીતિદમ્ ।
તસ્મૈ પુનશ્ચ વિઘ્નેશં દર્શયામાસ દેવપાઃ ॥ ૩૫॥

દૃષ્ટ્વા ગણપતિં સોઽપિ બ્રહ્મભૂતો બભૂવ હ ।
ક્ષેત્રે કૃતં મહત્પાપં દ્વારાણાં યાત્રયા ગતમ્ ॥ ૩૬॥

અન્યચ્ચ શ‍ૃણુત પ્રાજ્ઞા મયૂરે ચરિતં ભવમ્ ।
પુરા કલ્પે સમાસેન કથયામિ મહેશ્વરાઃ ॥ ૩૭॥

દણ્ડકારણ્યદેશે તુ બ્રાહ્મણોઽત્રિકુલોદ્ભવઃ ।
બાલ્યાત્ પ્રારભ્ય દુર્બુદ્ધિઃ પાપકર્મપરોઽભવત્ ॥ ૩૮॥

નામ્ના દેવાઃ સુપ્રતીકો દ્રવ્યલોભી બભૂવ હ ।
ચૌર્યદ્રવ્યં જનાનાં સઙ્ગૃહ્ય ભોગાન્ બુભોજ ચ ॥ ૩૯॥

કદા સપ્તપુરીણાં ચ યાત્રાર્થં જગ્મુરાદરાત્ ।
ચર્તુવર્ણજનાઃ સોઽપિ તેષાં મધ્યે જગામ હ ॥ ૪૦॥

દ્રવ્યલોભી જનાનાં ચ ચૌર્યદ્રવ્યં સમગ્રહીત્ ।
એવં બહુધનસ્તત્ર જાતોઽસૌ બ્રાહ્મણાધમઃ ॥ ૪૧॥

કૃત્વા સપ્તપુરીણાં તે યાત્રાં પુનઃ સમાયયુઃ ।
સ્વદેશં તૈઃ સમાયુક્તઃ સોઽપિ સ્વગૃહમાયયૌ ॥ ૪૨॥

તતઃ સ્ત્રીપુત્રકાન્ સ્વસ્ય મણ્ડયામાસ ભૂષણૈઃ ।
ચચાર તીર્થગો ભૂત્વા કદાચિચ્ચૌર્યકારણાત્ ॥ ૪૩॥

દ્વિજઃ પૌરાણિકં દૃષ્ટ્વા પુરાણકથને રતમ્ ।
ચૌર્યાર્થં તત્ર પાપાત્મા જનમધ્યે સમાસ્થિતઃ ॥ ૪૪॥

તતો મયૂરક્ષેત્રસ્ય માહાત્મ્યં સ્કાન્દસમ્ભવમ્ ।
શુશ્રાવ સુપ્રતીકશ્ચ જનૈઃ સર્વૈર્મહેશ્વરાઃ ॥ ૪૫॥

મયૂરક્ષેત્રમાહાત્મ્યશ્રવણેન દુરાત્મનઃ ।
દ્વિજસ્ય બુદ્ધિભેદો વૈ બભૂવે દૈવયોગતઃ ॥ ૪૬॥

સ તુ તત્ર ચકારાપિ વિચારં માનસે પરમ્ ।
અહો મયા દ્વિજેનૈવ કિં કૃતં પાપમુલ્બણમ્ ॥ ૪૭॥

વિષાદિના હતા લોકા બ્રાહ્મણાદ્યા મયા બહુ ।
તીર્થેષુ ચૌર્યહત્યાદિ પાપં તુ પ્રકૃતં મયા ॥ ૪૮॥

કાશ્યાં પ્રદક્ષિણાયાં તુ પઞ્ચક્રોશ્યાં મયા પરમ્ ।
પાપં કૃતમપારં વૈ કા ગતિર્મે ભવિષ્યતિ ॥ ૪૯॥

મદ્વિના બ્રાહ્મણઃ કશ્ચિદીદૃશો ન ભવેત્ કદા ।
યો બ્રહ્મણિ રતઃ સર્વો બ્રાહ્મણસ્તેન કથ્યતે ॥ ૫૦॥

એકાન્તગં તતઃ પૌરાણિકં ગત્વા દ્વિજાધમઃ ।
ઉવાચ તં પ્રણમ્યાદૌ કૃત્વા કરપુટં વચઃ ॥ ૫૧॥

સુપ્રતીક ઉવાચ ।
(Page ખં. ૬ અ. ૨૧ પાન ૬૦)
સર્વતીર્થેષુ ક્ષેત્રેષુ પાપં દુષ્ટઃ સમાચરેત્ ।
વજ્રલેપં તદેવાઽપિ કુત્ર નાશં ગમિષ્યતિ ॥ ૫૨॥

પૌરાણિક ઉવાચ ।
સપ્તપુર્યાદિક્ષેત્રેષુ નરઃ પાપં સમાચરેત્ ।
તન્ મયૂરક્ષેત્ર એવ પ્રવેશેન લયં વ્રજેત્ ॥ ૫૩॥

ચતુર્વિધાનિ ક્ષેત્રાણિ સર્વત્ર બ્રહ્મગોલકે ।
ધર્માર્થકામમોક્ષાણાં પ્રદાનિ સેવતાં દ્વિજ ॥ ૫૪॥

પઞ્ચમં બ્રહ્મભૂતાખ્યં મયૂરં નાત્ર સંશયઃ ।
તત્ર પાપં કૃતં ચેદ્વૈ વજ્રલેપતમં ભવેત્ ॥ ૫૫॥

એવં તસ્ય વચઃ શ્રુત્વા તં પ્રણમ્ય સમાયયૌ ।
ગૃહં દારાદિ સઙ્ગૃહ્ય મયૂરેશં જગામ હ ॥ ૫૬॥

યથાવિધિ ચકારાઽસૌ યાત્રાં ક્ષેત્રસમુદ્ભવામ્ ।
દ્વારાદિચિહ્નિતાં સોઽપિ નિવાસમકરોત્તતઃ ॥ ૫૭॥

દેવાગારં સમાશ્રિત્યાભજત્તં ગણનાયકમ્ ।
અન્તે પાપવિહીનઃ સ બ્રહ્મભૂતો બભૂવ હ ॥ ૫૮॥

એવં નાના જનાસ્તત્ર પતિતાનાં મહેશ્વરાઃ ।
પતિતાઃ પાપહીનાઃ પ્રવેશે જાતા મયૂરકે ॥ ૫૯॥

અધુના કથયિષ્યામિ ચરિત્રં યત્ પુરાતનમ્ ।
શ્રુત્વા સંશયહીનાસ્તં મયૂરેશં ભજન્તિ વૈ ॥ ૬૦॥

વૈશ્યો ધર્મધ્વજો નામ દ્રવ્યલોભી બભૂવ હ ।
વિષેણ પિતરં સોઽપિ મારયામાસ લોભતઃ ॥ ૬૧॥

નાનાદ્વિજાદિકાન્ સોઽપિ વન્ધ પૂજ્યાન્ દુરાત્મવાન્ ।
વિષેણ મારયામાસ નિત્યં દ્રવ્યાર્થમુલ્બણઃ ॥ ૬૨॥

સ કદાચિદ્વણિગ્ભિશ્ચ ક્રયવિક્રયકારણાત્ ।
જગામ દણ્ડકારણ્યે જનૈઃ સહ મહાખલઃ ॥ ૬૩॥

તત્ર માઘે મહાયાત્રાં જગ્મુર્લોકા વિશેષતઃ ।
મયૂરેશં તતઃ સોઽપિ તૈર્જગામ સુહર્ષિતઃ ॥ ૬૪॥

દ્રવ્યલોભાર્થમાનન્દાત્ પુરં માયૂરમાયયૌ ।
તત્ર પ્રવેશમાત્રેણ તં ચ પાપાનિ તત્યજુઃ ॥ ૬૫॥

બહિઃ સ્થિતાનિ પશ્યન્તિ યદાઽસાવાગમિષ્યતિ ।
તદા પુનઃ પ્રવેશં વૈ કરિષ્યામો નરાધમમ્ ॥ ૬૬॥

તત્ર દૈવપ્રસઙ્ગેન ન પાપાનિ ચકાર હ ।
યથાવિધિ તથા યાત્રાં ચક્રે હર્ષસમન્વિતઃ ॥ ૬૭॥

પુનર્માનવસઙ્ઘૈઃ સ નિર્જગામ મહેશ્વરઃ ।
મયૂરેશં પરિત્યજ્ય માર્ગસંસ્થો બભૂવ હ ॥ ૬૮॥

તં દૃષ્ટ્વા તસ્ય પાપાનિ શુદ્ધં યાત્રાવિધાનતઃ ।
સ્પ્રષ્ટું તાન્યસમર્થાનિ બભૂવુર્દેવસત્તમાઃ ॥ ૬૯॥

તતઃ પાપાનિ સર્વાણિ વિચારં ચક્રુરાદરાત્ ।
અહો યઃ ક્ષેત્રગો ભૂત્વા પાપાનિ કુરુતે સદા ॥ ૭૦॥

તથાઽસ્માભિર્મયૂરેઽયં ગત્વા પાપં કરિષ્યતિ ।
જ્ઞાતં તેન મહાવિઘ્નૈઃ પીડિતો નૈવ નિશ્ચિતમ્ ॥ ૭૧॥

અધુના શુદ્ધરૂપોઽયં બહિઃ સદા સમાગતઃ ।
અતઃ પુણ્યાનિ નિત્યં તુ કરિષ્યતિ વિશેષતઃ ॥ ૭૨॥

વયં કુત્ર ગમિષ્યામો વિઘ્નં કુરુત સર્વતઃ ।
યેનાઽયં પાપકર્માઽપિ કુરુતે પાપમલ્પકમ્ ॥ ૭૩॥

કિઞ્ચિત્ પાપયુતં વૈશ્યં પ્રવિશ્યામો વિશેષતઃ ।
તતો મહાઘસંયુક્તં કરિષ્યામો ન સંશયઃ ॥ ૭૪॥

એવં વિચાર્ય પાપાનિ પાપિનાં હૃદયેષુ ચ ।
પ્રવિશ્ય તાન્ સમાનાય્ય વૈશ્યં તં સમપીડયન્ ॥ ૭૫॥

અકસ્માચ્ચૌરમુખ્યૈશ્ચ દ્રવ્યં તસ્ય સમાહૃતમ્ ।
તેનાતિદુઃખયુક્તો હિ ધર્મધ્વજો બભૂવ હ ॥ ૭૬॥

તતઃ પાપેષુ દુર્બુદ્ધિશ્ચકાર હ પુનર્મતિમ્ ।
(Page ખં. ૬ અ. ૨૨ પાન ૬૧)
એતસ્મિન્નન્તરે તત્ર બ્રાહ્મણં સ દદર્શ હ ॥ ૭૭॥

તં પ્રણમ્ય સ્વવૃત્તાન્તં કથયામાસ વિસ્તરાત્ ।
શ્રુત્વા તં પુનરપ્યાહ બ્રાહ્મણઃ સર્વમાર્ગવિત્ ॥ ૭૮॥

ત્વયા કૃતાનિ પાપાનિ તાનિ ત્વાં પીડયન્તિ વૈ ।
અતસ્ત્વં સત્વરો ભૂત્વા મયૂરેશં સમાશ્રય ॥ ૭૯॥

સ્વજનૈઃ પુત્રદારાદિ સમાનાય્ય મહામતે ।
તત્રસ્થો ધર્મસંયુક્તો દુઃખહીનો ભવિષ્યસિ ॥ ૮૦॥

તચ્છ્રુત્વા સ પ્રણમ્યાદૌ તં મયૂરેશકં દ્વિજમ્ ।
જગામ ત્વરયા યુક્તસ્તતઃ સર્વાન્ સમાનયત્ ॥ ૮૧॥

મયૂરે વૈશ્યવૃત્યા ચ ધર્મયુક્તઃ સમાસ્થિતઃ ।
ધર્મધ્વજશ્ચકારાઽસૌ ગણેશભજનં સદા ॥ ૮૨॥

પાપાનિ ભોગહીનાનિ બહિર્મમ્રુઃ સ્થિતાન્યપિ ।
ધર્મધ્વજશ્ચ દેવેશા બ્રહ્મૈવાન્તે બભૂવ હ ॥ ૮૩॥

ક્ષેત્રં નરેણ માયૂરં ન ત્યાજ્યં તુ કદાચન ।
પીડિતેન મહાદોષૈર્મતં તદપિ તદ્વરમ્ ॥ ૮૪॥

અન્યત્ર રાજ્યભોગસ્થોઽથવા સ્વર્ગસ્થ એવ સઃ ।
મયૂરે નીચજાતિસ્થા કિઞ્ચ તેન સમો ન હિ ॥ ૮૫॥

આયાસેન વિહીનત્વાદ્બ્રહ્મભૂતો ભવેન્નરઃ ।
મયૂરે તેન કિં તુલ્યં ભવેદ્બ્રહ્માણ્ડમણ્ડલે ॥ ૮૬॥

ઇદં યઃ શ ૃણુયાદ્વા શ્રાવયેદ્વા પઠેન્નરઃ ।
પાપહીનઃ સ્વભાવેન ધર્મયુક્તો ભવિષ્યતિ ॥ ૮૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે મયૂરે યાત્રાર્થપ્રવેશફલાદિવર્ણનં નામૈકવિંશતિતમોઽધ્યાયઃ ॥ ૬.૨૧

## ૬.૨૨ ક્ષેત્રસંન્યાસાદિવર્ણનં નામ દ્વાવિંશતિતમોऽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ભૃશુણ્ડ્યુવાચ ।
અથ વક્ષ્યામિ દેવેશા મયૂરપ્રાપકં મહત્ ।
પુણ્યં ચિત્તૈકભાવેન શૃણુધ્વં સુખદાયકમ્ ॥ ૧॥

કુત્ર આઙ્ગિરસે જાતો દેવપ્રિય ઇતિ શ્રુતઃ ।
પુરા કલ્પે સ ધર્માત્મા સ્વધર્મનિરતોऽભવત્ ॥ ૨॥

ગણેશે પ્રીતિસંયુક્તો ગાણપત્યપ્રિયોऽભવત્ ।
મુક્તિમિચ્છન્ સદા કર્માણિ ચકાર વિધાનતઃ ॥ ૩॥

તતસ્તસ્ય મહેશાના બુદ્ધિઃ પ્રાદુર્બભૂવ હ ।
તયા સમ્પ્રેરિતસ્તીર્થાનિ ક્ષેત્રાણિ ચકાર હ ॥ ૪॥

શાસ્ત્રે વિધિં સમાશ્રિત્ય પૃથિવ્યાં મુખ્યકાનિ સઃ ।
ક્ષેત્રાણિ તીર્થમુખ્યાનિ યાત્રયા ચાકરોદ્ દ્વિજઃ ॥ ૫॥

તતઃ સ્વગૃહમાગત્ય દારાપત્યૈઃ સમન્વિતઃ ।
ગણેશમભજન્નિત્યં ભક્તિયુક્તેન ચેતસા ॥ ૬॥

તતશ્ચ માનસે સોऽપિ વિચારમકરોત્ પરમ્ ।
અહો મયૂરપક્ષેત્રં સેવનીયં નિરન્તરમ્ ॥ ૭॥

જ્ઞાત્વા દ્વિજં સમુદ્યુક્તં દારાપત્યૈઃ સમન્વિતમ્ ।
માયા તં પીડયામાસ મયૂરે વાસભઞ્જનાત્ ॥ ૮॥

યાત્રાર્થં તેન યત્કિઞ્ચિત્ ગૃહે દ્રવ્યાદિ સઞ્ચિતમ્ ।
(Page ખં. ૬ અ. ૨૨ પાન ૬૨)
તદેવ ચૌરમાર્ગેણ નષ્ટં માયાપ્રભાવતઃ ॥ ૯॥

તતોऽતિવિસ્મિતો ભૂત્વા ખેદયુક્તો બભૂવ હ ।
પાપયુક્તોऽહમત્યન્તં તેન વિઘ્નયુતઃ કૃતઃ ॥ ૧૦॥

શુક્લવૃત્ત્યા ગમિષ્યામિ મયૂરેશં ન સંશયઃ ।
તતો જ્વરસમાયુક્તો બભૂવ બ્રાહ્મણોત્તમઃ ॥ ૧૧॥

નિર્જગામ તતઃ સોऽપિ સ્વગૃહે જ્વરસંયુતઃ ।

શુક્લવૃત્તિધરો ભૂત્વા નિયમ્યાત્માનમાત્મના ॥ ૧૨॥

તૃતીયે દિવસે તત્ર વિઘ્નેશો વિઘ્નહારકઃ ।
બભૂવ સ દ્વિજસ્યાઽપિ પરં શૃણુત ચેષ્ટિતમ્ ॥ ૧૩॥

ગણેશકૃપયા વિપ્રો જ્વરહીનો બભૂવ હ ।
બ્રાહ્મણસ્ય સ્વરૂપેણ ગણેશસ્તં સમાયયૌ ॥ ૧૪॥

તસ્ય પુત્રં સમાહૂય દ્રવ્યં દત્વા સુપુષ્કલમ્ ।
અન્તર્ધાનં ચકારાઽસૌ પુત્રસ્તાતં જગાદ તુ ॥ ૧૫॥

જ્ઞાત્વા દેવં વિચાર્યૈવ સ્વસ્થચિત્તો બભૂવ હ ।
દેવપ્રિયો મયૂરેશમાજગામ દ્વિજોત્તમઃ ॥ ૧૬॥

યાત્રાદિકં ચકારાઽસૌ ગર્ભાગારે સમાશ્રિતઃ ।
અભજદ્ગણરાજં તમન્તે તલ્લીનતાં યયૌ ॥ ૧૭॥

યાનિ ક્ષેત્રાણિ તીર્થાનિ બ્રહ્માણ્ડે સેવિતાનિ ચેત્ ।
તદા નરેણ માયૂરક્ષેત્રં લભ્યં મહેશ્વરાઃ ॥ ૧૮॥

દેવેશા ઊચુઃ ।
ચોરાદયઃ સમાખ્યાતાસ્ત્વયા બ્રહ્મર્ષિસત્તમ ।
કિં ચક્રુર્યેન પુણ્યેન મયૂરેશે લયં યયુઃ ॥ ૧૯॥

ભૃશુણ્ડ્યુવાચ ।
પૂર્વજન્મનિ માહાત્મ્યં સંશ્રુતં કિઞ્ચિદપ્યહો ।
ક્ષેત્રસ્ય પાપકર્મસ્થા અન્તે તત્ સસ્મરુર્યદિ ॥ ૨૦॥

અન્તે સ્મરણયોગેન પાપિનોઽન્યભવે કદા ।
યયુઃ ક્ષેત્રે મરણતો લયં દેવા ગણેશ્વરે ॥ ૨૧॥

ગાણેશસ્ય ચ માર્ગસ્ય શ્રવણં પાપચેતસામ્ ।
ભવેન્નાનાવિધસ્યાઽપિ કિઞ્ચિદ્દેવેન્દ્રસત્તમાઃ ॥ ૨૨॥

યદિ મરણકાલે તુ તસ્ય સંસ્મરણં ભવેત્ ।
પુરો જન્મનિ ચાજ્ઞાનાત્તસ્ય સંસેવનં ભવેત્ ॥ ૨૩॥

અથવા જ્ઞાનયુક્તઃ સ નરસ્તત્ સકૃદાચરેત્ ।
યદ્વા તદ્વાઽઽચરેદ્વાપિ બ્રહ્મભૂતઃ સ જાયતે ॥ ૨૪॥

અથાસંસ્કારયુક્તસ્ય ગાણેશેનાધિકારતઃ ।

પ્રવેશો ન ભવેત્તસ્ય ચરિત્રં શ ृણુત પ્રિયાઃ ॥ ૨૫॥

ક્ષત્રિયઃ સુલભો નામા બભૂવ પૃથિવીપતિઃ ।
અઙ્ગદેશસ્ય રાજ્યં સ ચકાર ધર્મસંયુતઃ ॥ ૨૬॥

મયૂરેશસ્ય સ શ્રુત્વા માહાત્મ્યં ક્ષેત્રસમ્ભવમ્ ।
પુત્રે રાજ્યં પરિત્યજ્ય વાસાર્થં તુ મનો દધે ॥ ૨૭॥

યથાશાસ્ત્રં વિધાનેન મયૂરેશં સમાયયૌ ।
ચકાર વિધિના યાત્રાં સ્વયં દ્વારાદિચિહ્નિતામ્ ॥ ૨૮॥

તતસ્તત્ર સ્થિતો રાજા વાર્ષિકીં વિવિધાં પુનઃ ।
ચકાર યાત્રાં ક્ષત્રસ્થો દેવાદીનાં વિધાનતઃ ॥ ૨૯॥

તતો મનસિ સન્ધાર્ય ક્ષેત્રસંન્યાસકારણાત્ ।
સર્વાનાજ્ઞાપયામાસ સસ્ત્રીકઃ સ ઉવાસ હ ॥ ૩૦॥

તતઃ સ ભૈરવેણૈવ બુદ્ધિભેદયુતઃ કૃતઃ ।
વિચારમકરોચ્ચિત્તે કિમિદં ક્ષેત્રમુત્તમમ્ ॥ ૩૧॥

ન કાશીતુલ્યતાં યાતિ ક્ષેત્રં બ્રહ્માણ્ડમણ્ડલે ।
અયં શિવસુતઃ પ્રોક્તો મયૂરેશો ન સંશયઃ ॥ ૩૨॥

બ્રહ્મ સર્વત્ર યોગેન તિષ્ઠતિ તેન વર્ણ્યતે ।
વેદાદિષુ ગણેશાનો બ્રહ્મરૂપી ન મુખ્યતઃ ॥ ૩૩॥

અતોઽહં ભ્રમિતો નૂનં વાણ્યા પુરાણસંસ્થયા ।
(Page ખં. ૬ અ. ૨૨ પાન ૬૩)
ગમિષ્યામિ ન સન્દેહઃ ક્ષેત્રં કાશીસમાશ્રિતમ્ ॥ ૩૪॥

એવં વિચાર્ય ભૂપાલો મયૂરં ત્યજ્ય દેવપાઃ ।
કાશીં જગામ માર્ગે સ મમાર રોગસંયુતઃ ॥ ૩૫॥

પૂર્વસંસ્કારયોગેન કાશ્યાં સ બ્રાહ્મણોઽભવત્ ।
ધર્મયુક્તશ્ચકારાઽપિ કાશીવાસં હિતાર્થતઃ ॥ ૩૬॥

મરણોન્મુખકાલાય તસ્મૈ વિશ્વેશ્વરઃ સ્વયમ્ ।
ગણેશૈકાક્ષરં મન્ત્રં દદૌ તારકનામકમ્ ॥ ૩૭॥

શૌનક ઉવાચ ।
કથાં વિચિત્રાં વદસિ સૂત ત્વં હર્ષદાયિનીમ્ ।

તત્ર સંશયકં છિન્ધિ વદિષ્યામિ ત્વદગ્રતઃ ॥ ૩૮॥

રામનામભવં મન્ત્રમવદત્તારકં પરમ્ ।
પુરાણં કુત્રચિત્ દેવં શિવપઞ્ચાક્ષરં પુનઃ ॥ ૩૯॥

કુત્રૌઙ્કારં ચ કુત્રાપિ શક્તિસૂર્યાત્મકં પરમ્ ।
ગણેશૈકાક્ષરં કુત્ર નિશ્ચયો નૈવ જાયતે ॥ ૪૦॥

અતઃ સંશયનાશાર્થં વદ સર્વજ્ઞસત્તમ ।
ત્વદન્યઃ સંશયચ્છેત્તાઽસ્માકં નૈવ ભવિષ્યતિ ॥ ૪૧॥

સૂત ઉવાચ ।
બિમ્બરૂપં મહદ્બ્રહ્મ સ એવ ચતુરાનનઃ ।
ગકારાક્ષરગશ્ચાત્ર ગણેશૈકાક્ષરે મતઃ ॥ ૪૨॥

તસ્ય પાલકભાવેન વિષ્ણુઃ સર્વપ્રવર્તકઃ ।
અકારાક્ષરસંસ્થશ્ચ મન્ત્રરાજે મહામુને ॥ ૪૩॥

તયોઃ સંહારકર્તા ત્વનુસ્વારઃ શઙ્કરઃ સ્મૃતઃ ।
વરદાનાદ્ ગણેશસ્ય મન્ત્રે જાનીહિ નિશ્ચિતમ્ ॥ ૪૪॥

તેષાં મનોમયો ભાનુઃ સ્વસ્વકર્મધરો બભૌ ।
સાનુનાસિકરૂપેણ મન્ત્રે સોઽપિ પ્રતિષ્ઠિતઃ ॥ ૪૫॥

ચતુર્ણાં દેહરૂપા સા શક્તિર્વાણીમયી મતા ।
સર્વત્ર સંસ્થિતા વિપ્ર મન્ત્રે દૃશ્યસ્વભાવતઃ ॥ ૪૬॥

એભિઃ સૃષ્ટં જગત્સર્વમોઙ્કારાકૃતિલક્ષણમ્ ।
તત્ર ક્રીડન્તિ તેનૈવ મન્ત્ર ઓઙ્કારસંયુતઃ ॥ ૪૭॥

એતેષામર્થભાવેન ગણેશશ્ચ પ્રકીર્તિતઃ ।
સ એવ દેવતા પ્રોક્તા વેદેષુ વેદવાદિભિઃ ॥ ૪૮॥

ગણેશમન્ત્રગાઃ સર્વે દેવેશાઃ શઙ્કરાદયઃ ।
જગન્નાનાવિધં બ્રહ્મ તથા તત્ર સ્થિતં મતમ્ ॥ ૪૯॥

યથા દેવાશ્ચ વિપ્રેશ કલયા ગણપસ્ય વૈ ।
ગણેશાકારરૂપાસ્તે તથા મન્ત્રાઃ પ્રકીર્તિતાઃ ॥ ૫૦॥

અન્યચ્ચ શ‍ૃણુ ભાવેન કાશ્યાં નાનાવિધા જનાઃ ।
તિષ્ઠન્તિ વિવિધાન્ દેવાન્ ભજન્તે ભક્તિસંયુતાઃ ॥ ૫૧॥

તેષુ સ્વધર્મનિષ્ઠા યે કાશીવાસં યથાવિધિ ।
કુર્વન્તિ તારકં તેભ્યો દદાતિ શઙ્કરઃ સ્વયમ્ ॥ ૫૨॥

તેષુ શાક્તાઃ સ્થિતાસ્તત્ર તેભ્યઃ શક્તિમયં પરમ્ ।
તારકં કથયામાસ શઙ્કરઃ કરુણાનિધિઃ ॥ ૫૩॥

સૌરેભ્યઃ સૌરભાવાખ્યં શૈવેભ્યઃ શિવરૂપકમ્ ।
વૈષ્ણવં વિષ્ણુભક્તેભ્યસ્તારકં હ્યવદચ્છિવઃ ॥ ૫૪॥

સ્વધર્મનિરતાસ્તત્ર કર્મ ચક્રુશ્ચ નિત્યશઃ ।
કર્માઙ્ગદેવપ્રીત્યર્થમોઙ્કારં તેભ્ય આદિશત્ ॥ ૫૫॥

ગાણેશા યે સ્થિતાસ્તેભ્યઃ પૂર્ણતારકરૂપકમ્ ।
ગણેશૈકાક્ષરં મન્ત્રં દદાતિ હર્ષસંયુતઃ ॥ ૫૬॥

તે સર્વે તારકં પ્રાપ્ય કૈલાસે શિવસન્નિભાઃ ।
અતિષ્ઠન્ યોગમાસ્થાય મન્ત્રધ્યાનપરાયણાઃ ॥ ૫૭॥

સાક્ષાત્કારં પ્રચક્રુસ્તે બ્રહ્મ યન્ મન્ત્રગં પરમ્ ।
તત્ર તલ્લીનભાવેન યોગિનો બભ્રમુસ્તતઃ ॥ ૫૮॥

મહાલયે મહેશસ્ય શરીરે લીનતાં યયુઃ ।
પુનઃ સૃષ્ટૌ નરા ભૂત્વા તત્ર યોગરતા બભુઃ ॥ ૫૯॥

(Page ખં. ૬ અ. ૨૨ પાન ૬૪)
મન્ત્રં મન્ત્રાર્થભાવં ચ ત્યક્ત્વા બ્રહ્મણિ સંસ્થિતાઃ ।
સ્વસ્વેષ્ટબ્રહ્મગા અન્તે ભવંસ્તે મુનિસત્તમ ॥ ૬૦॥

યે પાપકારિણઃ કાશ્યાં વસન્તિ યદિ તે મૃતાઃ ।
તેભ્યસ્તારકરૂપં તુ ન દદાતિ સદાશિવઃ ॥ ૬૧॥

ભૈરવીં યાતનાં તે તુ ભુક્ત્વા કૈલાસમાસ્થિતાઃ ।
લયે મરણસંયુક્તાઃ પુનર્જન્મધરા મતાઃ ॥ ૬૨॥

શૌનક ઉવાચ ।
વદન્તિ વૈ પુરાણેષુ મુનયો બ્રહ્મવાદિનઃ ।
ક્ષેત્રેષુ નાનાભાવેષુ મૃતા મુક્તિમવાપ્નુયુઃ ॥ ૬૩॥

તીર્થાનિ સ્નાનમાત્રેણ મુક્તિદાનિ વદન્તિ ચ ।

વ્રતાદીનિ મહાપ્રાજ્ઞ નાનામતવિભેદતઃ ॥ ૬૪॥

સકામાનિ ચ કર્માણિ કથિતાનિ મુનીશ્વરૈઃ ।
નાનાવિધાનિ વૈ તેષુ સંસ્મૃતાનિ ફલાનિ ચ ॥ ૬૫॥

તેષાં કર્તાર એવં યે ફલાનિ પ્રાપ્નુવન્તિ તે ।
ઇહૈવ કિઞ્ચિત્ કેચિત્તુ પરત્ર દ્વિજસત્તમ ॥ ૬૬॥

કેચિત્ સ્વલ્પફલં કેચિત્ પુષ્કલં નાત્ર સંશયઃ ।
કિમિદં કૌતુકં વિપ્ર વદ કારણમુત્તમમ્ ॥ ૬૭॥

કાશ્યાં મુક્તિં વિશેષેણ પ્રાપ્નુવન્તિ નરાદયઃ ।
તત્રૈવ મરણે સૂત કથં તે જન્મિનોઽભવન્ ॥ ૬૮॥

સૂત ઉવાચ ।
શબ્દબ્રહ્મસ્વરૂપોઽયં ગુરુરેકઃ પ્રકીર્તિતઃ ।
સર્વેષાં વિવિધાનાં તુ શિષ્યાણાં નાત્ર સંશયઃ ॥ ૬૯॥

શિષ્યાશ્ચતુર્વિધાઃ પ્રોક્તા ઉત્તમા મધ્યમાસ્તથા ।
અધમા અધમેષુ ચાધમા મુનીન્દ્રસત્તમ ॥ ૭૦॥

વિષયાસક્તચિત્તા યે પાપકર્મપરાયણાઃ ।
દુઃખયુક્તા યદાઽત્યન્તં તદર્થં કર્મસેવિનઃ ॥ ૭૧॥

અધમાધમરૂપાશ્ચ કથિતાસ્તે મહર્ષિભિઃ ।
સ્વલ્પં ફલં પ્રાપ્નુવન્તીહ પરત્ર સુનિશ્ચિતમ્ ॥ ૭૨॥

યદિ કર્મફલં સ્વલ્પં દદાતિ કથિતં સદા ।
તેષાં તત્ર રુચિર્નૈવોત્પદ્યતે મૂર્ખભાવતઃ ॥ ૭૩॥

તેષાં વચનભાવાર્થં પ્રવૃત્ત્યર્થં ચ કર્મણિ ।
ફલમેકં સમાખ્યાતં ઉત્તમાધમમાર્ગિણામ્ ॥ ૭૪॥

પરેષાં લજ્જયા યે તુ ભયાદ્વા કર્મ કારિણઃ ।
અધમાસ્તે સમાખ્યાતાઃ પ્રાપ્નુવન્ત્યધિકં ફલમ્ ॥ ૭૫॥

સકામા યે સ્વધર્મસ્થાઃ કર્મ કુર્વન્તિ નિત્યશઃ ।
મધ્યમાસ્તે ફલં સર્વં ભુઞ્જન્તિ કાલમાનતઃ ॥ ૭૬॥

નિઃકામાઃ કર્મકર્તાર ઉત્તમાસ્તે ફલં મુને ।
અક્ષયં કલ્પપર્યન્તં ભુઞ્જન્ત્યત્ર ન સંશયઃ ॥ ૭૭॥

તત્રૈવ યુગમાનં તે કથયામિ સમાસતઃ ।
કૃતે કર્મ કૃતં સદ્યઃ ફલદં જાયતે મુને ॥ ૭૮॥

ત્રેતાયાં ચ કૃતં કર્માન્યકર્માબાધભાવતઃ ।
કાલેન ફલસંયુક્તં ભવતિ પ્રાણિનાં કિલ ॥ ૭૯॥

દ્વાપરે પરલોકે વાઽન્યકર્માબાધભાવતઃ ।
ઇહ તે વાપિ ભુઞ્જન્તિ ધર્મહીનપ્રભાવતઃ ॥ ૮૦॥

કલૌ તુ પરલોકે તે વાઽન્યજન્મનિ માનવાઃ ।
સમ્ભોક્ષ્યન્તિ કૃતં કર્મ કાલમાનપ્રભાવતઃ ॥ ૮૧॥

આસુરેણૈવ ભાવેન નરાઃ સત્તાદિવર્જિતાઃ ।
અતો જાનીહિ રુચ્યર્થં ફલં ચિત્રં ભવત્યહો ॥ ૮૨॥

યથાવિધિ કૃતં કર્મ તદા ફલપ્રદં ભવેત્ ।
અન્યથા કારકાયૈવાસુરં દદ્યાત્ ફલં સદા ॥ ૮૩॥

કૃતે કર્મ કૃતં યેન સકૃત્તસ્ય ફલં લભેત્ ।
ત્રેતાયાં નિષ્ફલં દૃષ્ટ્વા તદા દ્વિગુણમાચરેત્ ॥ ૮૪॥

ફલં દદાતિ ત્રિગુણં દ્વાપરે કર્મ નિશ્ચિતમ્ ।
(Page ખં. ૬ અ. ૨૨ પાન ૬૫)
કલૌ ચતુર્ગુણં પ્રોક્તં ઇહજન્મનિ સૌખ્યદમ્ ॥ ૮૫॥

સકૃચ્ચાપિ ફલં કૃત્વા લભેત્ સત્કર્મ માનવઃ ।
અથવા યુગધર્મેણ ચતુર્ગુણં ફલં લભેત્ ॥ ૮૬॥

અન્યત્ કાશ્યાદિ માહાત્મ્યસમ્ભવં વિપરીતગમ્ ।
મન્યસે તત્ર વક્ષ્યામિ શૃણુ સંશયનાશનમ્ ॥ ૮૭॥

આત્માનુભવહીનો યો મર્ત્યો મોક્ષં લભેન્ન વૈ ।
ઇદં મુખ્યં વિજાનીહિ હ્યન્યત્ર ભ્રમમાત્રકમ્ ॥ ૮૮॥

યથા દેવગણાઃ સર્વેઽમરાઃ શાસ્ત્રે પ્રકીર્તિતાઃ ।
બ્રહ્મણો દિવસાન્તે તે મૃત્યુયુક્તા ભવન્ત્યુત ॥ ૮૯॥

નરાણાં તત્ર જન્માનિ સઙ્ખ્યાહીનાનિ શૌનક ।
ભવન્તિ તેન દેવાશ્ચામરાઃ સઙ્કીર્તિતા બુધૈઃ ॥ ૯૦॥

તથાપિ પઞ્ચ દેવાશ્ચેશ્વરાઃ શાસ્ત્રે પ્રકીર્તિતાઃ ।
વિઘ્નયુક્તા અનીશાસ્તે ભવન્તિ પશ્ય માનદ ॥ ૯૧॥

મહાલયે મરિષ્યન્તિ ત્રિગુણૈઃ સંયુતાઃ કિલ ।
પઞ્ચ દેવા ન સન્દેહો બ્રહ્માદ્યાઃ શાસ્ત્રમાર્ગતઃ ॥ ૯૨॥

તેષાં લોકેષુ ક્ષેત્રેષુ મતા મુક્તિશ્ચ તાદૃશી ।
મરણૈઃ સંયુતાન્યેવ ક્ષેત્રાણિ તત્ર કા કથા ॥ ૯૩॥

ઇન્દ્રાદીનાં વિનાશે તે સમર્થા મૃત્યુહીનકાઃ ।
તેષાં જન્મમૃતી જન્તુર્ન પશ્યતિ કદાચન ॥ ૯૪॥

ઈશ્વરત્વમતઃ શાસ્ત્રે કથિતં રુચિકારણાત્ ।
જન્મમૃત્યુવિહીનાઽપિ મુક્તિઃ સઙ્કથિતા બુધૈઃ ॥ ૯૫॥

વેદશાસ્ત્રપુરાણેષુ સ્વાનન્દો લયવર્જિતઃ ।
સદા બ્રહ્મમયત્વાદ્વૈ તત્ર મુક્તિર્વિશિષ્યતે ॥ ૯૬॥

સ્વાનન્દેનૈવ યદ્દત્તં તદેવ બ્રહ્મ સૌખ્યદમ્ ।
પાત્રહીનપ્રભાવત્વાદ્ દ્વિજૈરન્યત્ર વર્ણ્યતે ॥ ૯૭॥

અન્યત્ર મુક્તિદાન્યેવ પ્રોક્તાનિ શાસ્ત્રસમ્મતૈઃ ।
વાસદાનિ તુ તીર્થાનિ તાનિ ક્ષેત્રાણિ સપ્તસુ ॥ ૯૮॥

મૃતઃ ષટ્સુ નરસ્તાસુ કાશ્યાં ધર્મયુતો ભવેત્ ।
મરણં તારકં પ્રાપ્ય જ્ઞાનયુક્તો ભવેત્ સ્વયમ્ ॥ ૯૯॥

પુનર્જન્મનિ યોગી સ ભવત્યત્ર ન સંશયઃ ।
સ્વેષ્ઠં બ્રહ્મ સમાપ્નોતિ નિશ્ચિતં વેદગુહ્યતઃ ॥ ૧૦૦॥

યોગં શ્રુત્વા નરો યસ્તુ પાપકર્મપરાયણઃ ।
મરણે સંસ્મરેદ્યોગં સ મયૂરે ભવિષ્યતિ ॥ ૧૦૧॥

યત્ર કુત્રસ્થ આગત્ય મયૂરે હ્યથવા સ્વયમ્ ।
મરિષ્યતિ ન સન્દેહો મહાપાપયુતોઽપિ ચેત્ ॥ ૧૦૨॥

અથવા ક્ષેત્રમાહાત્મ્યં શ્રુત્વા કુત્ર સ્થિતો ભવેત્ ।
યદિ મરણકાલે સ સંસ્મરેત્ સ તથા ભવેત્ ॥ ૧૦૩॥

મયૂરસ્યાથ વા યાત્રામેવ કૃત્વા નરોત્તમઃ ।
યત્ર કુત્ર મૃતઃ સોંઽતે સંસ્મરેત્ સ તથા ભવેત્ ॥ ૧૦૪॥

અથવા સઙ્ગયોગેન ગણેશે રુચિમાલભેત્ ।
નરો મયૂરક્ષેત્રે સ મરણં પ્રાપ્નુયાત્ પરમ્ ॥ ૧૦૫॥

શિવવિષ્ણ્વાદિલોકેષુ સંસ્થિતસ્તત્ર સઙ્ગતઃ ।
ગણેશે પ્રીતિયુક્તશ્ચેત્ સ મયૂરે ભવિષ્યતિ ॥ ૧૦૬॥

અતિસંસ્કારસંયુક્તઃ સ ક્ષેત્રે ધર્મસંયુતઃ ।
ક્ષેત્રસંન્યાસભાવેન મરણં તત્ર ચાલભેત્ ॥ ૧૦૭॥

યોગિનઃ શાન્તિરૂપાશ્ચ ચિત્તં ત્યક્ત્વા ગણેશ્વરે ।
લીનાસ્તે યત્ર કુત્રાપિ મૃતા ગાણેશતાં યયુઃ ॥ ૧૦૮॥

યોગિનાં મરણે વિપ્ર યાદૃશં સ્મરણં ભવેત્ ।
તાદૃશીં ન ગતિં સોઽપિ લભતે બ્રહ્મણિ રતઃ ॥ ૧૦૯॥

તથા મયૂરક્ષેત્રે યે મૃતાસ્તેષાં ન વિદ્યતે ।
અન્તે મતિર્યથા વિપ્ર ગતિઃ સર્વત્ર પઠ્યતે ॥ ૧૧૦॥

ઇદં સર્વં સમાખ્યાતં શ‍ૃણુ પ્રકૃતમુત્તમમ્ ।
કથાનકં મહીપસ્ય યથા મુદ્ગલભાષિતમ્ ॥ ૧૧૧॥

ભૃશુણ્ડ્યુવાચ ।
મયૂરક્ષેત્રે સુલભો વાસં કૃત્વા યયૌ પુનઃ ।
કાશ્યાં તસ્ય મૃતૌ ક્ષેત્રં મયૂરં સ્મૃતિગં બભૌ ॥ ૧૧૨॥

તેન ગણેશ્વરસ્યૈવ દદૌ મન્ત્રં મહેશ્વરઃ ।
સસ્ત્રીકઃ શિવરૂપઃ કૈલાસે વાસં ચકાર સઃ ॥ ૧૧૩॥

મહાલયે શિવે લીનઃ પુનઃ સૃષ્ટૌ મયૂરકે ।
બ્રાહ્મણઃ સ બભૂવાઽપિ સસ્ત્રીકો ભક્તિસંયુતઃ ॥ ૧૧૪॥

તત્ર સ્વલ્પેન કાલેન યોગયુક્તો બભૂવ હ ।
બ્રહ્મભૂતઃ સ જીવન્ વૈ મરણે તત્ર કા કથા ॥ ૧૧૫॥

એવં સંસ્કારયોગેન મયૂરે નિવસન્તિ તે ।
યત્ર કુત્ર સ્થિતાશ્ચેદ્વૈ ગમિષ્યન્તિ મયૂરકમ્ ॥ ૧૧૬॥

ક્ષેત્રસંન્યાસિનાં દેવા વદામિ માર્ગમુત્તમમ્ ।
આદૌ દ્વારયુતાં યાત્રાં કુર્યાત્ સંન્યાસકારણાત્ ॥ ૧૧૭॥

પશ્ચાત્ ક્ષેત્રં સમાશ્રિત્ય તિષ્ઠેન્નિયમસંયુતઃ ।
ન ગચ્છેત્ ક્ષેત્રબાહ્યં સંન્યાસભઙ્ગભયાકુલઃ ॥ ૧૧૮॥

નાનાદુઃખયુતશ્ચેત્ ત્યાગં મયૂરસ્ય વૈ ન સઃ ।
કુર્યાત્તેન ગણેશેન તુલ્યઃ સર્વત્ર સમ્મતઃ ॥ ૧૧૯॥

દેવાગારસ્ય યાત્રાં સ કુર્યાદ્ દ્વારસમન્વિતામ્ ।
અન્ત્યાં નૈવ સમાખ્યાતાં ક્ષેત્રબાહ્યપ્રવેશનાત્ ॥ ૧૨૦॥

ક્ષેત્રસીમાસ્થદેવાદ્યાસ્તેષાં કુર્યાન્નિરન્તરમ્ ।
યાત્રાં યાત્રાવિચારજ્ઞઃ સ યોગી યોગિનાં ગુરુઃ ॥ ૧૨૧॥

અત્રાઽહં કથયિષ્યામિ ચેતિહાસં પુરાતનમ્ ।
ક્ષેત્રસંન્યાસિના યુક્તં ક્ષેત્રં નૈવ ભવેત્ કદા ॥ ૧૨૨॥

જામદગ્ન્યો દ્વિજઃ કશ્ચિત્ સોમદત્ત ઇતિ શ્રુતઃ ।
બાલ્યાત્ પ્રારભ્ય વિઘ્નેશભક્તિયુક્તો બભૂવ હ ॥ ૧૨૩॥

સ્વાશ્રમાત્ સોઽપિ સસ્ત્રીકો મયૂરેશં સમાયયૌ ।
યાત્રાં કૃત્વા વિધાનેન સ્થિતો દ્વારાદિચિહ્નિતામ્ ॥ ૧૨૪॥

તતઃ ક્ષેત્રે સ વાસાર્થં મનો દધ્રે મહામતિઃ ।
ક્ષેત્રસંન્યાસકં કૃત્વા મયૂરે સંસ્થિતઃ પુરા ॥ ૧૨૫॥

તત્ર રક્ષોબલં પ્રાપ્તં ખરસ્ય દારુણં મહત્ ।
રાક્ષસં પપલુઃ સર્વે દૃષ્ટ્વા ક્ષેત્રનિવાસિનઃ ॥ ૧૨૬॥

દૃઢાઽઽગ્રહં સોઽપિ કૃત્વા સોમદત્તો મહામુનિઃ ।
મયૂરે સંસ્થિતો દેવા મયૂરેશપરાયણઃ ॥ ૧૨૭॥

રાક્ષસાસ્તં મહાભાગં ધૃત્વા ક્રોધસમન્વિતાઃ ।
તાડયામાસુરત્યન્તં કર્મખણ્ડનકારણાત્ ॥ ૧૨૮॥

મુમોચાઽસૌ તદાપિ ન સ્વધર્મં સોમદત્તકઃ ।
મદ્યમાંસાદિકં ગૃહ્ય છલિતો રાક્ષસૈર્બહુ ॥ ૧૨૯॥

તથાપિ ધૈર્યમાલમ્બ્ય સ્મૃત્વા વિઘ્નેશ્વરં દ્વિજઃ ।
મયૂરેશં સમભ્યર્ચ્ય સંસ્થિતો ભયસઙ્કુલઃ ॥ ૧૩૦॥

તતસ્તં રાક્ષસા બદ્ધ્વા ખરં નિન્યુર્મહોલ્બણમ્ ।
તેન કારાગૃહે ક્ષિપ્તો મયૂરેશપરાયણઃ ॥ ૧૩૧॥

ઉપોષણપરઃ પૂજાં માનસીં સ ચકાર હ ।
અતિશોકસમાયુક્તો હૃદિ ધ્યાત્વા ગજાનનમ્ ॥ ૧૩૨॥

તતો વિઘ્નેશ્વરઃ ક્ષુબ્ધો બભૂવે ભક્તકારણાત્ ।
ચકાર રાક્ષસેશં સ સવિઘ્નં વિઘ્નદાયકઃ ॥ ૧૩૩॥

સમાયાતા શૂર્પનખા તં જગાદ ખરં વચઃ ।
છિન્નનાસિકરૂપં સ્વવૃત્તાન્તં તુ ન્યવેદયત્ ॥ ૧૩૪॥

તચ્છ્રુત્વા ક્રોધસંયુક્તઃ ખરો રામં જગામ હ ।
રામેણ રાક્ષસૈઃ સાર્દ્ધં હતો મૃત્યુમવાપ હ ॥ ૧૩૫॥

તતઃ ક્ષેત્રનિવાસસ્થા આયયુસ્તે મહેશ્વરાઃ ।
(Page ખં. ૬ અ. ૨૩ પાન ૬૭)
બન્ધાદ્વિમુચ્ય તે સર્વે સોમદત્તં સુહર્ષિતાઃ ॥ ૧૩૬॥

એવં નાનાવિધૈર્દુઃખૈઃ પીડિતો મુનિસત્તમઃ ।
તથાપિ ક્ષેત્રસન્ત્યાગં ન ચકાર કદાચન ॥ ૧૩૭॥

તતો ગણેશ્વરો દેવો યયૌ ભક્ત્યા નિયન્ત્રિતઃ ।
સ્તુતઃ સમ્પૂજિતસ્તેન તમીપ્સિતવરં દદૌ ॥ ૧૩૮॥

સ યયાચે ગણેશાનં તવ સાન્નિધ્યગં કુરુ ।
તત્ર નિત્યં ભજિષ્યામિ ભક્તિમાર્ગપરાયણઃ ॥ ૧૩૯॥

તથેતિ તં ચકારાસૌ મયૂરેશો મહામુનિમ્ ।
સ બભૂવ મહેશાના યોગપ્રિય ઇતિ શ્રુતઃ ॥ ૧૪૦॥

એવં નાનાવિધાસ્તત્ર ક્ષેત્રસંન્યાસમાશ્રિતાઃ ।
સિદ્ધિં યયુર્મહાભાગા મયા વક્તું ન શક્યતે ॥ ૧૪૧॥

ઇતિ સર્વં સમાખ્યાતં સઙ્ક્ષેપેણ મયા પરમ્ ।
શ્રવણાત્ પઠનાત્ સર્વસૌખ્યદં ભક્તિવર્ધનમ્ ॥ ૧૪૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે ક્ષેત્રસંન્યાસાદિવર્ણનં નામ દ્વાવિંશતિતમોઽધ્યાયઃ ॥ ૬.૨૨

## ૬.૨૩ ગણેશકુણ્ડચરિતવર્ણનં નામ ત્રયોવિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દેવેશા ઊચુઃ ।
મયૂરે તીર્થમુખ્યં કિં વદ યોગીન્દ્રનાયક ।
તીર્થાનાં તીર્થરૂપં યત્ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૧॥

ભૃશુણ્ડ્યુવાચ ।
ક્ષેત્રં બ્રહ્મમયં પ્રોક્તં તીર્થતીર્થં મહેશ્વરાઃ ।
ગાણેશં સર્વવિખ્યાતં મુખ્યં પૂર્ણં બભૂવ હ ॥ ૨॥

યથા પઞ્ચવિધં સર્વં ભાસતે વિવિધાર્થતઃ ।
ચતુર્વિધં જગત્ સંસ્થં પઞ્ચમં બ્રહ્મ ઉચ્યતે ॥ ૩॥

ગઙ્ગા ચ યમુનાદેવી સરસ્વતી મહાનદી ।
ત્રિગુણરૂપસંયુક્તાસ્તાભ્યો નદ્યઃ સમુદ્ભવાઃ ॥ ૪॥

તુરીયા સર્વતીર્થાખ્યા બ્રહ્મકમણ્ડલૂદ્ભવા ।
તાસાં સંયોગભાવે તુ પઞ્ચમં બ્રહ્મ ઉચ્યતે ॥ ૫॥

તદેવ તીર્થરૂપેણ પ્રકટં સમ્બભૂવ હ ।
ગણેશમાયયા દેવા ગાણેશં તીર્થમુચ્યતે ॥ ૬॥

ભૂસ્વાનન્દમયં ક્ષેત્રં ગણેશેન પ્રકાશિતમ્ ।
માયયા તત્ર વિઘ્નેશોઽભવત્ સ્નાનાર્થમુદ્યતઃ ॥ ૭॥

તતોઽઙ્કુશેન પૃથ્વીં સ ભેદયામાસ માયયા ।
તીર્થં બ્રહ્મમયં તત્ર સેવાર્થં તુ સમાયયૌ ॥ ૮॥

તતઃ સ્નાનં ચકારાઽસૌ સર્વં કાર્યં ગજાનનઃ ।
અક્ષયં જલસંયુક્તં કુણ્ડં તત્ર બભૂવ હ ॥ ૯॥

નામ તસ્ય ચકારાઽસૌ ગણેશકુણ્ડમાદરાત્ ।
તસ્ય દર્શનમાત્રેણ ભુક્તિં મુક્તિં લભેન્નરઃ ॥ ૧૦॥

જલસ્પર્શાદિસમ્ભૂતં પુણ્યં વક્તું ન શક્યતે ।
સાક્ષાદ્બ્રહ્મમયસ્યાપિ કિં તીર્થસ્ય વદામ્યહમ્ ॥ ૧૧॥

સ્નાનેન મુક્તિદા પ્રોક્તા બ્રહ્મકમણ્ડલૂદ્ભવા ।
તુરીયા સર્વતીર્થાનાં જ્ઞાતવ્યં શાસ્ત્રસમ્મતમ્ ॥ ૧૨॥

ભાગીરથી તૃતીયા ચ સ્નાનેન સ્વર્ગદાયિની ।
સ્વર્ણદી સા સમાખ્યાતા વિશેષેણ મહેશ્વરાઃ ॥ ૧૩॥

તતઃ સરસ્વતી પ્રોક્તા દ્વિતીયપદધારિણી ।
ત્રિભિર્દિનૈશ્ચ સ્નાનેન સ્વર્ગદા સા પ્રકીર્તિતા ॥ ૧૪॥

યમુના ચ તતઃ ખ્યાતા સ્થૂલરૂપા મહાનદી ।
(Page ખં. ૬ અ. ૨૩ પાન ૬૮)
સપ્તભિર્દિવસૈઃ સાક્ષાજ્જન્તૂનાં સ્વર્ગદા મતા ॥ ૧૫॥

અન્યા નાનાવિધાસ્તાભ્યઃ કથનં નૈવ શક્યતે ।
અતઃ સઙ્ક્ષેપતઃ પ્રોક્તં માહાત્મ્યં પઞ્ચસમ્ભવમ્ ॥ ૧૬॥

અત્રેતિહાસકં વક્ષ્યે શ‍ૃણુધ્વં હ્યેકચેતસઃ ।
ગુર્જરે પાપકર્મા તુ રાજા ભદ્રોઽભવત્ પુરા ॥ ૧૭॥

સ્વધર્મં સ પરિત્યજ્ય માંસસ્ત્રીમદ્યલાલસઃ ।
યથેચ્છં વર્તયામાસ નાનાપાપપરાયણઃ ॥ ૧૮॥

એકદા મદ્યસંયુક્તઃ પુત્રીં દૃષ્ટ્વા સ દુર્મતિઃ ।
એકાન્તે બુભુજે તાં સ હાહાકારરવાકુલામ્ ॥ ૧૯॥

ઇત્યાદિવિવિધાન્યેવ ચકાર દેવસત્તમાઃ ।
પાપાનિ તેષુ કિં બ્રૂયાં વક્તું ત્રાસઃ પ્રવર્તતે ॥ ૨૦॥

મૃતં તં યમદૂતાશ્ચ ગૃહ્ય નિન્યુર્યમાલયમ્ ।
બદ્ધ્વા સન્તાડ્ય તત્રૈકં ચિત્રં પૂર્ણં બભૂવ હ ॥ ૨૧॥

ગચ્છતા તેન સન્દૃષ્ટં વિમાનં સૂર્યસન્નિભમ્ ।
ગણેશકુણ્ડતીર્થસ્ય દ્રષ્ટ્રા તચ્ચ સમાશ્રિતમ્ ॥ ૨૨॥

તસ્યાઙ્ગવાયુના સ્પૃષ્ટો ભદ્રઃ પાપપરઃ પરઃ ।
પાપહીનો બભૂવાઽપિ જગામ યમમન્દિરમ્ ॥ ૨૩॥

યમેન નરયોન્યાં સ સઙ્ક્ષિપ્તો વૈશ્યયોનિજઃ ।
બભૂવ દેવધર્માખ્યઃ સ્વધર્મનિરતઃ સદા ॥ ૨૪॥

સ્વર્ગાત્ પતનકાલે સ સસ્માર કુણ્ડમુત્તમમ્ ।
તેન સંસ્કારયોગેન મયૂરેશં સમાયયૌ ॥ ૨૫॥

દૃષ્ટ્વા ગણેશકુણ્ડં સ જાતિસ્મરો બભૂવ હ ।
તતઃ ક્ષેત્રં સમાશ્રિત્ય કુણ્ડપૂજાપરોઽભવત્ ॥ ૨૬॥

મમાર કુણ્ડસાન્નિધ્યે બ્રહ્મભૂતો બભૂવ હ ।
એવં સંસ્કારમાહાત્મ્યં પૂર્વજન્મનિ દેવપાઃ ॥ ૨૭॥

દેવેશા ઊચુઃ ।
ગણેશકુણ્ડદ્રષ્ટા સ કથં જાતો મહામતે ।
કિં જાતિર્યો વદ સ્વામિન્નાશ્ચર્યં ભાસતે પરમ્ ॥ ૨૮॥

ભૃશુણ્ડ્યુવાચ ।
ચાણ્ડાલઃ કોઽપિ પાપાત્મા નિત્યં પાપપરોઽભવત્ ।
કઞ્ચિદ્ દ્રવ્યયુતં દૃષ્ટ્વા તત્ પૃષ્ઠગો બભૂવ હ ॥ ૨૯॥

સ આગતો મયૂરેશં કથયામાસ માનવાન્ ।
જઘાન દ્રવ્યલોભી ચ ચાણ્ડાલો માનવાન્ સદા ॥ ૩૦॥

સમાયયૌ મે સાન્નિધ્યમધુનાઽત્ર વિશેષતઃ ।
મારણાય ન સન્દેહસ્તચ્છ્રુત્વા સ પપાલ હ ॥ ૩૧॥

લોકા યાત્રારતાઃ સર્વે નૈવ મત્તાઽને રતાઃ ।
પલતા તેન કુણ્ડં તુ દૃષ્ટં ગાણેશ્વરં મહત્ ॥ ૩૨॥

ક્ષેત્રં ત્યક્ત્વા ગતં દૂરે મમાર વિષયપ્રિયમ્ ।
ભોગબુદ્ધિયુતં દુષ્ટં નિન્યુરિન્દ્રપુરેઽમરાઃ ॥ ૩૩॥

ગણેશકુણ્ડજેનૈવ દર્શનેન ન સંશયઃ ।
પાપાનિ વિલયં યાન્તિ ભુક્તિર્મુક્તિસ્તતો ભવેત્ ॥ ૩૪॥

અન્યચ્છૃણુત દેવેશાશ્ચરિતં કુણ્ડસમ્ભવમ્ ।
વૈશ્યઃ કશ્ચિત્ સમાયાતો દ્રવ્યલોભી મયૂરકે ॥ ૩૫॥

પ્રવેશેનાસ્ય પાપાનિ તં ત્યક્ત્વા બહિરઞ્જસા ।
સ્થિતાનિ સોઽપિ શુદ્ધઃ સન્ બભ્રામ દ્રવ્યકારણાત્ ॥ ૩૬॥

તત્ર યાત્રાપરા લોકા અવદંસ્તે પરસ્પરમ્ ।
ગણેશકુણ્ડમાહાત્મ્યં સોઽપિ શુશ્રાવ મન્દધીઃ ॥ ૩૭॥

વિચારમકરોચ્ચિત્તે દર્શનેનાત્ર લભ્યતે ।
ભુક્તિર્મુક્તિઃ કિમેવેદં વચનં સત્યગં ભવેત્ ॥ ૩૮॥

અતોઽહં વિક્રયાર્થં તુ ભવામિ તત્ર સંસ્થિતઃ ।
તદા દર્શનમેવં મે કુણ્ડસ્યાત્ર ભવિષ્યતિ ॥ ૩૯॥

ઇતિ વિચાર્ય ખાદ્યાનિ ગૃહ્ય કુણ્ડગતોઽભવત્ ।
દધાર મનસા દૃષ્ટ્વા મુક્તિર્મે ભવતુ પ્રભો ॥ ૪૦॥

(Page ખં. ૬ અ. ૨૩ પાન ૬૯)
પુનશ્ચ સ મયૂરેશં ત્યક્ત્વા સ્વગૃહગોઽભવત્ ।
તત્ર સ્વલ્પેન કાલેન મમાર વૈશ્યજઃ ખલઃ ॥ ૪૧॥

તતો વિમાનમારુહ્ય શુક્લગત્યા મહેશ્વરાઃ ।
મોક્ષં જગામ વૈશ્યઃ સ ગણેશકુણ્ડદર્શનાત્ ॥ ૪૨॥

અન્યચ્ચ શ‍ૃણુત પ્રાજ્ઞા ઇતિહાસં પુરાતનમ્ ।
શૂદ્રૌ મેઘમણીસંજ્ઞૌ માલવે સમ્બભૂવતુઃ ॥ ૪૩॥

સેવાર્થં પુત્રસંયુક્તૌ ક્ષત્રિયસ્ય સમાશ્રિતૌ ।
સ કાશ્યાં પ્રેમસંયુક્તો યાત્રાર્થં પ્રજગામ હ ॥ ૪૪॥

તેન નીતૌ સ્વસેવાર્થં સપુત્રૌ શૂદ્રયોનિજૌ ।
મેઘો માર્ગે મમારૈવ તસ્ય પુત્રો દદાહ તમ્ ॥ ૪૫॥

તત્રાઽઽવન્ત્યો દ્વિજઃ કોઽપિ ચકારાસ્થિપ્રસઞ્ચયમ્ ।
મણિઃ પપ્રચ્છ તં વિપ્રં કુત્રાસ્થિ ત્વં પ્રણેષ્યસિ ॥ ૪૬॥

સ ઉવાચ ગણેશસ્ય ક્ષેત્રે કુણ્ડં મહાદ્ભુતમ્ ।
તત્રાસ્થિત્યાગમાત્રેણ પઞ્ચમં લભતે પદમ્ ॥ ૪૭॥

અતો મેઽસ્થિ પિતુસ્તત્ર શૂદ્ર નેષ્યામિ નિશ્ચિતમ્ ।
તચ્છ્રુત્વા સોઽપિ શૂદ્રસ્યાસ્થિસઞ્ચયં ચકાર હ ॥ ૪૮॥

કાશ્યાં દુઃખયુતો ત્યક્ત્વા મમાર મણિરેવ ચ ।
તસ્યાસ્થિસઞ્ચયં ચક્રે તસ્ય પુત્રો મહેશ્વરાઃ ॥ ૪૯॥

તજ્જ્ઞાત્વા ક્ષત્રિયસ્તં સ નિર્ભર્ત્સ્ય બહુધા જગૌ ।
કાશીં ત્યક્ત્વા મયૂરે કિમસ્થિત્યાગં કરિષ્યસિ ॥ ૫૦॥

ઉવાચ પિતુરાજ્ઞા સ મયા માન્યા નિરન્તરમ્ ।
એતસ્મિન્નન્તરે તત્ર બ્રાહ્મણઃ શાસ્ત્રવિત્ યયૌ ॥ ૫૧॥

તં પ્રણમ્ય વિશેષેણ પપ્રચ્છ ક્ષત્રિયોદ્ભવઃ ।

દુરાગ્રહં સ્વશૂદ્રસ્ય દૃષ્ટ્વા સર્વં વિધાનતઃ ॥ ૫૨॥

જ્ઞાત્વા વૃત્તાન્તમેતસ્ય તમુવાચ જનાર્દનઃ ।
બ્રાહ્મણો વેદસારજ્ઞઃ ક્ષત્રિયં શાસ્ત્રજં વચઃ ॥ ૫૩॥

જનાર્દન ઉવાચ ।
ચતુર્વિધાનિ તીર્થાનિ તથા ક્ષેત્રાણિ ક્ષત્રિય ।
પઞ્ચમં ગણરાજસ્ય ક્ષેત્રં તીર્થં ચ કીર્ત્યતે ॥ ૫૪॥

બ્રહ્મણસ્પતિનામાઽસૌ ગણેશો વેદવાદતઃ ।
તસ્ય લીલાદિકં સર્વં નાનાબ્રહ્મમયં બભૌ ॥ ૫૫॥

કાશ્યાં યે શાસ્ત્રવાદજ્ઞાસ્તેઽસ્થિ તત્ર નયન્તિ તુ ।
અન્યક્ષેત્રસ્ય ગાસ્તદ્વન્નયન્ત્યસ્થિ મયૂરકે ॥ ૫૬॥

તતઃ સંશયહીનઃ સ સમ્પૂજ્ય પ્રણનામ હ ।
જનાર્દનં સ્વગેહં સ આયયૌ હર્ષસંયુતઃ ॥ ૫૭॥

કૃત્વા ક્ષત્રિયજો યાત્રાં સ્વગૃહં પ્રત્યપદ્યત ।
શૂદ્રાવસ્થિ સમાગૃહ્ય મયૂરેશં પ્રજગ્મતુઃ ॥ ૫૮॥

ગણેશકુણ્ડં સમ્પૂજ્ય ત્યક્ત્વા તાવસ્થિસઞ્ચયમ્ ।
યથાશાસ્ત્રં વિધાનેન યાત્રાં ચક્રતુરાદરાત્ ॥ ૫૯॥

સ્વગૃહં જગ્મતુઃ શૂદ્રૌ દેવેશાઃ શ‍ૃણુતાઽપરમ્ ।
અસ્થિત્યાગપ્રભાવેણ મેઘં નેતું યયુર્ગણાઃ ॥ ૬૦॥

શઙ્કરલોકસંસ્થં તં ગૃહ્ય સ્વાનન્દમાયયુઃ ।
મણિં કૈલાસગં તે તુ બ્રહ્મભૂતૌ પ્રચક્રિરે ॥ ૬૧॥

એવં નાના જનાસ્તત્ર સિદ્ધિં પ્રાપ્તા વિશેષતઃ ।
તત્ર કિં કથયામીહ વક્તું કેન પ્રશક્યતે ॥ ૬૨॥

એતદ્ગણેશકુણ્ડસ્ય માહાત્મ્યં શ‍ૃણુયાન્નરઃ ।
શ્રાવયેત્ સ લભેદ્દેવા ઈપ્સિતં ફલમુત્તમમ્ ॥ ૬૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે ગણેશકુણ્ડચરિતવર્ણનં નામ ત્રયોવિંશોઽધ્યાયઃ ॥ ૬.૨૩
(Page ખં. ૬ અ. ૨૪ પાન ૭૦)

# ૬.૨૪ બ્રહ્મકમણ્ડલુપ્રાદુર્ભાવાદિવર્ણનં નામ ચતુર્વિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ભૃશુણ્ડ્યુવાચ ।
એકદા ગણનાથસ્ય દર્શનાર્થં સમાયયૌ ।
બ્રહ્મા સ્નાત્વા મહાકુણ્ડે સ્તોતું સ્તોત્રં સમારભત્ ॥ ૧॥

બ્રહ્મોવાચ ।
નમામિ તીર્થં ગણનાયકસ્ય ગણેશકુણ્ડં ગણનાતિગં ચ ।
અનન્તતીર્થપ્રભવં પુરાણં સંસેવિનાં બ્રહ્મપ્રદં નિજાત્મ્યમ્ ॥ ૨॥

અભેદભેદાદિવિહીનરૂપં ચતુષ્પદં પઞ્ચમમાદ્યભૂતમ્ ।
ગણેશમાયાકૃતદૃશ્યભાવં નમામિ કૈવલ્યઘનં પરેષામ્ ॥ ૩॥

ભવત્પ્રસૂતં ચ તુરીયમાત્મ્યં ભવેદરૂપં કિલ તીર્થકાનામ્ ।
અહં વિશુદ્ધોઽપિ ચ દર્શનેનાઽભવં કૃતબ્રહ્મકમણ્ડલુસ્થમ્ ॥ ૪॥

તદેવ ત્રૈગુણ્યમયં બભૂવ ભાગીરથીસ્થં રવિજામયં ચ ।
સરસ્વતીસ્થં ચ તતઃ પ્રસૂતાઃ સરિત્સમૂહા ભુવનેષુ સંસ્થાઃ ॥ ૫॥

સ્નાનેન પાપં વિનિહત્ય સર્વા નદ્યો નરાણામથ પાપયુક્તાઃ ।
નિત્યં જલે તે વિનિમજ્ય શુદ્ધા આયાન્તિ સ્વસ્થાનમઘાપહારિ ॥ ૬॥

પ્રયાગતીર્થે મરણેન જન્તુર્મનીષિતં તીર્થવરે લભેદ્વૈ ।
તવાવલોકેન ગણેશકુણ્ડ તદેવ સદ્યો લભતે સકૃચ્ચેત્ ॥ ૭॥

વાચઃ પરં તે જલબિન્દુજેઽહં સ્પર્શે ભવં કિં પ્રવદામિ પુણ્યમ્ ।
સાક્ષાદ્ગણેશાઙ્કુશઘાતજં તન્નમામિ કુણ્ડં ગણનાયકસ્ય ॥ ૮॥

ધન્યોઽહમેવં તવ દર્શનેન સ્પર્શેન તોયસ્ય નિમજ્જનેન ।
તોયે તથા તે ચ મહાનુભાવં બ્રહ્મૈવ તુષ્ટં ચ નમો નમસ્તે ॥ ૯॥

ત્વદીયતીરે મરણં વરિષ્ઠં સુમઙ્ગલં બ્રહ્મમયપ્રદં તત્ ।
વિના શ્રમેણૈવ નરા લભન્તે શુકાદિકાનાં પદમત્ર ચિત્રમ્ ॥ ૧૦॥

ત્વત્તોયજસ્પૃષ્ટિરહો મમાસ્તુ સ્નાનં તુ પાનં ચ સદાવલોકઃ ।
કિં વર્ણયામ્યેવ ગણેશકુણ્ડ સ્વલ્પજ્ઞભાવાત્તુ નમો નમસ્તે ॥ ૧૧॥

ભૃશુણ્ડ્યુવાચ ।
સ્તોત્રં ગણેશકુણ્ડસ્ય યઃ પઠિષ્યતિ માનવઃ ।

ભુક્તિં મુક્તિં લભેત્ સોઽપિ શ્રદ્ધયા બ્રહ્મભૂયકમ્ ॥ ૧૨॥

ઇદં બ્રહ્મકૃતં સ્તોત્રં સર્વસિદ્ધિપ્રદાયકમ્ ।
યત્ર કુત્ર સ્થિતાયાપિ ભક્ત્યા ભવતિ પાઠતઃ ॥ ૧૩॥

બ્રહ્મા તતો ગણેશાનં જગામ હર્ષસંયુતઃ ।
પૂજ્ય સ્તુત્વા મહેશાનાઃ પ્રદક્ષિણપરોઽભવત્ ॥ ૧૪॥

પાદસ્પર્શેન તસ્યાપિ કમણ્ડલુજલૈર્યુતઃ ।
ન્યુબ્જતામગમત્તત્ર નદી તસ્માદજાયત ॥ ૧૫॥

તતઃ પ્રણમ્ય વિઘ્નેશં યોગમાયાસમન્વિતઃ ।
સરિતં તાં ચકર્ષાઽસૌ પુનર્બ્રહ્મા કમણ્ડલૌ ॥ ૧૬॥

જગાદ ગણરાજશ્ચ તતસ્તં હર્ષસંયુતઃ ।
મા ગૃહ્ણીષ્વ વિધાતસ્ત્વં સર્વતીર્થમયીં નદીમ્ ॥ ૧૭॥

મમ સેવાર્થમત્યન્તલાલસા નિત્યમાભજેત્ ।
મદિચ્છયા નદી જાતા મત્ક્ષેત્રે સર્વપાવની ॥ ૧૮॥

તતસ્તં પ્રણતો ભૂત્વા બ્રહ્મા શોકસમન્વિતઃ ।
જગાદ તીર્થહીનોઽહં ભવિષ્યમિ ગજાનન ॥ ૧૯॥

શ્રીગજાનન ઉવાચ ।
યોગમાયાબલેનેમાં મા કર્ષ ત્વં પિતામહ ।
કમણ્ડલું તીર્થજલૈરાપૂર્ય સ્થાનગો ભવ ॥ ૨૦॥

શ્રુત્વા બ્રહ્મા તથા કૃત્વા યયૌ હર્ષસમન્વિતઃ ।
બ્રહ્મકમણ્ડલુઃ સાક્ષાન્નદી તત્ર પ્રતિષ્ઠિતા ॥ ૨૧॥

તયા ક્ષેત્રં મહેશાનાઃ શુશુભેઽતીવ વિઘ્નપમ્ ।
નદ્યાશ્ચ મહિમાનં કો વર્ણયિતું ક્ષમો ભવેત્ ॥ ૨૨॥

દેવેશા ઊચુઃ ।
તુરીયં તીર્થમુખ્યં યત્ સ્થિતં બ્રહ્મકમણ્ડલૌ ।
કથં બભૂવ વિપ્રેશ તદ્વદસ્વ સુખપ્રદમ્ ॥ ૨૩॥

(Page ખં. ૬ અ. ૨૪ પાન ૭૧)
ભૃશુણ્ડ્યુવાચ ।
બ્રહ્મા કામં ચ તં સૃષ્ટ્વા સ્થાપયામાસ સર્વપઃ ।

દૃષ્ટ્વા કામં સ્વયં તત્ર વિહ્વલોઽભૂત્ પિતામહઃ ॥ ૨૪॥

દૃષ્ટ્વા સરસ્વતીં વેધાઃ કામબાણપ્રપીડિતઃ ।
તાં ગૃહ્ય સ્વવશાં કૃત્વા મૈથુનાયોદ્યતોઽભવત્ ॥ ૨૫॥

હાહાકારરવા દેવી સસ્માર ગણનાયકમ્ ।
તતઃ શાન્તમના બ્રહ્મા જ્ઞાનયુક્તો બભૂવ હ ॥ ૨૬॥

મુક્ત્વા તાં ગર્હયામાસ સ્વાત્માનં કામમોહિતમ્ ।
તતઃ ક્રોધસમાયુક્તઃ શશાપ મદનં વિધિઃ ॥ ૨૭॥

માં પ્રમોહયુતં કૃત્વા ક્રીડસિ ત્વં ખલાઽધુના ।
કામ શઙ્કરતો વહ્નૌ નષ્ટરૂપો ભવિષ્યસિ ॥ ૨૮॥

શપ્ત્વા કામં વિધાતાઽસૌ તતઃ સસ્માર દેવપાન્ ।
મુનીન્ શ્રેષ્ઠાંશ્ચ તે સર્વે સમાજગ્મુઃ પિતામહમ્ ॥ ૨૯॥

શ્રુત્વા વૃત્તાન્તમુગ્રં તે શોકયુક્તાઃ બભૂવિરે ।
પ્રાયશ્ચિત્તાર્થમુદ્યુક્તાઃ સર્વે દેવર્ષયસ્તતઃ ॥ ૩૦॥

તતસ્તીર્થાનિ સર્વે તે નિર્મમુર્દેવતર્ષયઃ ।
સાર્ધત્રિકોટિસંજ્ઞાનિ સ્વસ્વતેજોયુતાનિ વૈ ॥ ૩૧॥

તેષુ સમ્મજ્જિતો બ્રહ્મા પવિત્રો ન બભૂવ હ ।
તીર્થરાજં તથા સર્વે સસ્મરુર્બ્રહ્મહેતવે ॥ ૩૨॥

સ વૈ પ્રત્યક્ષતાં તત્ર યયૌ સર્વેચ્છયા પરઃ ।
બ્રહ્મા મમજ્જ તત્રાપિ સ્વયં શુદ્ધોઽભવન્ન ચ ॥ ૩૩॥

તતઃ સૂર્યઃ સ્વદેહાદ્વૈ યમુનાં નિર્મમે પરામ્ ।
તસ્યાં નિમજ્ય ધાતાઽસૌ પવિત્રો ન બભૂવ હ ॥ ૩૪॥

આદિમાયા તતસ્તત્ર વિનિર્મમે સરસ્વતીમ્ ।
નિમજ્ય તત્ર વેધાઃ સોઽભવન્નૈવ યથા પુરા ॥ ૩૫॥

તતઃ શિવઃ સ્વયં રેવાં નિર્મમે તીર્થરૂપિણીમ્ ।
તથા નિમજ્ય તસ્યાં સ પવિત્રો ન બભૂવ હ ॥ ૩૬॥

તતો વિષ્ણુઃ સ્વદેહાદ્વૈ નિર્મમે પાવનાય ચ ।
ગઙ્ગાં તસ્યાં નિમજ્યાઽસૌ વેધાઃ શુદ્ધોઽભવન્ન ચ ॥ ૩૭॥

તતઃ ખેદસમાયુક્તો દેવેશા મુનિભિઃ સહ ।
વિચાર્ય ત્રિગુણાનાં તુ બીજં તીર્થં પ્રતુષ્ટુવુઃ ॥ ૩૮॥

તતઃ પ્રસન્નભાવેન તુરીયં તત્ર દેવપાઃ ।
પ્રકટં તેજસા યુક્તં બભૂવ જલમઞ્જસા ॥ ૩૯॥

પ્રકાશમયતીર્થં તદ્ દૃષ્ટ્વા દેવર્ષયોઽમરાઃ ।
પ્રણમ્યાપૂજ્ય સંહર્ષાદૂચુઃ પ્રાઞ્જલયોઽભવન્ ॥ ૪૦॥

સર્વતીર્થમિદં નામ ભવતુ ત્રિજગત્સુ તે ।
પવિત્રં કુરુ ધાતારં નમસ્તે તીર્થતીર્થમુ ॥ ૪૧॥

ત્રૈગુણ્યમયરૂપાણિ તીર્થાનિ ત્રિજગત્સુ તુ ।
ત્રિજગત્પાવનાન્યેવ ભવન્તે શાસ્ત્રસમ્મતે ॥ ૪૨॥

બ્રહ્મવિષ્ણુમહેશાનાં દોષં ક્ષાલયિતું દ્રુતમ્ ।
ન સમર્થાનિ તેભ્યસ્તુ દ્વિજૈર્જાતાનિ નિશ્ચિતમ્ ॥ ૪૩॥

અતસ્તુરીયતીર્થં ચાસ્માભિઃ સમ્પ્રાર્થિતં પરમ્ ।
ત્રિગુણાનાં હિતાર્થાય પાવનાય વિશેષતઃ ॥ ૪૪॥

અતો હિતં ચ સર્વેષાં કુરુ તીર્થાત્મરૂપકમ્ ।
એવમુક્ત્વા પ્રણેમુસ્તે સર્વતીર્થં મહેશ્વરાઃ ॥ ૪૫॥

તતઃ પ્રસન્નતાં યાતં દર્શયામાસ રૂપકમ્ ।
વિધાત્રે તેન નિઃપાપો બભૂવ પ્રપિતામહઃ ॥ ૪૬॥

તતસ્તીર્થં પ્રણમ્યાઽસૌ તુષ્ટાવ સર્વસંયુતઃ ।
તતસ્તં પ્રત્યુવાચેદં વચનં તીર્થમુત્તમમ્ ॥ ૪૭॥

સર્વતીર્થમુવાચ ।
વરં વૃણુ મહાભાગ તુષ્ટં દાસ્યામિ વાઞ્છિતમ્ ।
સ્તોત્રેણ સૃષ્ટિકર્તસ્વં વિધાતર્મા વિચારય ॥ ૪૮॥

બ્રહ્મોવાચ ।
વરં દદાસિ તીર્થ ત્વં તદા મે સંસ્થિતં ભવ ।
(Page ખં. ૬ અ. ૨૪ પાન ૭૨)
કમણ્ડલૌ સદા તેન કૃતકૃત્યોઽસ્મિ નિશ્ચિતમ્ ॥ ૪૯॥

ભૃશુણ્ડ્યુવાચ ।

તથેતિ તમથોક્ત્વા તત્તીર્થં તસ્ય કમણ્ડલૌ ।
જાનીત વરદાનેન સંસ્થિતં દેવનાયકાઃ ॥ ૫૦॥

તત્ર સ્થિતં ગણેશસ્ય ધ્યાનં ચક્રે નિરન્તરમ્ ।
સર્વતીર્થં હિતાર્થાય તસ્ય સેવાર્થમાદરાત્ ॥ ૫૧॥

ઉવાચ વિઘ્નરાજં સઞ્ચિન્ત્ય તીર્થં પરં હૃદિ ।
દૃશ્યભાવં સમાસાદ્ય ન તે પાદાર્ચનં કૃતમ્ ॥ ૫૨॥

વરદાનપ્રભાવેણ બ્રહ્મણઃ સદને પ્રભો ।
સ્થિતં માં તેઽદ્ય પાદાબ્જસમીપસ્થં કુરુ પ્રભો ॥ ૫૩॥

પવિત્રં તુ વિધાતારં કૃત્વા માયૂરક્ષેત્રગમ્ ।
ભવિષ્યામિ તદર્થાયાકરવં દૃશ્યભાવકમ્ ॥ ૫૪॥

પરાધીનતયા સ્વામિન્ કિં કરોમિ ગણેશ્વર ।
વિઘ્નહીનં કુરુષ્વ ત્વં માં ભક્તં ભક્તવત્સલ ॥ ૫૫॥

દૃશ્યભાવં સમાસાદ્ય મયૂરં નાવલોકિતમ્ ।
નિરર્થકં જનુસ્તસ્યાતસ્ત્વાં સમ્પ્રાર્થયે પ્રભો ॥ ૫૬॥

એવં નિત્યં ગણેશાનં ધ્યાત્વા સમ્પ્રાર્થયત્ પરમ્ ।
સ્થાપિતં સર્વતીર્થં તદ્ગણેશાનેન સન્નિધૌ ॥ ૫૭॥

દેવેશા ઊચુઃ ।
તીર્થરાજઃ પ્રયાગો યસ્તત્ર બ્રહ્મા બભૂવ ન ।
પવિત્રશ્ચ તતઃ શ્રેષ્ઠં કથં તીર્થં ભવેન્ મુને ॥ ૫૮॥

કથં રાજેતિ સંજ્ઞા ચ તસ્ય શાસ્ત્રે પ્રકીર્તિતા ।
એતત્ સંશયકં છિન્ધિ યોગીન્દ્રોઽસિ પુરાતનઃ ॥ ૫૯॥

ભૃશુણ્ડ્યુવાચ ।
યથા દેવસમૂહાનાં રાજેન્દ્રઃ પરિકીર્તિતઃ ।
ઇન્દ્રાન્નૈવાપરઃ શ્રેષ્ઠો દેવો ભવતિ કુત્રચિત્ ॥ ૬૦॥

બ્રહ્માદયો ન દેવાશ્ચ ગુણાધારાઃ પ્રકીર્તિતાઃ ।
પૂજ્યત્વાદ્દેવસંજ્ઞાસ્થા ભવન્તે ચૈકદેશતઃ ॥ ૬૧॥

સાર્ધત્રિકોટિતીર્થાનાં તથા રાજા પ્રયાગકઃ ।
પ્રયાગાન્ન પરં તીર્થં શ્રેષ્ઠં કુત્રાઽપિ વર્તતે ॥ ૬૨॥

ગઙ્ગાદ્યાઃ સરિતસ્તદ્વદ્ ગુણાધારાઃ પ્રકીર્તિતાઃ ।
તીર્થસંજ્ઞા તથા તાસામેકલક્ષણતો મતા ॥ ૬૩॥

પ્રાર્થિતે તીર્થરાજેન તત્રૈકભવકારણાત્ ।
ગઙ્ગાયમુનયોર્યોગસ્તેન સમ્મિલિતોઽભવત્ ॥ ૬૪॥

ગઙ્ગાયમુનયોર્યોગે સ્નાનજં યત્ ફલં લભેત્ ।
તદેવ મહિમા તત્ર તયોરેવ ન સંશયઃ ॥ ૬૫॥

નર્મદા વરદાનેન શ્રેષ્ઠા જાતા વિશેષતઃ ।
ગુણરૂપા ન સા પ્રોક્તા જાનીત શાસ્ત્રસમ્મતે ॥ ૬૬॥

અધુના શ‍ૃણુત પ્રાજ્ઞા પ્રકૃતં યત્ કથાનકમ્ ।
કમણ્ડલુસ્થિતત્વાત્તન્નામ્ના બ્રહ્મકમણ્ડલુઃ ॥ ૬૭॥

ગાં ગતા તેન ગઙ્ગા સા કમણ્ડલૂદ્ભવા મતા ।
પૂર્વગા સા સમાખ્યાતા બ્રહ્માદીનાં સુદુર્લભા ॥ ૬૮॥

તસ્યા મૂલસ્થિતઃ સાક્ષાદ્બ્રહ્મા લોકપિતામહઃ ।
તસ્યાં સ્નાત્વા ગણેશાનં ભજતેઽનન્યચેતસા ॥ ૬૯॥

પૂર્વં પિતામહં તત્ર નરઃ સ્નાત્વા સમર્ચયેત્ ।
વિદ્યાયુક્તો ભવેત્ સદ્યોંઽતે પરાં મુક્તિમાપ્નુયાત્ ॥ ૭૦॥

મધ્યે શિવસ્તથા તસ્યા મયૂરે સંસ્થિતસ્તતઃ ।
મધ્યમેશ્વરનામા સ ભજતે ગણનાયકમ્ ॥ ૭૧॥

મધ્યમેશ્વરતીર્થે યસ્તસ્યાં સ્નાનં સમાચરેત્ ।
સ સામર્થ્યં પરં પ્રાપ્યાપૂજ્યેશં મુક્તિમાપ્નુયાત્ ॥ ૭૨॥

અન્તે વિષ્ણુઃ સ્થિતસ્તસ્યા હૃષીકેશ ઇતિ શ્રુતઃ ।
સ્નાત્વા નિત્યં ગણેશાનં ભજતેઽનન્યમાનસઃ ॥ ૭૩॥

(Page  ખં. ૬ અ. ૨૫ પાન ૭૩)
તત્ર તીર્થે નરઃ સ્નાત્વા હૃષીકેશં સમર્ચયેત્ ।
યશઃ સ વિપુલં પ્રાપ્યાંઽતે પરં મોક્ષમાપ્નુયાત્ ॥ ૭૪॥

યસ્યાસ્તીરે ચ તીર્થાનિ દેવાસ્તિષ્ઠન્ત્યનેકશઃ ।
ઉભયત્ર મહેશાના મયા વક્તું ન શક્યતે ॥ ૭૫॥

કમણ્ડલૂદ્ભવાયાસ્તુ દર્શનેનાઘનાશનમ્ ।

પ્રભવેત્ સર્વજન્તૂનાં નિશ્ચિતં ચેહજન્મજમ્ ॥ ૭૬॥

સઞ્ચિતં જલબિન્દોશ્ચ સ્પર્શેનૈવ વિનશ્યતિ ।
પાપં હ્યનેકજન્મસ્થં નરાણાં સર્વદેહિનામ્ ॥ ૭૭॥

જલપાનેન તસ્યાસ્તુ શક્રલોકં લભેત્ સ્વયમ્ ।
સ્નાનેન મુક્તિમાપ્નોતિ યત્ર તત્ર મહેશ્વરાઃ ॥ ૭૮॥

મયૂરે યે નરાસ્તસ્યાં સ્નાનં કુર્વન્તિ દેવપાઃ ।
સકૃચ્ચેદીપ્સિતં સદ્યો લભન્તે તે સમોક્ષકમ્ ॥ ૭૯॥

એતાદૃશી મહાભાગા નદી તત્ર વ્યવસ્થિતા ।
દશયોજનવિસ્તારસ્તસ્યાઃ પ્રોક્તો મનીષિભિઃ ॥ ૮૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે બ્રહ્મકમણ્ડલુપ્રાદુર્ભાવાદિવર્ણનં નામ ચતુર્વિંશતિતમોઽધ્યાયઃ ॥ ૬.૨૪

## ૬.૨૫ બ્રહ્મકમણ્ડલુતીર્થચરિતં નામ પઞ્ચવિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દેવેશા ઊચુઃ ।
કથં દેવૈશ્ચ મુનિભિઃ સ્તુતા વિપ્ર મહાનદી ।
બ્રહ્મણોઽર્થં તદેવાપિ સ્તોત્રં વદ સુખપ્રદમ્ ॥ ૧॥

ભૃશુણ્ડ્યુવાચ ।
નાનાતીર્થબલેનૈવ બ્રહ્માણં તે સુરર્ષયઃ ।
શુદ્ધં કર્તું સમર્થા ન બભૂવુશ્ચ યદા પુરા ॥ ૨॥

તતઃ સર્વે વિચાર્યૈવ તુરીયં તીર્થમુત્તમમ્ ।
સ્તોતું કરપુટા ભૂત્વા સમારેભુઃ સુસ્તોત્રકમ્ ॥ ૩॥

દેવર્ષય ઊચુઃ ।
સર્વાદિભૂતં ત્રિગુણેષુ સંસ્થં તીર્થેષુ યત્ સર્વવિકારહીનમ્ ।
તીર્થં તુરીયં ચ નમામહે તત્તીર્થાત્મકં પાપવિનાશદક્ષમ્ ॥ ૪॥

ગઙ્ગાદિનદ્યઃ પ્રભવા યતશ્ચ સર્વાન્તરસ્થં સ્થિતમાત્મરૂપમ્ ।
નાદાત્મકં રૂપમથો વિધાય તચ્ચાલકં યત્તુ નમામહે તત્ ॥ ૫॥

પુરાણગીતં વિધિપાપનાશં કમણ્ડલુસ્થં પરમપ્રમેયમ્ ।

અપારતીર્થેષુ તદાત્મભાવં ભવિષ્યતે દેહધરં નમામઃ ॥ ૬॥

નાથો વિધાતા ચ ભવેન્મહાત્મન્ પાપેન યુક્તશ્ચ તથા સ્થિતશ્ચેત્ ।
વિશ્વં પરં નાશમુપૈષ્યતિ ત્વં પ્રત્યક્ષતામેહિ દયાકરાતઃ ॥ ૭॥

ગઙ્ગાસ્વરૂપાય નમો નમસ્તે બ્રહ્માત્મજારૂપધરાય તુભ્યમ્ ।
તુભ્યં પ્રયાગાય ચ નાર્મદાય કાલિન્દિકાસ્થાય નમો નમો વૈ ॥ ૮॥

કૃષ્ણાસ્વરૂપાય કકુદ્મતીસ્થ યદ્વેવનદ્યૈ ચ પયોષ્ણિકાયૈ ।
વેણીસ્વરૂપાય ચ પુષ્કરાય તાપીપ્રભાસાય ચ સર્વતીર્થ ॥ ૯॥

ગોદાવરીરૂપધરાય તુભ્યં ક્ષિપ્રાસ્થસિન્ધુસ્થ મહીસ્વરૂપ ।
કાવેરિકાસ્થં સરયૂસ્વરૂપં પૂર્ણે નમસ્તેઽસ્તુ કમણ્ડલુસ્થમ્ ॥ ૧૦॥

સાર્ધત્રિકોટીપ્રવરસ્થકાય તીર્થેશ્વરાયૈવ નમો નમસ્તે ।
(Page ખં. ૬ અ. ૨૫ પાન ૭૪)
અનન્તતીર્થપ્રવરાય નિત્યં ક્ષેત્રે મયૂરે તુ સમાસ્થિતાય ॥ ૧૧॥

વારામ્પતિસ્થાય સરોવરાય વાપીસ્થકૂપાય નમો નમસ્તે ।
યદ્યજ્જલં ભાનુધનસ્થરૂપં તત્રસ્થકાયૈવ નમો નમસ્તે ॥ ૧૨॥

ત્વયા તતં સર્વમિદં વિભાતિ ચરાચરસ્થં ચ જલં પરેશ ।
કૃપાકટાક્ષામૃતધારયાઽસ્માન્ રક્ષસ્વ સન્દર્શય તે સ્વરૂપમ્ ॥ ૧૩॥

ભૃશુણ્ડ્યુવાચ ।
એવં સંસ્તુવતાં તેષાં પુરસ્તેજોમયં જલમ્ ।
પ્રાદુર્બભૂવ તત્ દૃષ્ટ્વા પ્રણેમુઃ સસુરર્ષયઃ ॥ ૧૪॥

તાનુવાચ મહાતીર્થં હર્ષયુક્તેન ચેતસા ।
વરં વૃણુત દેવેશા મુનયસ્તં દદામ્યહમ્ ॥ ૧૫॥

ભવત્કૃતમિદં પુણ્યં સ્તોત્રં મે પ્રીતિવર્ધનમ્ ।
ભવિષ્યતિ ન સન્દેહો ભુક્તિમુક્તિપ્રદાયકમ્ ॥ ૧૬॥

પઠતે શ◌ૃણ્વતે નિત્યં મયિ સ્નાનફલપ્રદમ્ ।
સર્વાઘનાશનં સદ્યો ભવિષ્યતિ વિશેષતઃ ॥ ૧૭॥

સર્વતીર્થવચઃ શ્રુત્વા હર્ષયુક્તાઃ સુરર્ષયઃ ।
જગુઃ પ્રણમ્ય દેવેશાઃ પ્રબદ્ધકરસમ્પુટાઃ ॥ ૧૮॥

દેવર્ષય ઊચુઃ ।

પ્રસન્નં ચેન્ મહાતીર્થં તદા પિતામહં પરમ્ ।
શુદ્ધં કુરુ તથા તસ્ય કમણ્ડલૌ સ્થિતિં સ્થિરામ્ ॥ ૧૯॥

સર્વતીર્થં ચ તે નામ તથા બ્રહ્મકમણ્ડલુઃ ।
ભવતુ ત્વત્પ્રસાદેન વર એવ વૃતઃ પરઃ ॥ ૨૦॥

તથેતિ તાનુવાચૈવ યાચિતં તીર્થમુત્તમમ્ ।
ચકાર દેવવિપ્રૈર્યત્તત્ સર્વં કથિતં મયા ॥ ૨૧॥

દેવેશા ઊચુઃ ।
શ્રુતં સર્વં વિશેષેણ સર્વસંશયનાશનમ્ ।
તથાપિ ન ચ તૃપ્યામઃ પરં પીત્વા કથામૃતમ્ ॥ ૨૨॥

માહાત્મ્યં કથિતં વિપ્ર તત્ર સિદ્ધિં મહાદ્ભુતામ્ ।
અલભન્ કે પુરા યોગિન્ વદ તેષાં ચરિત્રકમ્ ॥ ૨૩॥

ભૃશુણ્ડ્યુવાચ ।
પુરા કલ્પે દ્વિજઃ કશ્ચિદ્ભરદ્વાજકુલોદ્ભવઃ ।
મૂર્ખો બભૂવ દેવેશા વિદ્યાસન્ધ્યાદિવર્જિતઃ ॥ ૨૪॥

તં ગૃહ્ય પિતરૌ તસ્ય સ્થિતં બ્રહ્મકમણ્ડલૌ ।
બ્રહ્માણં યયુતઃ પ્રીત્યા નદીમૂલવિરાજિતમ્ ॥ ૨૫॥

સ્નાત્વા નદીજલે તત્ર પૂજયામાસુરાદરાત્ ।
વિધિં કમણ્ડલુસ્થાને બભૂવુર્ભક્તિસંયુતાઃ ॥ ૨૬॥

પુત્રસ્તયોઃ સુબુદ્ધ્યા વૈ યુક્તો બભૂવ તત્ક્ષણાત્ ।
વેદાદીન્ કણ્ઠગાન્ દેવા અવદત્ પ્રેમસંયુતઃ ॥ ૨૭॥

તતો હર્ષયુતૌ તસ્ય પિતરૌ ગૃહ્ય તં સુતમ્ ।
સ્વસ્થાનં જગ્મતુઃ પ્રીત્યા મુક્તિમન્તે પ્રલેભિરે ॥ ૨૮॥

એવં નાના જનાસ્તત્ર જ્ઞાનતોઽજ્ઞાનતોઽપિ વા ।
સ્નાનેન દર્શનેનૈવ બ્રહ્મણઃ સિદ્ધિમાપ્નુવન્ ॥ ૨૯॥

અથાન્યત્ કથયિષ્યામિ ક્ષત્રિયો રવિવંશજઃ ।
સુરથો માલવે રાજા બભૂવ પરવીરહા ॥ ૩૦॥

સ્વરાજ્યં ધર્મસંયુક્તશ્ચકાર સચિવૈર્યુતઃ ।
બહુકાલે ગતે તત્ર વિદર્ભાધિપતિર્યયૌ ॥ ૩૧॥

દિગ્જયાર્થં તતસ્તેન યુયુધે બલસંયુતઃ ।
પરાજિતો વિદર્ભસ્ય રાજ્ઞા રાજા પપાલ હ ॥ ૩૨॥

તતો યત્નં સમાસ્થાય હ્યન્યરાજસમન્વિતઃ ।
સઙ્ગ્રામમકરોદ્ઘોરં પુનઃ પરાજિતોઽભવત્ ॥ ૩૩॥

ભૂપાલો બ્રાહ્મણાન્ પૃષ્ટ્વા મયૂરે ચાગતોઽભવત્ ।
મધ્યમેશ્વરતીર્થે સ સ્નાત્વા શિવં પુપૂજ હ ॥ ૩૪॥

તં નમસ્કૃત્ય સેનાભિઃ સંયુતો યુયુધે પુનઃ ।
ભૂપઃ સઞ્જિત્ય વૈદર્ભં સ્વરાજ્યં પ્રાપ તત્ક્ષણાત્ ॥ ૩૫॥

અન્તે મુક્તિં જગામૈવ સ્નાનમાહાત્મ્યકારણાત્ ।
(Page ખં. ૬ અ. ૨૫ પાન ૭૫)
એવં તત્ર યયુઃ સિદ્ધિં જ્ઞાનતોઽજ્ઞાનતો જનાઃ ॥ ૩૬॥

અન્યચ્ચ શ‍ૃણુત પ્રાજ્ઞાશ્ચરિતં પુણ્યદં પરમ્ ।
દ્વિજો ગૌતમવંશેઽભૂત્ સ્વધર્માચારસંયુતઃ ॥ ૩૭॥

વિદ્યાજ્ઞાનાદિસંયુક્તો ન યશોઽપ્યલભત્ કદા ।
દીક્ષાદિષુ પ્રયત્નેનાભવત્ કર્મસુ તત્પરઃ ॥ ૩૮॥

બ્રાહ્મણાસ્તત્કૃતં કર્મ દૃષ્ટ્વા સવિધિ વૈદિકમ્ ।
દોષયુક્તં વિશેષેણ દદૃશુઃ પાપગૌરવાત્ ॥ ૩૯॥

તતોઽતિખેદસંયુક્તો જગામ સર્વતીર્થિકામ્ ।
અન્તે વિચાર્ય તસ્યાં સ સ્નાનં ચકાર ભક્તિતઃ ॥ ૪૦॥

હૃષીકેશં પ્રપૂજ્યૈવ નમસ્કૃત્ય ગૃહં યયૌ ।
તતઃ કર્મ કૃતં તેન દદૃશુઃ સવિધિ દ્વિજાઃ ॥ ૪૧॥

યદ્યત્તેન કૃતં દેવા યશોયુક્તં બભૂવ હ ।
અન્તે મુક્તિં યયૌ સોઽપિ તીર્થસેવનપુણ્યતઃ ॥ ૪૨॥

જ્ઞાનતોઽજ્ઞાનતસ્તત્ર યયુઃ સિદ્ધિં વિશેષતઃ ।
મયા વક્તું ન શક્યેત કેનાપિ દેવસત્તમાઃ ॥ ૪૩॥

અર્થાન્યચ્ચરિતં દેવાઃ શ‍ૃણુધ્વં ભાવસંયુતાઃ ।
દણ્ડકારણ્યદેશૈકશ્ચાણ્ડાલઃ પાપકારકઃ ॥ ૪૪॥

વને ગત્વા દ્વિજાદીંશ્ચ મારયામાસ નિત્યદા ।

પરસ્ત્રિયં સ એકાન્તેઽયભત્ દૃષ્ટ્વા હઠેન ચ ॥ ૪૫॥

એવં નાનાવિધં પાપં ચકાર વિષયપ્રિયઃ ।
એકદા ધનસંયુક્તં વણિજં સ દદર્શ હ ॥ ૪૬॥

તમનુ પ્રયયૌ દુષ્ટઃ શસ્ત્રપાણિર્જિઘાંસયા ।
તત્ર માર્ગે મહેશાના બ્રહ્મકમણ્ડલૂદ્ભવામ્ ॥ ૪૭॥

મહાનદીં સ ચાણ્ડાલો દદર્શ સન્નિધૌ ગતઃ ।
જલસ્પર્શાદિકં તત્ર ન ચકાર સુદુર્મતિઃ ॥ ૪૮॥

તતો યોજનમાત્રેણ જઘાન વણિજં ખલઃ ।
દ્રવ્યં તસ્ય પ્રગૃહ્યૈવ સ્વગૃહં પુનરાગમત્ ॥ ૪૯॥

એવં કૃત્વા તતઃ કાલે મમાર નીચયોનિજઃ ।
યામાસ્તં ગૃહ્ય સન્તાડ્ય યયુઃ સંયમિનીં પુરીમ્ ॥ ૫૦॥

યમસ્તાન્ પ્રત્યુવાચેદં વચનં ધર્મલક્ષણમ્ ।
મહાપાપી ભટા નૂનમયં તદપિ મુચ્યતામ્ ॥ ૫૧॥

સર્વતીર્થસ્ય દૂતેશા દર્શનં ત્વભવત્ પુરા ।
વણિજં હન્તુકામસ્ય પાપનાશકરં મહત્ ॥ ૫૨॥

ત્યજ્યતાં માનુષે દેહેષુ નરેનં વિચક્ષણાઃ ।
શુભાશુભં તત્ર કૃત્વા ગમિષ્યતિ પુનઃ પુરમ્ ॥ ૫૩॥

સ કૈવર્તોઽભવત્તત્ર બઙ્ગાલે દેવસત્તમાઃ ।
એવં દર્શનમાત્રેણેહ કૃતં દુરિતં ગતમ્ ॥ ૫૪॥

અન્યદ્યજ્જલબિન્દોશ્ચ સ્પર્શજં કથયામ્યહમ્ ।
ચરિતં તસ્ય સર્વજ્ઞાઃ શ◌ૃણુધ્વં સિદ્ધિદં પરમ્ ॥ ૫૫॥

વ્યાધઃ કશ્ચિદ્વને સંસ્થો બભૂવે તત્ર દેશજઃ ।
બ્રહ્મહત્યાદિકં પાપં ચકાર નિત્યમાદરાત્ ॥ ૫૬॥

દદર્શ દ્રવ્યસંયુક્તં દુષ્ટધીરેકદા નરમ્ ।
ખડ્ગમુદ્યમ્ય નિઃકોશં તં હન્તું ધાવિતોઽભવત્ ॥ ૫૭॥

પપાલ માનવો ભીતઃ પૃષ્ઠે વ્યાધસ્તથા ગમત્ ।
કમણ્ડલૂદ્ભવા ગઙ્ગા પ્રાપ્તા દૈવવશેન હ ॥ ૫૮॥

તામુલ્લઙ્ઘ્ય પપાલાઽસૌ સોઽપિ ખડ્ગયુતસ્તથા ।
વ્યાધઃ પપાત દૈવેનોલ્લઙ્ઘ્ય તીરે દુરાત્મવાન્ ॥ ૫૯॥

સ તત્ર જલબિન્દૂનાં સ્પશર્યુક્તો બભૂવ હ ।
નરો દૂરં ગતઃ સોઽપિ નિઃશ્વસ્ય સ્વગૃહં યયૌ ॥ ૬૦॥

એવં પાપસમાચારં મૃતં કાલે સુદુર્મતિમ્ ।
વ્યાધં તં ગૃહ્ય દેવેશા યમદૂતા યમં યયુઃ ॥ ૬૧॥

તં દૃષ્ટ્વા ધર્મરાજસ્તાનુવાચ પ્રેમસંયુતઃ ।
(Page ખં. ૬ અ. ૨૫ પાન ૭૬)
અયં શુદ્ધો મહાભાગાઃ સર્વપાપવિવર્જિતઃ ॥ ૬૨॥

કમણ્ડલૂદ્ભવાતીરે પપાત ધાવનાકુલઃ ।
તત્ર તસ્યા જલસ્પર્શો બભૂવે ચાસ્ય દર્શનમ્ ॥ ૬૩॥

દર્શનેનેહજં પાપં ગતં સર્વં લયં કિલ ।
અનેકજન્મજં પાપં તોયસ્ય સ્પર્શનાદ્ધતમ્ ॥ ૬૪॥

તતઃ પરં કૃતં પાપં યાતનાદં મતં યમાઃ ।
તથાપિ નૈવ યોગ્યોઽયં યાતનાયાં વિશેષતઃ ॥ ૬૫॥

બ્રહ્મકમણ્ડલોર્યસ્ય દર્શનાદિકમઞ્જસા ।
ભવેત્તસ્ય ભટા નેદં યાતનાજં ભયં ભવેત્ ॥ ૬૬॥

કાશ્મીરે સ બભૂવાપિ બ્રાહ્મણો વેદપારગઃ ।
એવં નાના જનાસ્તસ્યાં પાપહીના બભૂવિરે ॥ ૬૭॥

અથેતિહાસકં વક્ષ્યે પુરાકલ્પભવં પરમ્ ।
શૂદ્રઃ કશ્ચિદ્બભૂવાઽપિ બઙ્ગદેશે મહેશ્વરાઃ ॥ ૬૮॥

શ્યામો નામ મહાપાપી શિશ્નોદરપરાયણઃ ।
ચૌર્યકર્મપરો નિત્યં નગરેષુ વનેષુ ચ ॥ ૬૯॥

બભ્રામ શસ્ત્રસંયુક્તો મારયામાસ નિત્યદા ।
જનાન્નાનાવિધાંશ્ચૈવ મદ્યમાંસપરોઽભવત્ ॥ ૭૦॥

સ કદાચિદ્વને સંસ્થો દદર્શ વણિગુત્તમાન્ ।
દ્રવ્યયુક્તાંસ્તતો દુષ્ટો માર્ગસંસ્થો બભૂવ તૈઃ ॥ ૭૧॥

તે યયુર્દણ્ડકારણ્યે સોઽપિ ચૌર્યાર્થમાયયૌ ।

તત્રોષ્ણકામયોગેન જલહીનાશ્ચ બભ્રમુઃ ॥ ૭૨॥

તૃષાયુક્તાઃ સમાયાતાસ્તટે બ્રહ્મકમણ્ડલોઃ ।
તસ્યાં જલં પપુઃ સર્વે પુનર્ગ્રામં સમાયયુઃ ॥ ૭૩॥

નિશિ સુપ્તાશ્ચ ચૌરેણ હતા મૃત્યું યયુસ્તતઃ ।
દેવેન્દ્રનગરે સર્વે યયુઃ પુણ્યપ્રભાવતઃ ॥ ૭૪॥

જલપાનેન દેવેશાઃ કિલ બ્રહ્મકમણ્ડલોઃ ।
ઇન્દ્રપુર્યાં નિવાસં તે ચક્રિરે વણિગુત્તમાઃ ॥ ૭૫॥

તતઃ કાલે મૃતં ચૌરં ગૃહીતું તં યમસ્ય ચ ।
દૂતા યયુર્યમં ગૃહ્ય દૃષ્ટ્વા દેવોઽબ્રવીદ્યમઃ ॥ ૭૬॥

ધર્મ ઉવાચ ।
અયં શૂદ્રો મહાપાપી તથાઽપિ પુણ્યવાનભૂત્ ।
સર્વતીર્થમયીં દૃષ્ટ્વા દુષ્ટકાર્યવશાત્ કિલ ॥ ૭૭॥

જલપાનં કૃતં તસ્યાસ્તત્ર સ્પર્શો જલસ્ય ચ ।
બભૂવ ત્રિવિધં પુણ્યં તેષાં વક્ષ્યામિ કારણમ્ ॥ ૭૮॥

ઇહ જન્મકૃતં પાપં દર્શનેન લયં ગતમ્ ।
કમણ્ડલૂદ્ભવાયાસ્તુ સ્પર્શેનાનેકજન્મજમ્ ॥ ૭૯॥

પાનેનેન્દ્રપદપ્રાપ્તિસમં પુણ્યં બભૂવ હ ।
બાહ્યાન્તઃ પાપહીનશ્ચ પુણ્યયુક્તોઽયમુચ્યતે ॥ ૮૦॥

અત એનં પ્રગૃહ્ય ત્વં મહેન્દ્રં દૂતસત્તમ ।
પ્રાપય તત્પુરે સંસ્થો ભોગાન્ ભોક્ષ્યતિ નિશ્ચિતમ્ ॥ ૮૧॥

પુનઃ પતિષ્યતિ પ્રાજ્ઞઃ પૃથિવ્યાં નાત્ર સંશયઃ ।
દૂતસ્તથા ચકારૈવ પ્રણનામ યમં પુનઃ ॥ ૮૨॥

એવં નાના નરા દેવા યયુઃ સિદ્ધિં વિશેષતઃ ।
તન્ન શક્યં કથયિતું ન ભવતિ શતવર્ષતઃ ॥ ૮૩॥

અન્યદ્વઃ કથયિષ્યામિ ચેતિહાસં પુરા ભવમ્ ।
સઙ્ક્ષેપેણ મહાભાગા સ્નાનસિદ્ધિપ્રકાશકમ્ ॥ ૮૪॥

ધનપ્રિય ઇતિ ખ્યાતો બઙ્ગાલે કારુકોઽભવત્ ।
પાપનિષ્ઠઃ સદા પાપં ચકાર દુર્મતિર્મુદા ॥ ૮૫॥

દ્રવ્યાર્થં વિષદાનેન હતૌ માતાપિતા સ્વકૌ ।
પ્રણમ્ય બ્રાહ્મણાદીંશ્ચ જઘાન વિષયોગતઃ ॥ ૮૬॥

સાધુભાવપ્રદર્શી સ બાહ્યેન્તસ્તુ દુરાત્મવાન્ ।
તેન મોહયુતાઃ સર્વે તદધીના બભૂવિરે ॥ ૮૭॥

તતો બહૌ ગતે કાલે રાજ્ઞા જ્ઞાતં દુરાત્મનઃ ।
(Page ખં. ૬ અ. ૨૫ પાન ૭૭)
કર્મ તં ગૃહ્ય તસ્યૈવ દ્રવ્યં નીતં સમગ્રકમ્ ॥ ૮૮॥

સ્વદેશાત્તં બહિઃ કૃત્ય રાજા ધર્મપરાયણઃ ।
પાલયામાસ લોકાન્ સ સદા નીત્યા સ્વદેશગાન્ ॥ ૮૯॥

તતોઽયં દણ્ડકારણ્યે પુત્રદારૈર્જગામ હ ।
તત્રૈવ રોચયામાસ વાસાર્થં ગ્રામમુત્તમમ્ ॥ ૯૦॥

તાદૃશીં વૃત્તિમાસ્થાય પુનઃ પાપં ચકાર હ ।
એકદા દ્રવ્યસંયુક્તં વણિજં સ દદર્શ હ ॥ ૯૧॥

અનુ તં વિષસંયુક્તો જગામ દુષ્ટધીઃ ખલઃ ।
સાધુલક્ષણસંયુક્તો લોભનાય વણિક્સુતમ્ ॥ ૯૨॥

માર્ગે મહાનદી પ્રાપ્તા સર્વતીર્થમયી પરા ।
તસ્યાં સ્નાનં ચકારાઽસૌ વણિજેન સમન્વિતઃ ॥ ૯૩॥

પ્રગચ્છન્તં તતો માર્ગે દ્વિતીયે દિવસે ખલઃ ।
વિષેણામોહ્ય વણિજં મારયામાસ તત્ક્ષણાત્ ॥ ૯૪॥

વણિક્સ સ્નાનપુણ્યેન શુક્લગત્યા મહેશ્વરાઃ ।
કમણ્ડલોર્મહામોક્ષં લેભે ક્રમેણ નિશ્ચિતમ્ ॥ ૯૫॥

ધનપ્રિયો મમારૈવ કાલેન સ્વગૃહે સ્થિતઃ ।
સોઽપિ મોક્ષં મહાદેવા લેભે સ્નાનપ્રભાવતઃ ॥ ૯૬॥

અધુનાઽન્યત્ પ્રવક્ષ્યામિ ચરિત્રં ચ કમણ્ડલોઃ ।
સ્મરણેન મહેશાના મહાસિદ્ધિપ્રદાયકમ્ ॥ ૯૭॥

ગુર્જરે વૈશ્યજઃ કશ્ચિદ્ બભૂવે ધર્મનામકઃ ।
સ્વધર્મનિરતો નિત્યં ચકાર કર્મ ચાદરાત્ ॥ ૯૮॥

તેન સ્કાન્દભવં તત્ર માહાત્મ્યં સંશ્રુતં પરમ્ ।
કમણ્ડલુપ્રભાવેણ યુક્તં સ્વયં સુવિસ્મિતઃ ॥ ૯૯॥

મનસા ધારયામાસ ધન્યેયં સરિતાંવરા ।
મયા લભ્યા યદા દેવી તદા મે સફલં જનુઃ ॥ ૧૦૦॥

ધર્મો નિત્યં મહેશાનાસ્તાં સસ્માર મહાનદીમ્ ।
તત્ર કોઽપિ સમાયાતઃ ક્ષત્રિયો માર્ગગઃ કદા ॥ ૧૦૧॥

તેનાઽપિ સંશ્રુતં નામ બ્રહ્મકમણ્ડલૂદ્ભવમ્ ।
પ્રાતરુત્થાય સ્વસ્થાનં જગામ ક્ષત્રિયઃ ખલઃ ॥ ૧૦૨॥

તતો બહૌ ગતે કાલે ધર્મસંજ્ઞો મમાર હ ।
સ્વર્ગં ગત્વા સ વિવિધાન્ બુભુજે ભોગકાન્ પરાન્ ॥ ૧૦૩॥

પુનશ્ચ બ્રાહ્મણઃ સોઽપિ બભૂવાત્રિકુલોદ્ભવઃ ।
શિવદત્ત ઇતિ ખ્યાતઃ સર્વતીર્થનદીતટે ॥ ૧૦૪॥

સ્વધર્મનિરતો વિપ્રો ન મુમોચ નદીતટમ્ ।
તત્ર સ્નાનાદિકં સર્વં જલકાર્યં ચકાર હ ॥ ૧૦૫॥

પૂર્વપુણ્યબલેનૈવોત્તમતીર્થસ્ય સેવનાત્ ।
યોગી બભૂવ તત્રાઽસૌ મમાર તુ તટે સ્થિતઃ ॥ ૧૦૬॥

બ્રહ્મણિ બ્રહ્મભૂતઃ સ બભૂવે દેવસત્તમાઃ ।
એવં દૂરસ્થિતસ્યાઽપિ સ્મરણેન ગતિપ્રદા ॥ ૧૦૭॥

યેન શ્રુતં મહન્નામ સર્વતીર્થસ્ય દેવપાઃ ।
ક્ષત્રિયઃ પાપકર્મા સ ચકાર પાપમુલ્બણમ્ ॥ ૧૦૮॥

મૃતં તં યમદૂતાઃ સઙ્ગૃહ્ય સન્તાડ્ય ભાનુજમ્ ।
પ્રણમ્ય નરકે દુષ્ટં ચિક્ષિપુશ્ચ તદાજ્ઞયા ॥ ૧૦૯॥

પુનઃ શ્વાનો બભૂવાઽપિ ક્ષત્રિયઃ પાપકારકઃ ।
બભ્રામ દણ્ડકારણ્ય આજગામ મહાનદીમ્ ॥ ૧૧૦॥

તત્ર કીટાદિભિઃ શ્વાનો મક્ષિકાભિઃ પ્રપીડિતઃ ।
સ્નાનં ચક્રે મહાનદ્યાં પૂર્વસંસ્કારયોગતઃ ॥ ૧૧૧॥

મમાર તેન પુણ્યેન મોક્ષં લેભે ન સંશયઃ ।
સકૃન્નામ્નઃ શ્રુતસ્યૈવ પુણ્યેનેદં કૃતં મહત્ ॥ ૧૧૨॥

ધન્યાસ્તા વીરુધો વલ્લ્યસ્તૃણાનિ વૃક્ષકાદયઃ ।
બ્રહ્મકમણ્ડલોસ્તીરે નાન્યત્ર રાજ્યસંયુતઃ ॥ ૧૧૩॥

(Page ખં. ૮ અ. ૨૫ પાન ૭૮)
યસ્યાસ્તીરે મૃતો જન્તુઃ શુક્લગત્યા ગમિષ્યતિ ।
બ્રહ્મ રાજા મૃતોઽન્યત્ર જન્મયુક્તો ભવિષ્યતિ ॥ ૧૧૪॥

એવં સર્વત્ર દેવેશા બ્રહ્મકમણ્ડલૂદ્ભવા ।
શુભદા પૂર્વગા પ્રોક્તા મયૂરેશપરાયણા ॥ ૧૧૫॥

ચતુર્મુખે મધ્યમેશે હૃષીકેશે વિશેષદા ।
સર્વત્ર દુર્લભા દેવાદીનાં ત્રિષુ કમણ્ડલુઃ ॥ ૧૧૬॥

કોટિતીર્થાનિ મૂલેઽસ્યાઃ સ્થિતાનિ મધ્યમે તથા ।
અન્તે કોટિશ્ચ સર્વત્ર તીરે કોટ્યર્ધમઞ્જસા ॥ ૧૧૭॥

સઙ્ક્ષેપેણ મયા તસ્યાશ્ચરિતં કથિતં પરમ્ ।
શ્રવણાત્ પઠનાદ્દેવાઃ સર્વપાપહરં ભવેત્ ॥ ૧૧૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે બ્રહ્મકમણ્ડલુતીર્થચરિતં નામ પઞ્ચવિંશતિતમોઽધ્યાયઃ ॥ ૬.૨૫

## ૬.૨૬ સપ્તતીર્થીવર્ણનં નામ ષડ્વિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ભૃશુણ્ડ્યુવાચ ।
અધુના યાનિ માયૂરે કમણ્ડલુતટેઽમરાઃ ।
તીર્થાનિ તેષુ મુખ્યાનિ કથયામિ સમાસતઃ ॥ ૧॥

મુખ્યં ગણેશકુણ્ડાખ્યં તીર્થમેકં પ્રકીર્તિતમ્ ।
સઙ્ક્ષેપતશ્ચરિત્રં તુ કથિતં તસ્ય દેવપાઃ ॥ ૨॥

અતઃ પરં પઞ્ચતીર્થાનિ શ ૃણુધ્વં સમાસતઃ ।
ગાણેશં મધ્યભાગે યદ્ધનુષાં દ્વિશતાત્મકમ્ ॥ ૩॥

તત્ર ક્ષેત્રાણિ તીર્થાનિ દેવા મુનિનરાદયઃ ।
સ્નાનં કુર્વન્તિ સર્વેઽન્યે નિત્યમેકં પ્રયત્નતઃ ॥ ૪॥

ઉભયોસ્તીરગં પ્રોક્તં પરં બ્રહ્મ કમણ્ડલોઃ ।
તત્ર સ્નાનેન ગાણેશા ભવન્તિ જન્તવઃ સદા ॥ ૫॥

તતઃ પરં મહાતીર્થં કાપિલં તાદૃશં મતમ્ ।
કમલાસુરનાશાય ગણેશઃ કપિલોઽભવન્ ॥ ૬॥

હત્વાઽસુરં મહાવીર્યમજેયં શઙ્કરાદિભિઃ ।
તન્મસ્તકં સમાશ્રિત્ય મયૂરે સંસ્થિતોઽભવત્ ॥ ૭॥

તત્રાભિષેકમકરોદ્બ્રહ્મા મુનિગણાન્વિતઃ ।
કપિલાય ગણેશસ્ય સૂક્તૈર્હર્ષસમન્વિતઃ ॥ ૮॥

તત્ર પઞ્ચામૃતં નામ બભૂવ કિલ પૂજનાત્ ।
નદ્યાસ્તેષાં ચ યોગેન તત્તીર્થં પરમં મતમ્ ॥ ૯॥

સ્નાનેન કાપિલં તત્ર જ્ઞાનં સાઙ્ખ્યાત્મકં લભેત્ ।
કપિલો વિષ્ણુરાખ્યાતોઽભવત્તત્રૈવ સંસ્થિતઃ ॥ ૧૦॥

તતઃ પરં વ્યાસતીર્થં સર્વાજ્ઞાનવિનાશનમ્ ।
તાવતા માનયોગેન જ્ઞાતવ્યં વિબુધૈઃ પરમ્ ॥ ૧૧॥

વ્યાસેન તત્ર દેવેશાસ્તપસ્તપ્તં સુદારુણમ્ ।
શતવર્ષે ગતે ચાઢ્યં દદૌ વરં ગણેશ્વરઃ ॥ ૧૨॥

તેન ભારતકં ધર્માઽધર્મયુક્તં ચકાર હ ।
શાસ્ત્રં બ્રહ્મપદં તચ્ચ તયોરૈક્યે મહેશ્વરાઃ ॥ ૧૩॥

તત્ર સ્નાનેનૈવ સદ્યો જાડ્યભાવવિવર્જિતઃ ।
ધર્માઽધર્મવ્યવસ્થાં સ જ્ઞાત્વા બોધયુતો ભવેત્ ॥ ૧૪॥

ગણેશતીર્થાદથ તુ પૂર્વભાગે સમાસ્થિતમ્ ।
ભીમકુણ્ડં મહેશાના ભીમેશેન વિનિર્મિતમ્ ॥ ૧૫॥

તત્ર સ્થિત્વા તપશ્ચક્રે ભીમેશો ગણપસ્ય ચ ।
(Page ખં. ૬ અ. ૨૬ પાન ૭૯)
વરદાનપ્રભાવેણ ભીમાસુરં જઘાન સઃ ॥ ૧૬॥

ભીમેશતીર્થં મુખ્યં વૈ મહદૈશ્વર્યદાયકમ્ ।
તત્ર સ્નાનેનૈવ સદ્યસ્તાવન્માનયુતં બભૌ ॥ ૧૭॥

કદાચિદુષ્ણકાલે તજ્જલહીનં બભૂવ હ ।

તીર્થં તત્રાગતો ભીમઃ પાણ્ડુપુત્રઃ પ્રતાપવાન્ ॥ ૧૮॥

ગદા પ્રહારેણ તેન ખાતં તીર્થમનુત્તમમ્ ।
જલં તત્ર સ નિઃષ્કાસ્ય સ્નાનં ચક્રેઽતિભક્તિતઃ ॥ ૧૯॥

બલાત્મકં તેન તત્રૈશ્વર્યં પ્રાપ્તં મહાદ્ભુતમ્ ।
ધૃતરાષ્ટ્રસુતાન્ સર્વાન્ જઘાનૈશ્વર્યસંયુતઃ ॥ ૨૦॥

તતઃ પરમૃષીણાં ચ તીર્થં સ્વધર્મદાયકમ્ ।
તાવન્માનેન તત્રૈવ તપઃ સામર્થ્યદાયકમ્ ॥ ૨૧॥

અષ્ટાશીતિ સહસ્રાણિ મુનયો બ્રહ્મ તત્પરાઃ ।
પ્રાપ્ત્યર્થં બ્રાહ્મણત્વસ્ય તપશ્ચેરુશ્ચ તત્ર તે ॥ ૨૨॥

બ્રહ્મભૂતા બભૂવુસ્તે સ્થિતાસ્તત્ર વિશેષતઃ ।
જીવન્મુક્તસ્વભાવેનાભજલ્લમ્બોદરં પરમ્ ॥ ૨૩॥

પઞ્ચતીર્થી સમાખ્યાતાઽમરાઃ ક્ષેત્રે મયૂરકે ।
પઞ્ચસુ સ્નાનમાત્રેણ બ્રહ્મભૂતો નરો ભવેત્ ॥ ૨૪॥

આદૌ સ્નાયાત્ સ ગાણેશે ભૈમે ચાર્ષે તતઃ પરમ્ ।
વ્યાસતીર્થે કાપિલે ચ ગાણેશેંઽતે ક્રમં ચરેત્ ॥ ૨૫॥

ગણેશતીર્થાત્ પૂર્વસ્માત્ ક્ષેત્રાન્તે તીર્થમુત્તમમ્ ।
ષટ્ત્રિંશત્તુ શતાન્યેવ ધનુષાં પાપનાશનમ્ ॥ ૨૬॥

દક્ષિણતીરગસ્તત્ર શિવઃ શક્તિસમન્વિતઃ ।
સંસ્થિતસ્તીર્થમાશ્રિત્ય સર્વાર્થાનાં પ્રવર્તકઃ ॥ ૨૭॥

ઉત્તરં તીરમાશ્રિત્ય રમયા કેશવઃ સ્થિતઃ ।
સર્વધર્મપ્રદાતા તુ ક્ષેત્રાન્તે ક્ષેત્રધારકઃ ॥ ૨૮॥

સર્વાઘઘ્નમિતિ ખ્યાતં તીર્થં સ્નાનેન દેવપાઃ ।
ષષ્ઠં સર્વત્ર વિખ્યાતં દુઃખનાશકરં ભવેત્ ॥ ૨૯॥

ગણેશતીર્થકાદ્દેવાઃ પ્રતીચ્યાં તીર્થમુત્તમમ્ ।
ક્ષેત્રાન્તે સંસ્થિતં નામ્ના સર્વપુણ્યપ્રદાયકમ્ ॥ ૩૦॥

તીર્થસ્યોત્તરતીરસ્થો ભાનુઃ સંજ્ઞાસમન્વિતઃ ।
દક્ષિણતીરસંસ્થૌ ચ પરૌ પ્રકૃતિપૂરુષૌ ॥ ૩૧॥

તત્ર સ્નાનેનૈવ સદ્યઃ પુણ્યરાશિર્ભવેન્નરઃ ।
યદ્યદિચ્છેચ્છુભં તત્તત્ સ લભેન્નાત્ર સંશયઃ ॥ ૩૨॥

સપ્તમં તીર્થમુખ્યં તુ પૂર્વે દૂરે ચતુર્ગુણમ્ ।
સપ્તતીર્થેષુ યઃ સ્નાયાત્ સ વૈ સર્વં લભેચ્છુભમ્ ॥ ૩૩॥

આદૌ ગાણેશકે સ્નાયાદ્ભૈમે ચાર્ષે હ્યઘઘ્નકે ।
પુણ્યદેવ્યા સ તીર્થે સ કાપિલે ગાણપે પુનઃ ॥ ૩૪॥

એવં મુખ્યાનિ સપ્તૈવ કથિતાનિ સમાસતઃ ।
શ્રવણાત્ પાપનાશં તુ કુર્વન્તિ પઠનાન્નૃણામ્ ॥ ૩૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે સપ્તતીર્થીવર્ણનં નામ ષડ્વિંશતિતમોઽધ્યાયઃ ॥ ૬.૨૬
(Page ખં. ૬ અ. ૨૭ પાન ૮૦)

## ૬.૨૭ બ્રહ્મકમણ્ડલુસ્થતીર્થવર્ણનં નામ સપ્તવિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ભૃશુણ્ડ્યુવાચ ।
ગણેશતીર્થમધ્યે તુ ગણેશઃ સંશ્રિતોઽભવત્ ।
વામે સિદ્ધેઃ સમાખ્યાતં તીર્થં સ્નાનેન સિદ્ધિદમ્ ॥ ૧॥

દક્ષિણે બુદ્ધિતીર્થં તુ સ્નાનેન બુદ્ધિદાયકમ્ ।
લક્ષતીર્થં તતઃ સિદ્ધેઃ સમીપે ધ્યાનદાયકમ્ ॥ ૨॥

બુદ્ધેર્લાભસ્થતીર્થં તુ સમીપે લાભદં પરમ્ ।
લાભસ્ય સન્નિધાને તુ મયૂરસ્ય પ્રકીર્તિતમ્ ॥ ૩॥

સ્નાનેન વિવિધો મોહો નશ્યેત્તત્ર વિનિશ્ચિતમ્ ।
લક્ષસ્ય મૌષકં તીર્થં સમીપે સ્નાનમાત્રતઃ ॥ ૪॥

અહમ્ભાવહરં પ્રોક્તં નરાણાં દેવસત્તમાઃ ।
તતશ્ચ મૌદ્ગલં તીર્થં તતો ગાર્ત્સમદં સ્મૃતમ્ ॥ ૫॥

તતશ્ચ શુકતીર્થં તુ દત્તાત્રેયસ્ય તત્પરમ્ ।
અન્યાનિ ગાણપત્યાનાં તીર્થાનિ વિવિધાનિ તુ ॥ ૬॥

તત્ર માનં પ્રવક્ષ્યામિ સમાસેન વિચક્ષણાઃ ।

ધનુર્દશકમાનં તુ ગાણેશં પરિકીર્તિતમ્ ॥ ૭॥

તદર્ધં સિદ્ધિબુદ્ધ્યોશ્ચાન્યેષાં ધનુઃ પ્રમાણકમ્ ।
તેષાં શિષ્યાદિકાનાં તુ યવમાત્રં પ્રકીર્તિતમ્ ॥ ૮॥

મયૂરાખ્યુપુરોભાગે તીર્થં બ્રહ્મપ્રિયસ્ય ચ ।
પ્રમોદસ્ય તથા મોદસ્ય યોગપ્રિયકસ્ય ચ ॥ ૯॥

ગણાનાં તીર્થમુખ્યાનિ તત્રૈવં સંસ્થિતાન્યપિ ।
એતદ્ગણેશતીર્થસ્થતીર્થાનિ કથિતાનિ તુ ॥ ૧૦॥

દક્ષિણોત્તરગાન્યેવ તીર્થાનિ દ્વિધનૂંષિ ચ ।
વક્રતુણ્ડાદિકાનાં ચાષ્ટાનાં દેવેન્દ્રસત્તમાઃ ॥ ૧૧॥

અન્યે નાનાઽવતારાશ્ચ ગણેશસ્ય મહાત્મનઃ ।
તેષાં તત્રૈવ તીર્થાનિ ગાણપત્યપ્રદાનિ તુ ॥ ૧૨॥

તત્ર ક્રમં પ્રવક્ષ્યામિ પૂર્વભાગે ગણેશ્વરાઃ ।
સંસ્થિતાસ્તીર્થગાસ્તાન્ વૈ શ‍ૃણુધ્વં દેવસત્તમાઃ ॥ ૧૩॥

વક્રતુણ્ડશ્ચૈકદન્તો મહોદરો ગજાનનઃ ।
બલ્લાળશ્ચૈવ હેરમ્બો વિઘ્નેશો ભાલચન્દ્રકઃ ॥ ૧૪॥

જ્ઞાનેશઃ શૂર્પકર્ણશ્ચ ચિન્તામણિર્વિનાયકઃ ।
એતે દ્વાદશ મુખ્યાશ્ચ કથિતાસ્તેષુ વિઘ્નપાઃ ॥ ૧૫॥

સંસ્થાંસ્તુ પશ્ચિમે ભાગે કથયામિ સમાસતઃ ।
લમ્બોદરોઽથ વિકટો વિઘ્નેશો ધૂમ્રવર્ણકઃ ॥ ૧૬॥

મહાગણપતિશ્ચૈવ તથા સિદ્ધિવિનાયકઃ ।
વિઘ્નહારશ્ચ ઢુણ્ઢીશો લક્ષ્ય આશાપ્રપૂરકઃ ॥ ૧૭॥

વરદો દેવદેવેશા મદોત્કટ ઇતિ શ્રુતઃ ।
એતે દ્વાદશ વિઘ્નેશાઃ સંસ્થિતાસ્તીર્થગાઃ પરાઃ ॥ ૧૮॥

અન્યે નાનાવતારાશ્ચાઙ્ગુષ્ઠપર્વસમાશ્રિતાઃ ।
તીર્થં મયા સમાખ્યાતં ગાણેશં ગણપપ્રિયમ્ ॥ ૧૯॥

એતાદૃશાનિ ચાન્યાનિ કથયિતું ન શક્યતે ।
તથાપિ પ્રબ્રવીમ્યેવ ભવતાં ભક્તિયન્ત્રિતઃ ॥ ૨૦॥

ઋષિતીર્થાચ્ચતુર્થ્યાશ્ચ તીર્થં કાર્ષ્ણં ચ શૌક્લકમ્ ।
ચતુર્થ્યાં સ્નાનમાત્રેણ ચતુર્વિધફલં ભવેત્ ॥ ૨૧॥

તતઃ શમ્યાશ્ચ મન્દારસ્ય તતસ્તીર્થમુત્તમમ્ ।
દૂર્વાયા ધનુષાં પઞ્ચ પ્રમાણેન વ્યવસ્થિતમ્ ॥ ૨૨॥

તેષુ સ્નાનેન દેવેશા ઈપ્સિતં સર્વમાપ્નુયાત્ ।
સંસ્થમુત્તરત્તીરે યત્તીર્થં તદ્ભૈરવપ્રિયમ્ ॥ ૨૩॥

નગ્નભૈરવદેવેશઃ સ્થિતસ્તત્ર બભૂવ હ ।
નગ્નભૈરવતીર્થે તુ યઃ સ્નાયાદ્ભાવસંયુતઃ ॥ ૨૪॥

યાતનાસમ્ભવં દુઃખં પ્રાપ્નુયાન્ન નરોત્તમઃ ।
તત્પુરો દ્વારકાતીર્થં તત્ર સ્નાનેન મોક્ષદમ્ ॥ ૨૫॥

તતોઽયોધ્યાશ્રિતં તીર્થં મથુરાસંશ્રિતં તતઃ ।
સ્નાનેન મુક્તિદં તત્ર નરાણામીપ્સિતં ભવેત્ ॥ ૨૬॥

(Page ખં. ૬ અ. ૨૭ પાન ૮૧)
સંસ્થમુત્તરતીરે ચ પ્રભાસં રોગનાશનમ્ ।
તત્ર સ્નાનેન દેવેશાઃ સદ્યો વૈ સુખદં ભવેત્ ॥ ૨૭॥

તતઃ પુષ્કરતીર્થં ચ સ્નાનતઃ પાપનાશકમ્ ।
તતઃ કાવેરિકાયાશ્ચ તીર્થં સ્નાનેન મુક્તિદમ્ ॥ ૨૮॥

ચતુર્વિંશતિકાનાં ચ તતો વિષ્ણોઃ કલાત્મનામ્ ।
તીર્થાનિ પાપસઙ્ઘાનાં દાહકાનિ સ્થિતાન્યપિ ॥ ૨૯॥

તત ઉત્તરતીરસ્થઃ સ્વયં વિષ્ણુઃ પ્રતિષ્ઠિતઃ ।
એતેષુ સ્નાનમાત્રેણ સ લભેદ્વૈષ્ણવં પદમ્ ॥ ૩૦॥

ભૃગુતીર્થં તતઃ પશ્ચાત્ પુલહસ્ય પ્રકીર્તિતમ્ ।
તતઃ ક્રતોઃ સમાખ્યાતં તીર્થં પાપહરં પરમ્ ॥ ૩૧॥

તતો મુનિગણાનાં ચ તીર્થાનિ સંસ્થિતાન્યપિ ।
તત્ર માનં પ્રવક્ષ્યામિ શ‍ૃણુધ્વં હ્યેકચેતસઃ ॥ ૩૨॥

વૈષ્ણવાનિ ચ તીર્થાનિ સ્નાનતો દેવસત્તમાઃ ।
વિષ્ણુલોકપ્રદાન્યેવ જ્ઞાતવ્યાનિ વિશેષતઃ ॥ ૩૩॥

યેષાં દેવોઽપદેવાનામૃષીનાં તીર્થકાનિ તુ ।

તત્તલ્લોકપ્રદાન્યેવ સ્નાનેન સ્નાનકારિણામ્ ॥ ૩૪॥

શુક્લગત્યા લયે તેષાં મુક્તિં ગચ્છન્તિ માનવાઃ ।
મયૂરક્ષેત્રમાહાત્મ્યાત્ સ્નાનેનૈવ કમણ્ડલોઃ ॥ ૩૫॥

એકૈકં ધનુરાખ્યાતં માનં મુખ્યાત્મનાં પરમ્ ।
તીર્થં સર્વત્ર માહાત્મ્યે મયૂરે કથિતં મયા ॥ ૩૬॥

અન્યમુનિગણાદીનાં તીર્થાનિ કથિતાનિ ચ ।
અઙ્ગુષ્ઠપર્વમાત્રાણિ જ્ઞાતવ્યાનિ વિશેષતઃ ॥ ૩૭॥

આદૌ સૃષ્ટિસમારમ્ભે સ્રષ્ટા દેવાલયઃ કિલ ।
મુનયઃ ક્ષેત્રતીર્થાનિ તપસ્તેપુઃ સ્વસિદ્ધયે ॥ ૩૮॥

મયૂરે તપસા સિદ્ધાઃ સ્વસ્થાને સઙ્ગતા બભુઃ ।
કલયા મુખ્યભાવેન મયૂરેશં સમાયયુઃ ॥ ૩૯॥

અતો વક્તુમશક્તં તત્તેષાં સ્થાનાદિકં પરમ્ ।
માનં તીર્થં ચ તદ્વચ્ચ જ્ઞાતવ્યં સૂક્ષ્મચક્ષુષા ॥ ૪૦॥

અવન્તીતીર્થમાખ્યાતં દક્ષિણે ચ તટે સ્થિતમ્ ।
શુક્રતીર્થમગસ્ત્યસ્ય તીર્થં સોમેશ્વરસ્ય ચ ॥ ૪૧॥

પિશાચાનાં તથા તીર્થં તીર્થમેવ યમસ્ય ચ ।
નૈરૃતસ્ય તથા તીર્થં હંસતીર્થં તતઃ પરમ્ ॥ ૪૨॥

ભૈરવાણાં મહાતીર્થં રુદ્રાણાં તીર્થકાનિ તુ ।
રામેશ્વરસ્ય તીર્થં તુ મલ્લિકાર્જુનકસ્ય ચ ॥ ૪૩॥

અધુનોત્તરતીર્થસ્ય સીમાં વઃ કથયામ્યહમ્ ।
વિષ્ણ્વવતારતીર્થેભ્યોઽપ્સરસ્તીર્થં પ્રકીર્તિતમ્ ॥ ૪૪॥

દેવતીર્થં તતઃ પશ્ચાત્તતો ગન્ધર્વતીર્થકમ્ ।
ઇન્દ્રસ્યાગ્નેસ્તતસ્તીર્થે વિષ્ણુતીર્થં તદન્તગમ્ ॥ ૪૫॥

દક્ષિણતીરગં તીર્થમત્રેઃ પાપહરં પરમ્ ।
એકદ્વિતત્રિતાદીનાં તીર્થાનિ ગણપાત્મનામ્ ॥ ૪૬॥

તતઃ શમ્ભોર્મહાતીર્થં સીમાસંસ્થં મહેશ્વરાઃ ।
ગાણેશાત્પૂર્વભાગે ચ તીર્થાનિ કથિતાનિ વૈ ॥ ૪૭॥

અથ પશ્ચિમદિગ્ભાગે તીર્થાનિ કથયામ્યહમ્ ।
સઙ્ક્ષેપેણ સુરશ્રેષ્ઠાઃ શ‍ૃણુધ્વં વિધિપૂર્વકમ્ ॥ ૪૮॥

વ્યાસતીર્થાત્ પરં તીર્થં કાશ્યાશ્ચૈવ તતઃ પરમ્ ।
માયાપુર્યાઃ સમાખ્યાતં તતો વિરજકં મતમ્ ॥ ૪૯॥

કૃત્તિવસ્ત્રત્ર્યમ્બકેશશિવાનાં ચ તતઃ પરમ્ ।
વૈદ્યનાથાદિકાનાં ચ તીર્થાનિ સંસ્થિતાનિ ચ ॥ ૫૦॥

તતઃ કૈલાસનાથસ્ય તીર્થં પાપહરં પરમ્ ।
તતો દ્વાદશ માસાનાં તીર્થાનિ સંસ્થિતાનિ ચ ॥ ૫૧॥

મલમાસસ્ય તીર્થં તુ ગાણેશં નાત્ર સંશયઃ ।
(Page ખં. ૬ અ. ૨૭ પાન ૮૨)
દેવો ગણેશ્વરસ્તેન કૃતશ્ચ તપસા પુરા ॥ ૫૨॥

મલમાસે ગણેશસ્ય પૂજનં સેવનં મતમ્ ।
સર્વાર્થસાધકં તચ્ચ ભવિષ્યતિ મહેશ્વરાઃ ॥ ૫૩॥

તતઃ શિવસ્ય શૈવાનિ તીર્થાનિ સંસ્થિતાનિ ચ ।
લક્ષ્મીતીર્થં તતઃ પશ્ચાત્તતઃ સરસ્વતીકૃતમ્ ॥ ૫૪॥

વિષ્ણુકાઞ્ચ્યાસ્તતસ્તીર્થં કૌમાર્યાશ્ચ તતઃ પરમ્ ।
વારાહ્યાસ્તીર્થમુખ્યં તુ તત ઐન્દ્યાઃ પ્રકીર્તિતમ્ ॥ ૫૫॥

વૈષ્ણવ્યાશ્ચ તતસ્તીર્થં માહેશ્વર્યાસ્તતઃ પરમ્ ।
બ્રાહ્મ્યાસ્તીર્થં તતો રક્તદન્તાયાશ્ચ પ્રકીર્તિતમ્ ॥ ૫૬॥

તતો વસિષ્ઠતીર્થં તુ પૌલસ્ત્યં તીર્થમુત્તમમ્ ।
તતશ્ચાઙ્ગિરસસ્તીર્થં કણ્વતીર્થં તતઃ પરમ્ ॥ ૫૭॥

જૈમિનેસ્તીર્થમુખ્યં ચ તતો મેધાતિથેઃ સ્મૃતમ્ ।
કાર્તવીર્યસ્ય તીર્થં તુ માન્ધાતુશ્ચ તતઃ પરમ્ ॥ ૫૮॥

યયાતેર્નહુષસ્યૈવ ધ્રુવસ્ય ચ તતઃ પરમ્ ।
ભરદ્વાજસ્ય તીર્થં તુ જમદગ્નેસ્તતઃ પરમ્ ॥ ૫૯॥

ગૌતમસ્ય તતસ્તીર્થં પાણ્ડવૈશ્ચ તતઃ કૃતમ્ ।
તતો વરુણતીર્થં તુ મરુતશ્ચ તતઃ પરમ્ ॥ ૬૦॥

પિતૃતીર્થં તતઃ પ્રોક્તં ગયાતીર્થં તતઃ પરમ્ ।

તત્રૈવ સંસ્થિતા દેવી ગયાગદાધરાદિભિઃ ॥ ૬૧॥

ઉભયોસ્તીરયોઃ સેવિ નરાણાં બ્રહ્મદાયિની ।
તત્ર પિણ્ડપ્રદાનેન બ્રહ્મભૂતાઃ પિતામહાઃ ॥ ૬૨॥

પિતરશ્ચ તથાઽન્યે વૈ ભવન્તિ ક્ષેત્રકારણાત્ ।
ઋણૈઃ સર્વૈર્વિનિર્મુક્તઃ સ વૈ ગચ્છેત્તતઃ પરમ્ ॥ ૬૩॥

તતઃ પરં મુનીનાં તુ તીર્થાનિ વિવિધાનિ ચ ।
કથયિતું ન શક્યાનિ મયા કેનાપિ નિશ્ચિતમ્ ॥ ૬૪॥

ભૈરવાણાં તતસ્તીર્થં સ્કન્દસ્ય ચ તતઃ પરમ્ ।
નાગેશસ્ય તતઃ પ્રોક્તં રુદ્રાણાં ચ તતઃ પરમ્ ॥ ૬૫॥

વસૂનાં સ્થાનસંયુક્તં તીર્થં પ્રત્યેકમેવ ચ ।
પાર્વત્યાશ્ચ તતઃ પ્રોક્તં તતો ધનપકસ્ય ચ ॥ ૬૬॥

સાધ્યાનાં તીર્થમુખ્યં તુ તતઃ શક્તેશ્ચ તીર્થકમ્ ।
સીમાભૂતં મહેશાનાસ્તટે દક્ષિણગે પરમ્ ॥ ૬૭॥

અધુનોત્તરગે તીરે વ્યાસતીર્થાન્ મહેશ્વરાઃ ।
તીર્થાનિ સંસ્થિતાન્યેવ તાન્યહં પ્રવદામિ તુ ॥ ૬૮॥

વ્યાસતીર્થાત્ સ્વયં બ્રહ્મા પ્રયાગસંયુતઃ સ્થિતઃ ।
તસ્ય તીર્થં મહત્તત્ર સર્વપાપપ્રણાશનમ્ ॥ ૬૯॥

કર્મતીર્થં તતઃ પશ્ચાત્તતોઽગ્નેસ્તીર્થમુત્તમમ્ ।
દ્વાદશાદિત્યકાનાં ચ તીર્થાનિ ચ તતઃ પરમ્ ॥ ૭૦॥

શિવકાઞ્ચ્યાસ્તતસ્તીર્થં તતઃ સૂર્યસ્ય તીર્થકમ્ ।
પૂર્ણસ્ય પૂર્ણભાવાખ્યં સર્વરોગનિકૃન્તનમ્ ॥ ૭૧॥

તતો ગ્રહાણાં તીર્થાનિ દિક્પાલાશ્ચાવશેષિતાઃ ।
તેષાં તીર્થાનિ દેવેશા દેવાનાં યક્ષરક્ષસામ્ ॥ ૭૨॥

મહાકાલ્યાસ્તતસ્તીર્થં નારસિંહ્યાસ્તતઃ પરમ્ ।
શાકમ્ભર્યાસ્તતઃ પ્રોક્તં ચામુણ્ડાયાસ્તતઃ પરમ્ ॥ ૭૩॥

ત્રિપુરાયાસ્તતસ્તીર્થં તતસ્તીર્થાનિ દેવપાઃ ।
મહામાયાયુતાનાં વૈ શક્તીનાં વિવિધાનિ ચ ॥ ૭૪॥

ચતુઃષષ્ટિમિતાનાં ચ યોગિનીનાં મતાનિ વૈ ।
તીર્થાનિ યોગદાન્યેવ પરદેહજકાનિ ચ ॥ ૭૫॥

તતશ્ચ નૈધ્રુવં તીર્થં દેવલસ્ય તતઃ પરમ્ ।
માર્કણ્ડેયસ્ય તીર્થં તુ ભૈરવાણાં તતઃ પરમ્ ॥ ૭૬॥

કાલભૈરવતીર્થં તુ તતઃ ક્રતુમુખાઃ પરમ્ ।
તેષાં પ્રજાપતીનાં તુ તીર્થાનિ સંસ્થિતાનિ તુ ॥ ૭૭॥

તતો રૈવતકં તીર્થં તતો યોગમયં પરમ્ ।
જડભરતતીર્થં ચ યોગસિદ્ધિપ્રદાયકમ્ ॥ ૭૮॥

(Page ખં. ૬ અ. ૨૭ પાન ૮૩)
ઓઙ્કારગણનાથસ્ય તતસ્તીર્થં પ્રકીર્તિતમ્ ।
વિદ્યાધરાણાં તીર્થં ચ તતઃ પૈશાચમોચનમ્ ॥ ૭૯॥

તતો ધર્મસ્ય તીર્થં ત્વશ્વિનોસ્તીર્થં તતઃ પરમ્ ।
નાગાનાં શેષકાદીનાં તતસ્તીર્થશતાનિ ચ ॥ ૮૦॥

તતો ગવાં મહાતીર્થં સનકાદેસ્તતઃ પરમ્ ।
ચતુર્દશ મનૂનાં ચ તીર્થાનિ ચ તતઃ પરમ્ ॥ ૮૧॥

મહાશક્તેસ્તતસ્તીર્થમસિતસ્ય તતઃ પરમ્ ।
દક્ષાદીનાં ચ તીર્થાનિ તતો માતૃગણાઃ સ્મૃતાઃ ॥ ૮૨॥

તેષાં તીર્થાનિ દેવેશાઃ ષષ્ટિર્દક્ષસ્ય કન્યકાઃ ।
તાસાં તીર્થાનિ તત્પશ્ચાદ્ગન્ધર્વાણાં તતઃ પરમ્ ॥ ૮૩॥

ગુહ્યકાનાં તુ તીર્થાનિ તતો વિભીષણસ્ય ચ ।
રાવણસ્ય તતસ્તીર્થં શ્વેતકેતોસ્તતઃ પરમ્ ॥ ૮૪॥

ઉદ્દાલકસ્ય તીર્થં તુ રક્ષસાં ચ તતઃ સ્મૃતમ્ ।
અષ્ટાવક્રસ્ય તીર્થં તુ વૈશ્વદેવં તતઃ પરમ્ ॥ ૮૫॥

તીર્થાનિ ચૈવ તેષાં તુ તતો દક્ષસ્ય ધીમતઃ ।
પુત્રી સન્તાનકાદીનાં તીર્થાનિ વિવિધાનિ ચ ॥ ૮૬॥

મારીચમૌદ્ગલાદીનાં વિપ્રાણાં ચ તતઃ પરમ્ ।
તીર્થાનિ પાણ્ડવેશસ્ય તીર્થં દુર્વાસસઃ પરમ્ ॥ ૮૭॥

દત્તસ્ય તીર્થકં પ્રોક્તં નિદાઘસ્ય તતઃ પરમ્ ।

હનૂમતસ્તતસ્તીર્થં સુગ્રીવસ્ય તતઃ પરમ્ ॥ ૮૮॥

તીર્થં જામ્બવતઃ પ્રોક્તં બલેસ્તીર્થં તતઃ પરમ્ ।
તતશ્ચ વાલખિલ્યાનાં ગાલવસ્ય તતઃ પરમ્ ॥ ૮૯॥

વિશ્વામિત્રસ્ય તીર્થં તુ તીર્થં ત્રિશિરસસ્તતઃ ।
મૃકણ્ડસ્ય તતસ્તીર્થં દધીચેશ્ચ તતઃ પરમ્ ॥ ૯૦॥

કિન્નરાણાં તતસ્તીર્થં સાધ્યાનાં ચ તતઃ પરમ્ ।
કામધેનુમુખીનાં ચ ગવાં તીર્થં તતઃ પરમ્ ॥ ૯૧॥

અસિતસ્ય તતસ્તીર્થમિક્ષ્વાકોશ્ચ તતઃ પરમ્ ।
ગાર્ગ્યાણાં ચ તતસ્તીર્થં માણ્ડૂકાનાં તતઃ પરમ્ ॥ ૯૨॥

ધૌમ્યસ્ય ચૈવ વાલ્મીકેસ્તતસ્તીર્થં ચ જૈમિનેઃ ।
વાચક્નવેસ્તતસ્તીર્થં તતો મઙ્કણકસ્ય ચ ॥ ૯૩॥

પ્રહ્લાદસ્ય તતસ્તીર્થં દધીચેશ્ચ તતઃ પરમ્ ।
ઉપમન્યોસ્તતસ્તીર્થં વૈશમ્પાયનકસ્ય ચ ॥ ૯૪॥

જાજલેઃ પર્વતસ્યૈવ પૈલસ્ય ચ તતઃ પરમ્ ।
લોમશસ્ય વિભાણ્ડસ્ય ઋષ્યશ‍ૃઙ્ગસ્ય તત્પરમ્ ॥ ૯૫॥

તતો મુનિગણાનાં ચ તીર્થાનિ વિવિધાનિ તુ ।
અશ્વત્થામ્નસ્તતસ્તીર્થં કૃપસ્ય ચ તતઃ પરમ્ ॥ ૯૬॥

તતો વરાહતીર્થં તુ ભૂમ્યાસ્તીર્થં તતઃ પરમ્ ।
પ્રકૃતેઃ પુરુષસ્યૈકા મહામાયા પ્રકીર્તિતા ॥ ૯૭॥

તસ્યાસ્તીર્થં સમાખ્યાતં સીમાસંસ્થં મહેશ્વરાઃ ।
એતાનિ તીર્થમુખ્યાનિ કથિતાનિ સમાસતઃ ॥ ૯૮॥

સ્વસ્વમુખ્યદિનેષ્વેવ સેવનીયાનિ માનવૈઃ ।
મયૂરવાસિભિઃ સ્વસ્વસિદ્ધિદાનિ ભવન્તિ હિ ॥ ૯૯॥

મયૂરેઽપારતીર્થાનિ તેષાં માનં વદામ્યહમ્ ।
અઙ્ગુષ્ઠપર્વમાત્રાણિ તીર્થાનિ તીર્થસેવિનામ્ ॥ ૧૦૦॥

યવમાત્રસ્વરૂપેણ સંસ્થિતાસ્તીર્થસેવિનઃ ।
ત્રૈલોક્યે યાનિ તીર્થાનિ નાનાભેદધરણિ ચ ॥ ૧૦૧॥

મયૂરે તાનિ સર્વાણિ સંસ્થિતાનિ વિશેષતઃ ।
અણુમાત્રસ્વરૂપૈસ્તુ જ્ઞાતવ્યાનિ મનીષિભિઃ ॥ ૧૦૨॥

મયૂરે યાનિ તીર્થાનિ ન ગચ્છન્તિ તુ કુત્રચિત્ ।
(Page ખં. ૬ અ. ૨૮ પાન ૮૪)
સ્વસ્વસ્થાનં સમાશ્રિત્ય સેવન્તે દ્વિરદાનનમ્ ॥ ૧૦૩॥

ગાણેશક્ષેત્રભૂતેષુ દેવાસ્તીર્થસમન્વિતાઃ ।
સંસ્થિતાસ્તે તુ ગચ્છન્તિ મયૂરે દર્શનાર્થિનઃ ॥ ૧૦૪॥

એતત્ સઙ્ક્ષેપતઃ પ્રોક્તં તીર્થાનાં તુ ચરિત્રકમ્ ।
શ્રવણાત્ પઠનાત્ નૃભ્યો ભુક્તિમુક્તિપ્રદં ભવેત્ ॥ ૧૦૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે બ્રહ્મકમણ્ડલુસ્થતીર્થવર્ણનં નામ સપ્તવિંશતિતમોઽધ્યાયઃ ॥ ૬.૨૭

## ૬.૨૮ નગ્નભૈરવપ્રશંસા નામાષ્ટાવિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દેવેશા ઊચુઃ ।
એતેષુ તીર્થમુખ્યેષુ કે કે સિદ્ધિં સમાયયુઃ ।
તેષાં સમાસતઃ સ્વામિંશ્ચરિત્રં વદ સૌખ્યદમ્ ॥ ૧॥

ભૃશુણ્ડ્યુવાચ ।
ગચ્છધ્વં દેવદેવેશા મયૂરેશં મદાજ્ઞયા ।
તત્ર સિદ્ધા ભવિષ્યન્તઃ સર્વં જ્ઞાસ્યથ સિદ્ધિદમ્ ॥ ૨॥

સ્કાન્દે વિસ્તરતઃ સર્વં પ્રોક્તં ચૈવ ન સંશયઃ ।
સમાસતઃ સમાખ્યાતં મયા ક્ષેત્રચરિત્રકમ્ ॥ ૩॥

દેવેશા ઊચુઃ ।
નિત્યયાત્રાં વદ સ્વામિંસ્તથા ક્ષેત્રપ્રદક્ષિણામ્ ।
યાત્રામન્યનરાણાં તુ સર્વસિદ્ધિપ્રદાં વદ ॥ ૪॥

પાપયુક્તઃ સ્વભાવેન મયૂરે સંસ્થિતોઽભવત્ ।
ચકાર નગરાદ્બાહ્યં કથં તં નગ્નભૈરવઃ ॥ ૫॥

સંસ્કારેણ સમાયુક્તં ગાણપત્યં તથા પ્રભુઃ ।

કથં સ માનયત્ ક્ષેત્રે તદ્વદસ્વ સમાસતઃ ॥ ૬॥

ભૃશુણ્ડ્યુવાચ ।
બઙ્ગાલે બ્રાહ્મણઃ કશ્ચિદ્ગાણપત્યપરાયણઃ ।
વિશ્વામિત્રકુલે જાતો નામ્ના શમ્ભુર્મહાયશાઃ ॥ ૭॥

હૃદિ તસ્ય સમાશ્રિત્ય નગ્નો ભૈરવનાયકઃ ।
બુદ્ધિભેદં ચકારાઽસૌ તેન સંવ્યથિતો દ્વિજઃ ॥ ૮॥

મયૂરેશં તુ દ્રક્ષ્યામિ કદાઽહં દેહધારકઃ ।
ક્ષણભઙ્ગુરદેહસ્થઃ કિં કરોમિ ત્વરાયુતઃ ॥ ૯॥

તતઃ સપુત્રદારાદિસંયુક્તો નિઃસૃતો ગૃહાત્ ।
ભિક્ષાશનશ્ચ દેવેશા દ્રવ્યહીનતયાઽભવત્ ॥ ૧૦॥

દ્વાભ્યાં સમાગતઃ સોઽપિ માસાભ્યાં લઙ્ઘ્ય માર્ગકમ્ ।
ગણેશતીર્થગો વિપ્રો નનન્દ હર્ષયન્ સ્વકાન્ ॥ ૧૧॥

મયૂરેશં પ્રપૂજ્યાદૌ યાત્રાં કૃત્વા વિધાનવિત્ ।
ક્ષેત્રસંન્યાસભાવેનાઽભજત્તં દ્વિરદાનનમ્ ॥ ૧૨॥

અન્તે સ્વાનન્દગો ભૂત્વા ભજતે ગણનાયકમ્ ।
હૃદિ પ્રભુઃ સમાશ્રિત્ય નરમેવં સમાનયત્ ॥ ૧૩॥

અથ પાપપરા યે ચ તેષાં વદામિ દેવપાઃ ।
ક્ષેત્રત્યાગભવં ચિત્રં ચરિત્રં શ‍ૃણુત પ્રિયાઃ ॥ ૧૪॥

મયૂરે બ્રાહ્મણઃ કશ્ચિદ્વાસિષ્ઠે જનિતોઽભવત્ ।
જન્મારભ્ય મહાપાપી પાપનિષ્ઠો બભૂવ હ ॥ ૧૫॥

ન વેદાધ્યયનં ચક્રે બાલ્યે ચૌર્યપરોઽભવત્ ।
યૌવને મદ્યમાંસાદિ સિષેવે સ પરસ્ત્રિયમ્ ॥ ૧૬॥

તસ્ય બુદ્ધિવિભેદં સ ચકાર નગ્નભૈરવઃ ।
પરસ્ત્રિયં સમાગૃહ્ય વિદર્ભે પ્રયયૌ ખલઃ ॥ ૧૭॥

એવં નાનાવિધં દેવો નગ્નો ભૈરવનાયકઃ ।
ચકાર ચાધિપત્યં સ મયૂરે દણ્ડધારકઃ ॥ ૧૮॥

(Page ખં. ૬ અ. ૨૮ પાન ૮૫)
અન્યચ્ચ કથયિષ્યામિ ચરિત્રં પાપકારિણામ્ ।

મયૂરે યે મતિં કૃત્વા ન પ્રાપુસ્તં મયૂરકમ્ ॥ ૧૯॥

દ્રાવિડે વૈશ્યજાતિસ્થા બભૂવુઃ પાપકારકાઃ ।
વિષાદિના જનાન્ જઘ્નુર્દ્રવ્યયુક્તાન્નિરન્તરમ્ ॥ ૨૦॥

શમ્ભુશ્ચ સોમકઃ કુબ્જઃ કમ્બલશ્ચૈવ મિત્રકાઃ ।
ચત્વારો મદ્યમાંસાદિભક્ષુર્નિત્યમાદરાત્ ॥ ૨૧॥

પરસ્ત્રીલાલસાઃ સર્વે શિશ્નોદરપરાયણાઃ ।
ન ચક્રુઃ પુણ્યલેશં તે ન સ્વધર્માદિકં કદા ॥ ૨૨॥

તત્રૈવ નગરે કશ્ચિદ્વૈશ્યઃ શ્યામલસંજ્ઞિતઃ ।
દ્રવ્યયુક્તો મહાપાપી મમાર દૈવયોગતઃ ॥ ૨૩॥

શ્યાલકસ્તસ્ય તત્રસ્થઃ સ્વધર્મસ્થો બભૂવ હ ।
નામ્ના શઙ્કર આખ્યાતઃ પુણ્યકર્મપરાયણઃ ॥ ૨૪॥

તેનાસ્થિસઞ્ચયસ્તસ્ય કૃત ઉદ્ધારકારણાત્ ।
ગતે માસે મહાપાપા વૈશ્યાશ્ચત્વાર એવ યે ॥ ૨૫॥

દણ્ડકારણ્યદેશે તુ જગ્મુર્વિક્રયકારણાત્ ।
શ્યામલાસ્થિ દદૌ તેભ્યઃ શઙ્કરો વિનયાન્વિતઃ ॥ ૨૬॥

જગાદ તાન્ મહાભાગો મયૂરેઽસ્થિ પ્રગૃહ્ય તુ ।
ત્યજ્યતાં ગણનાથસ્ય તીર્થે બ્રહ્મસુખપ્રદે ॥ ૨૭॥

તથેતિ ગૃહ્ય તસ્યાસ્થિ સમાજગ્મુર્મયૂરકમ્ ।
તત્ર વિઘ્નં ચકારાઽસૌ નગ્નો ભૈરવનાયકઃ ॥ ૨૮॥

ચૌરૈસ્તેષાં હૃતં સર્વં ગતસ્તત્રાસ્થિસઞ્ચયઃ ।
તે પુનઃ સ્વગૃહં જગ્મુઃ કિઞ્ચિદ્ દ્રવ્યયુતાઃ ખલાઃ ॥ ૨૯॥

મયૂરેશસ્ય ચક્રુર્ન યાત્રાં પાપપરાયણાઃ ।
નિશ્ચિતામપિ દેવેશા બુદ્ધિભેદબલાશ્રયાત્ ॥ ૩૦॥

એવં મહાબલઃ સોઽપિ ભૈરવો હૃદિ સંસ્થિતઃ ।
ગણેશાજ્ઞાવશો ભૂત્વા રક્ષતિ ક્ષેત્રમુત્તમમ્ ॥ ૩૧॥

એતદ્ભૈરવનાથસ્ય ચરિત્રં યઃ શૃણોતિ ચેત્ ।
તસ્ય સર્વં મયૂરે તુ શુભરૂપં ભવિષ્યતિ ॥ ૩૨॥

દેવેશા ઊચુઃ ।
એતાદૃશો મહાભાગો નગ્નો ભૈરવનાયકઃ ।
સ્તોત્રં તસ્ય વદ સ્વામિન્ સંસ્તુમસ્તં નિરન્તરમ્ ॥ ૩૩॥

બુદ્ધિભેદાત્ સ નઃ ક્રુદ્ધઃ કરિષ્યતિ વિશેષતઃ ।
ક્ષેત્રપ્રવેશહીનાંશ્ચેદતસ્તં સેવયામહે ॥ ૩૪॥

ભૃશુણ્ડ્યુવાચ ।
સર્વમાયાવિહીનાય સર્વમાયાપ્રચાલક ।
સર્વાન્તર્યામિણે નિત્યં નગ્નભૈરવ તે નમઃ ॥ ૩૫॥

મયૂરેશપરાયૈવ મયૂરપુરપાલક ।
ધર્મિષ્ઠાનાં સુપાલાય નગ્નભૈરવ તે નમઃ ॥ ૩૬॥

અધર્મનિરતાંશ્ચૈવ બહિઃકારાય દેવપ ।
સદા સ્વાનન્દનિષ્ઠાય નગ્નભૈરવ તે નમઃ ॥ ૩૭॥

સંસ્કારયુક્તભાવેન પાપકર્મપરાત્મનામ્ ।
મયૂરે દણ્ડકર્ત્રે વૈ નગ્નભૈરવ તે નમઃ ॥ ૩૮॥

મહાબલધરાયૈવ બ્રહ્માદીનાં પ્રચાલક ।
અમેયશક્તયે દેવ નગ્નભૈરવ તે નમઃ ॥ ૩૯॥

ભુક્તિમુક્તિપ્રદાત્રે ચ ધનધાન્યવિવર્ધન ।
ગાણેશાનાં પ્રપાલાય નગ્નભૈરવ તે નમઃ ॥ ૪૦॥

પ્રલયે શૂલમુદ્યમ્ય બ્રહ્માણ્ડભયકારક ।
શૂલપ્રોતમહાણ્ડાય નગ્નભૈરવ તે નમઃ ॥ ૪૧॥

અટ્ટહાસેન દેવેન્દ્રાંસ્તથા સન્ત્રાસ્ય ચાસુરાન્ ।
નૃત્યસે ગણનાથાગ્રે નગ્નભૈરવ તે નમઃ ॥ ૪૨॥

વિશ્વં તતં સર્વમિદં ત્વયેશ આદ્યન્તમધ્યેષુ મહાનુભાવ ।
સંરક્ષ દેવેશ મયૂરસંસ્થાનસ્માન્ કુરુષ્વ ત્વમનન્યભાવાન્ ॥ ૪૩॥

શૂલિન્નમસ્તેઽખિલકારણાય ત્વદ્ભીતિભાવેન જગત્પ્રવૃત્તિઃ ।
વ્યાપારયુક્તં વિવિધેષુ નિત્યં સ્વસ્વપ્રકાર્યં પ્રકરોતિ ચાત્મન્ ॥ ૪૪॥

(Page ખં. ૬ અ. ૨૯ પાન ૮૬)
અતસ્ત્વદાધારમયં પરેશ સુરક્ષ તે ભક્તિયુતં કુરુષ્વ ।

ગણેશક્ષેત્રં ત્વદધીનગં તું ગણેશસંસ્થં કુરુ તે નમો વૈ ॥ ૪૫॥

ઇદં સ્તોત્રં મહેશાના નગ્નભૈરવકસ્ય ચ ।
યઃ પઠેચ્છૃણુયાદ્વાઽપિ સ સર્વં પ્રલભેચ્છુભમ્ ॥ ૪૬॥

ધનધાન્યાદિકં સર્વં ભુક્તિમુક્તિસમન્વિતમ્ ।
લભેદનેન દેવેશાસ્તુવિધ્વં નગ્નભૈરવમ્ ॥ ૪૭॥

મયૂરક્ષેત્રત્યાગશ્ચ કદાપિ ન ભવેન્નૃણામ્ ।
સ્તોત્રેણ સ્તુવતાં નિત્યં ન કિઞ્ચિદ્ દુર્લભં ભવેત્ ॥ ૪૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે નગ્નભૈરવપ્રશંસા નામાષ્ટાવિંશતિતમોઽધ્યાયઃ ॥ ૬.૨૮

## ૬.૨૯ ભૃશુણ્ડિદેવેન્દ્રસંવાદસમાપ્તિવર્ણનં નામૈકોનત્રિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ભૃશુણ્ડ્યુવાચ ।
દ્વારયાત્રા સમાખ્યાતા સૈવ ક્ષેત્રપ્રદક્ષિણા ।
જ્ઞાતવ્યા દેવદેવેશાઃ કુરુધ્વં યત્નસંયુતાઃ ॥ ૧॥

પુણ્યકર્મ નરઃ કુર્યાત્તદા પાપાનિ માનવમ્ ।
છલયન્તિ વિશેષેણ તસ્માદ્યત્નપરો ભવેત્ ॥ ૨॥

નિત્યયાત્રાં પ્રવક્ષ્યામિ મયૂરક્ષેત્રવાસિનામ્ ।
અન્યેષાં સર્વદાં પૂર્ણાં શૃણુધ્વં સુસમાહિતાઃ ॥ ૩॥

મયૂરેશં સમભ્યર્ચ્ય પરિવારસમન્વિતમ્ ।
તતોઽષ્ટગણપાન્ ક્ષેત્રં કુણ્ડં નદીં પ્રપૂજયેત્ ॥ ૪॥

શમીં મન્દારકં દૂર્વાં ચતુર્થીં ચ તતઃ પરમ્ ।
મુદ્ગલં શુકયોગીશં તતો મણ્ડપગો ભવેત્ ॥ ૫॥

ચતુર્દેવાંશ્ચ પૂર્વાદિક્રમતઃ સંસ્થિતો નરઃ ।
તત્ર ધર્માદિકાન્ શ્રુત્વા યથાવકાશમાનતઃ ॥ ૬॥

પુનર્ગણેશ્વરં નત્વા ગચ્છેત્ સ્વગૃહકં તતઃ ।
એવં કુર્યાન્નિત્યયાત્રાં સ ગણેશપ્રિયો ભવેત્ ॥ ૭॥

નિત્યયાત્રાં નરો યસ્તુ ન કુર્યાદ્યદિ દેવપાઃ ।

ક્ષેત્રવાસફલં તસ્ય ન ભવેત્ પૂર્ણમઞ્જસા ॥ ૮॥

યાતનાં સ લભેદન્તે સમ્પૂર્ણાં ભૈરવીં પરામ્ ।
અતો યાત્રાં સમાકુર્યાત્ ક્ષેત્રસ્થો નિયમેન તુ ॥ ૯॥

અધુના ગણપપ્રીત્યૈ યાત્રામન્યાં વદામ્યહમ્ ।
સમ્પૂર્ણભક્તિદાત્રીં ચ ગાણેશીં ગણપપ્રિયાઃ ॥ ૧૦॥

ગર્ભાગારે ચતુર્દિક્ષુ સ્થિતા વિઘ્નેશ્વરાઃ પરાઃ ।
ષટ્પઞ્ચાશચ્ચ તે તેષુ મુખ્યાઃ પૂજ્યા વિશેષતઃ ॥ ૧૧॥

દિક્પાલાનાં મહાસ્ત્રાણિ તેભ્યઃ પઞ્ચ ધનુઃ પુરઃ ।
સર્વત્ર સંસ્થિતાઃ સર્વે ગણેશા ગણપે રતાઃ ॥ ૧૨॥

ચતુર્દશપ્રમાણેન પ્રત્યેકં દિક્ષુ સંસ્થિતાન્ ।
ગણપાન્ પૂજયેદ્યસ્તુ ગાણપત્યો ભવેન્નરઃ ॥ ૧૩॥

બલ્લાળઃ કપિલો ઢુણ્ઢિર્વક્રતુણ્ડો મહોદરઃ ।
હેરમ્બો ગણનાથસ્તુ વિઘ્નેશો વિઘ્નહારકઃ ॥ ૧૪॥

ભાલચન્દ્રઃ શૂપકર્ણો જ્યેષ્ઠરાજો ગજાનનઃ ।
મહોત્કટશ્ચ દેવેશા અભવન્ પૂર્વદિક્ સ્થિતાઃ ॥ ૧૫॥

એકૈકસ્માત્ ક્રમેણૈવ ધનુષાં પઞ્ચવિંશતિમ્ ।
(Page  ખં. ૬ અ. ૨૯ પાન ૮૭)
દૂરે સંસ્થા ગણેશાના જ્ઞાતવ્યા ભક્તિકારિભિઃ ॥ ૧૬॥

તસ્માદ્ દ્વિગુણમાનેન દક્ષિણે સંસ્થિતાઃ પરાઃ ।
તસ્માચ્ચતુર્ગુણેનૈવ પશ્ચિમે ગણપા બભુઃ ॥ ૧૭॥

તસ્માત્ પાદવિહીનેન ગણપા ઉત્તરે ભવન્ ।
એવં ક્રમેણ પૂજ્યાસ્તે સર્વસિદ્ધિપ્રદાયકાઃ ॥ ૧૮॥

અથ દક્ષિણસંસ્થાંસ્તુ કથયામિ ગણેશ્વરાન્ ।
જ્ઞાનેશઃ કર્મપશ્ચૈવ યોગેશઃ સિદ્ધિવિઘ્નપઃ ॥ ૧૯॥

ચિન્તામણિશ્ચ બુદ્ધીશો મહાગણપતિસ્તથા ।
પૂર્ણાનન્દશ્ચ લક્ષ્યેશઃ સહજેશૈકદન્તકૌ ॥ ૨૦॥

લમ્બોદરો ધૂમ્રવર્ણસ્તથા ક્ષિપ્રપ્રસાદનઃ ।
એતે દક્ષિણગાઃ પ્રોક્તા ગર્ભાગારે મહેશ્વરાઃ ॥ ૨૧॥

વિનાયકશ્ચ વિકટ આશાપૂરક સંજ્ઞિતઃ ।
ધૂમ્રકેતુઃ પ્રમોદશ્ચ મોદઃ સુમુખદુર્મુખૌ ॥ ૨૨॥

પાશપાણિઃ પરેશશ્ચ લાભેશો ધરણીધરઃ ।
મઙ્ગલેશશ્ચ મૂષકધ્વજ એતે પ્રકીર્તિતાઃ ॥ ૨૩॥

પશ્ચિમે દેવદેવેશાઃ પૂજનીયા વિધાનતઃ ।
અથોત્તરગતાન્ વક્ષ્યે ગણેશાન્ ભક્તપાલકાન્ ॥ ૨૪॥

મયૂરધ્વજસંજ્ઞશ્ચ રાજેશો વિઘ્નેશ્વરઃ ।
ઓઙ્કારેશો ગુણેશશ્ચ વરદઃ સિદ્ધિબુદ્ધિપઃ ॥ ૨૫॥

ગણેશશ્ચ ચતુર્બાહુસ્ત્રિનેત્રો ગજમસ્તકઃ ।
નિધિપો ગજકર્ણશ્ચ ચિન્તામણિવિભૂષણઃ ॥ ૨૬॥

એતે ગણેશ્વરાઃ પ્રોક્તાઃ પૂજનીયા મહેશ્વરાઃ ।
યાત્રાકારિણ એવૈતે દદતિ સ્વેપ્સિતં ફલમ્ ॥ ૨૭॥

અથ દેવાલયે દેવાઃ સ્થિતાં યાત્રાં વદામ્યહમ્ ।
મુખ્યાં સર્વાર્થદાં પૂર્ણાં યાત્રાકારિજનસ્ય ચ ॥ ૨૮॥

અયોધ્યા મથુરા ચૈવ દ્વારકા પૂર્વમન્દિરે ।
મહાવિષ્ણુસ્તતો દેવાઃ પૂજનીયો વિશેષતઃ ॥ ૨૯॥

કાશી માયા હ્યવન્તી ચ શિવઃ કૈલાસગસ્તતઃ ।
ગૌરી સ્કન્દો જનૈઃ પૂજ્યા દક્ષિણે મુખ્યભાવતઃ ॥ ૩૦॥

મહાકાલી મહાલક્ષ્મીર્મહાસરસ્વતી પરા ।
આદિશક્તિર્જનૈઃ પૂજ્યા પશ્ચિમે વિષ્ણુકાઞ્ચિકા ॥ ૩૧॥

વિધાતાગ્નિઃ કર્મજડભરતોઽથ દિવાકરઃ ।
શિવકાઞ્ચી જનૈઃ પૂજ્યા ઉત્તરે દેવમન્દિરે ॥ ૩૨॥

દેવાગારસ્ય દેવેશા રહસ્યં સમ્પ્રકાશિતમ્ ।
યાત્રાં કુર્યાન્નરસ્તેષાં સર્વસિદ્ધિપ્રદા ભવેત્ ॥ ૩૩॥

અથો મયૂરસંસ્થાનાં રહસ્યં કથયામ્યહમ્ ।
પુલહં ચ ભૃગું દેવાઃ ક્રતું સમ્પૂજેયન્નરઃ ॥ ૩૪॥

પૂર્વભાગે તથા યામ્યે વસિષ્ઠાત્રી પુલસ્ત્યકમ્ ।

પશ્ચિમે દક્ષમેવં તુ મરીચાઙ્ગિરસૌ તથા ॥ ૩૫॥

ઉત્તરે વસવોઽષ્ટૌ ચ કામધેનુશ્ચ દેવલઃ ।
અસિતઃ પૂજનીયાસ્તે જનૈઃ સર્વાર્થસિદ્ધયે ॥ ૩૬॥

એતદ્યાત્રાવિધાનં તુ સઙ્ક્ષેપેણ નિરૂપિતમ્ ।
સર્વસિદ્ધિપ્રદં દેવા જનેભ્યો યાત્રયા ભવેત્ ॥ ૩૭॥

ગચ્છધ્વં તત્ર દેવેશા મયૂરે ભક્તિસંયુતાઃ ।
ભજિષ્યથ ગણેશાનં તતઃ સર્વમવાપ્સ્યથ ॥ ૩૮॥

આદિશક્તિરુવાચ ।
એવમુક્ત્વા મહાયોગી ભૃશુણ્ડી વિરરામ હ ।
તસ્માદેકાક્ષરં ગૃહ્ય વિધિયુક્તં મહામનુમ્ ॥ ૩૯॥

પ્રણમ્યાપૂજ્ય યોગીશં તતઃ કૃત્વા પ્રદક્ષિણમ્ ।
યયુર્હર્ષયુતાઃ સર્વે દેવેન્દ્રાઃ પઞ્ચ મુખ્યકાઃ ॥ ૪૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે ભૃશુણ્ડિદેવેન્દ્રસંવાદસમાપ્તિવર્ણનં નામૈકોનત્રિંશત્તમોઽધ્યાયઃ ॥ ૬.૨૯
(Page ખં. ૬ અ. ૩૦ પાન ૮૮)

## ૬.૩૦ મયૂરેશક્ષેત્રમાહાત્મ્યસમાપ્તિવર્ણનં નામ ત્રિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

આદિશક્તિરુવાચ ।
તતો ભ્રાન્તા મહેશાના દદૃશુર્ન મયૂરકમ્ ।
સ્વાનન્દરૂપગં બ્રહ્મ સસ્મરુર્ગણનાયકમ્ ॥ ૧॥

ભૃશુણ્ડિનં હૃદિ ધ્યાત્વા પુપૂજુર્ગણપપ્રિયમ્ ।
તતો ગણેશ્વરં પૂજ્ય પ્રાર્થયામાસુરાદરાત્ ॥ ૨॥

દેવેશા ઊચુઃ ।
મયૂરં દર્શયસ્વાદ્ય ન જાનીમો વયં પરમ્ ।
અજ્ઞાનાવરણૈર્યુક્તાન્ રક્ષ નસ્તે પદાર્થિનઃ ॥ ૩॥

અકસ્માદ્ વેદમુખ્યાશ્ચ બભુઃ સાઙ્ગાઃ સમાગતાઃ ।
ગણેશશ્વાસસમ્ભૂતા દેવેશાન્ જ્ઞાનદાયિનઃ ॥ ૪॥

તાન્ દૃષ્ટ્વા તેજસા પુઞ્જયુક્તાંસ્તે દેવસત્તમાઃ ।
પ્રણમ્ય વેદાન્ પપ્રચ્છુઃ કે યૂયં વદત પ્રિયાઃ ॥ ૫॥

અજ્ઞાનાવરણૈર્યુક્તા ગણેશસ્મરણે રતાઃ ।
વયં તત્ર ભવન્તોઽપિ પ્રેષિતા ગણપેન કિમ્ ॥ ૬॥

વેદા ઊચુઃ ।
વેદા વયં મહેશાનાઃ સાઙ્ગા અત્ર સમાગતાઃ ।
કિમર્થં દુઃખસંયુક્તા ભવન્તો વદત પ્રિયાઃ ॥ ૭॥

તતઃ સર્વં જગુર્દેવા વૃત્તાન્તં પૂર્વસમ્ભવમ્ ।
તચ્છ્રુત્વા વેદમુખ્યાસ્તાન્ મયૂરં તદદર્શયન્ ॥ ૮॥

તતો બ્રહ્મમયં ક્ષેત્રં દૃષ્ટ્વા જ્યોતિર્મયં પરમ્ ।
પ્રણેમુસ્તે તતઃ સર્વે પ્રવેશં ચક્રુરાદરાત્ ॥ ૯॥

વિધિયુક્તં પ્રચક્રુસ્તે દેવેશા વેદસંયુતાઃ ।
તતો વેદાજ્ઞયા હૃષ્ટાઃ સ્થાપયન્તિ સ્મ મૂર્તિકામ્ ॥ ૧૦॥

સમ્પૂજ્ય ધ્યાનનિષ્ઠાસ્તે જેપુર્મન્ત્રં વિધાનતઃ ।
નિરાહારેણ વિઘ્નેશં તોષયન્તિ સ્મ દેવપાઃ ॥ ૧૧॥

યસ્મિન્ કાલે ચ દેવેશૈઃ સ્થાપિતા મૂર્તિરુત્તમા ।
ભાદ્રશુક્લચતુર્થી સા તદા માધ્યાહ્નગાઽભવત્ ॥ ૧૨॥

સોમવાસરસંયોગઃ સ્વાતીનક્ષત્રકં મહત્ ।
દૈવયોગેન કાલશ્ચ સમ્પ્રાપ્તઃ શક્તયઃ પરઃ ॥ ૧૩॥

શક્તય ઊચુઃ ।
સૃષ્ટિહીનં તદા દેવિ કથં માસાદિકં બભૌ ।
એતત્ કુતૂહલં બ્રૂહિ સંશયચ્છેદનાય નઃ ॥ ૧૪॥

આદિશક્તિરુવાચ ।
દૃશ્યભાવાત્મકઃ કાલો નશ્યતિ સ્મ યુગે યુગે ।
સદૈવ બ્રહ્મણિ સર્વં બ્રહ્માકારં પ્રવર્તતે ॥ ૧૫॥

કાલમાનેન વિઘ્નેશો યોગનિદ્રાપરોઽભવત્ ।
તથા નિદ્રાવિહીનઃ સ ચકાર સૃષ્ટિમુત્તમામ્ ॥ ૧૬॥

બ્રહ્મણિ બ્રહ્મરૂપઃ સ કાલસ્તત્ર સમાસ્થિતઃ ।

અજ્ઞાનેન જનાનાં ચેત્તસ્ય સંસેવનં ભવેત્ ॥ ૧૭॥

તેન સિદ્ધિયુતાઃ સર્વે ભવન્તિ સ્મ ન સંશયઃ ।
જ્ઞાનતોઽજ્ઞાનતો વાઽપિ યથા વહ્નિકણો દહેત્ ॥ ૧૮॥

માઘે શુક્લચતુર્થ્યાં સ ગણેશો વરદોઽભવત્ ।
અઙ્ગારકયુતાયાં તુ મૂર્તિમધ્યાદ્વિનિર્યયૌ ॥ ૧૯॥

દૃષ્ટ્વા ચતુર્ભુજં ઢુણ્ઢિં મયૂરોપરિ સંસ્થિતમ્ ।
સિદ્ધિબુદ્ધિસમાયુક્તં ભાલચન્દ્રં મહોદરમ્ ॥ ૨૦॥

ત્રિનેત્રં શેષનાભિં ચ ચિન્તામણિધરં પરમ્ ।
શૂર્પકર્ણં ગજાસ્યં ચ એકદન્તવિરાજિતમ્ ॥ ૨૧॥

પાશાઙ્કુશરદૈર્યુક્તમભયં દધતં પ્રભુમ્ ।
ભૂષણૈર્ભૂષિતં વસ્ત્રૈ રાજિતં દદૃશુઃ પરમ્ ॥ ૨૨॥

તત ઉત્થાય દેવેશા મયા યુક્તાઃ પ્રણમ્ય તમ્ ।
પુપૂજુસ્તુષ્ટુવુશ્ચૈવ પ્રહૃષ્ટમનસોઽભવન્ ॥ ૨૩॥

બ્રહ્માદ્યા ઊચુઃ ।
અનાદિરૂપં મયૂરોપરિસ્થં નિજસ્ય નાથં સકલાવભાસમ્ ।
મનોવચોહીનમનોવચઃસ્થં નમામહે તં ગણનાથમીડ્યમ્ ॥ ૨૪॥

અજં પુરાણં સકલાદિપૂજ્યં પરેશમાનન્દપ્રદં હૃદિસ્થમ્ ।
ચતુઃપ્રચાલં પરમાર્થભૂતં નમામહે તં ગણનાથમીડ્યમ્ ॥ ૨૫॥

(Page ખં. ૬ અ. ૩૦ પાન ૮૯)
જગત્ સ્વકોત્થાનબલેન સૃષ્ટ્વા સ્વબોધગં યં જગતીશસંસ્થમ્ ।
વિદેહભાવેન સદાત્મસંસ્થં નમામહે તં ગણનાથમીડ્યમ્ ॥ ૨૬॥

તયોર્વિહીનં સ્વસુખે પ્રલીનં નિજાત્મગં યોગધરં સ્વધીસ્થમ્ ।
અયોગરૂપેણ નિવૃત્તિસંસ્થં નમામહે તં ગણનાથમીડ્યમ્ ॥ ૨૭॥

પ્રભું સ્વભક્તસ્ય સુશાન્તિકારં સુશાન્તિગં યં ગજવક્ત્રધારમ્ ।
ચતુર્ભુજં હ્યેકરદં ત્રિનેત્રં નમામહે તં ગણનાથમીડ્યમ્ ॥ ૨૮॥

મહોદરં પાશધરં સુસિદ્ધિપ્રદં વિભું બીજમમોઘવીર્યમ્ ।
પરાત્પરં શૂર્પશ્રુતિં ગણેશં નમામહે તં ગણનાથમીડ્યમ્ ॥ ૨૯॥

નમસ્તે સૃષ્ટિકર્ત્રે તે બ્રહ્મણે પાલકાય ચ ।

વિષ્ણવે શમ્ભવે તુભ્યં સંહર્ત્રે વૈ નમો નમઃ ॥ ૩૦॥

અનાથાનાં પ્રણાથાય શક્તયે મોહધારિણે ।
કર્મણે ભાનવે ચૈવ હેરમ્બાય નમો નમઃ ॥ ૩૧॥

મયૂરેશાય દેવાય મયૂરધ્વજધારિણે ।
વિઘ્નેશાય મહાવિઘ્નચાલકાય નમો નમઃ ॥ ૩૨॥

કિં સ્તુમસ્ત્વાં ગણેશાન બ્રહ્મણાં બ્રહ્મરૂપિણમ્ ।
યત્ર દેવાદયઃ શાન્તિં ગચ્છન્તિ સ્મ નિરન્તરમ્ ॥ ૩૩॥

અતો નમામહે નાથ તેન તુષ્ટો ભવસ્વ ચ ।
ભક્તાન્ રક્ષ મહાભક્તિપ્રિય વિઘ્નેશ આદરાત્ ॥ ૩૪॥

એવમુક્ત્વા પ્રણેમુસ્તે ગણેશં ભક્તિસંયુતાઃ ।
સાશ્રુનેત્રાઃ સરોમાઞ્ચાસ્તાનુત્થાપ્ય જગાદ સઃ ॥ ૩૫॥

શ્રીગણેશ ઉવાચ ।
ભવત્કૃતમિદં સ્તોત્રં સર્વદં પ્રભવિષ્યતિ ।
પઠતાં શ‍ૃણ્વતાં દેવા સર્વં દાસ્યામિ વાઞ્છિતમ્ ॥ ૩૬॥

વરં બ્રૂત વિશેષેણ દાસ્યામિ મનસીપ્સિતમ્ ।
તપસા સ્થાપનેનૈવ હ્યહં સ્તોત્રેણ તોષિતઃ ॥ ૩૭॥

દેવેશા ઊચુઃ ।
યદિ વિઘ્નેશ સન્તુષ્ટો વરં દાસ્યસિ વાઞ્છિતમ્ ।
તદા તે પાદપદ્મે નો ભક્તિરસ્તુ નિરન્તરમ્ ॥ ૩૮॥

અન્યચ્ચાસ્માભિરાનન્દાત્ કરણીયં કિમપ્યહો ।
કાર્યં બ્રૂહિ ગણાધીશ કરિષ્યામો જવાન્વિતાઃ ॥ ૩૯॥

શ્રીગણેશ ઉવાચ ।
ચતુર્મુખ રજોયુક્તઃ સૃષ્ટિં કુરુ મદાજ્ઞયા ।
બ્રહ્મા નામ્ના ભવસ્વ ત્વં માં સ્મૃત્વાઽહંવિવર્જિતઃ ॥ ૪૦॥

વિષ્ણુશ્ચતુર્ભુજઃ સત્વયુક્તોઽસિ કુરુ પાલનમ્ ।
નાનાવતારભૃન્નિત્યં માં સ્મૃત્વા સિદ્ધિમેષ્યસિ ॥ ૪૧॥

તમોયુક્તઃ પઞ્ચમુખ તેન ત્વં સંહરસ્વ ચ ।
માં સ્મૃત્વા બન્ધહીનશ્ચ ભવિષ્યસિ હરો ભવ ॥ ૪૨॥

ચતુર્ભુજે ક્રિયાયુક્તા ત્વં તતો મોહયસ્વ ચ ।
નાનાભેદવિભાગેન માં સ્મૃત્વા સિદ્ધિમેષ્યસિ ॥ ૪૩॥

નામ્ના શક્તિર્ભવસ્વ ત્વં સર્વશક્તિયુતેઽનઘે ।
સહસ્રકરસૂર્યસ્ત્વં ભવ નામ્ના મહામતે ॥ ૪૪॥

કર્માધારસ્વરૂપેણ ધારયસ્વ ચરાચરમ્ ।
માં સ્મૃત્વા બન્ધહીનોઽપિ ભવિષ્યસિ ન સંશયઃ ॥ ૪૫॥

એવમુક્ત્વા ગણાધીશો દદૌ તેભ્યો વિશેષતઃ ।
સઙ્કલ્પસિદ્ધિજં દેવ્યઃ સામર્થ્યં વિવિધં તથા ॥ ૪૬॥

શક્તયો નગરાણ્યેવાયુધાનિ વહનાદિકમ્ ।
નિર્માયાંઽતર્દધે સદ્યો મૂર્તિસંસ્થો બભૂવ હ ॥ ૪૭॥

દેવાઃ સ્વસ્વપદે ગત્વા ચક્રુઃ સર્વં જગત્તતઃ ।
ચરાચરં યથાભાગમાશ્રિત્ય કિલ રેમિરે ॥ ૪૮॥

તત્ર યે મુખ્યરૂપાશ્ચ પ્રજાપતિમુખોદ્ભવાઃ ।
અપ્રેષયન્ મહેશાસ્તાન્ મયૂરેશહિતાય ચ ॥ ૪૯॥

(Page ખં. ૬ અ. ૩૦ પાન ૯૦)
તે ગણેશં સમારાધ્ય મયૂરે વરસંયુતાઃ ।
સ્વસ્વવ્યાપારસંયુક્તા બભૂવુઃ સ્વપદે રતાઃ ॥ ૫૦॥

એવં ક્રમેણ સર્વે તુ ચરાચરમયા મુખાઃ ।
મયૂરેશં સમારાધ્ય સત્તાયુક્તા બભૂવિરે ॥ ૫૧॥

તતઃ સર્વાંશભાવેન મયૂરેશં સિષેવિરે ।
ક્ષેત્રવાસપરા દેવ્યઃ કથિતં સર્વમઞ્જસા ॥ ૫૨॥

શઙ્કરેણ તપસ્તપ્તં પુનસ્તત્ર મયૂરકે ।
ગણેશવરદાનેન મહાદેવો બભૂવ હ ॥ ૫૩॥

ઇદં મયૂરક્ષેત્રસ્ય માહાત્મ્યં કથિતં મયા ।
સઙ્ક્ષેપેણ મહાદેવ્યઃ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૫૪॥

શ ृણુયાદ્યો નરો ભક્ત્યા શ્રાવયેદ્યઃ પઠેત્તથા ।
ધર્માર્થકામમોક્ષાંશ્ચ ભુક્ત્વા બ્રહ્મમયો ભવેત્ ॥ ૫૫॥

નાનેન સદૃશં કિઞ્ચિત્ પાવનં ત્રિષુ વર્તતે ।

વેદશાસ્ત્રપુરાણેષુ સારાત્ સારતમં મતમ્ ॥ ૫૬॥

પુત્રપૌત્રયુતશ્ચાત્ર ધનધાન્યસમન્વિતઃ ।
સુહૃદ્ભિઃ સંયુતઃ સોઽપિ મોદતે સુખદાયકઃ ॥ ૫૭॥

અન્તે સ્વાનન્દવાસી તુ ભૂત્વા બ્રહ્મમયો ભવેત્ ।
અસ્ય શ્રવણમાત્રેણ નરઃ સર્વમવાપ્નુયાત્ ॥ ૫૮॥

અપુત્રો યો લભેત્ પુત્રાન્ ગુણયુક્તાંસ્તુ શક્તયઃ ।
મયૂરસ્યૈવ શ્રવણાત્ દુર્લભં ન ભવિષ્યતિ ॥ ૫૯॥

વ્રતાનિ સર્વભાવેન યઃ કરોતિ નરોત્તમઃ ।
તેભ્યઃ શતાધિકં પુણ્યમસ્ય શ્રવણતો લભેત્ ॥ ૬૦॥

તીર્થાનિ ક્ષેત્રમુખ્યાનિ સેવન્તે ધર્મસંયુતાઃ ।
તેભ્યઃ શતાધિકં પુણ્યમસ્ય શ્રવણતો લભેત્ ॥ ૬૧॥

દાનાનિ સર્વયજ્ઞાંશ્ચ યઃ કરોતિ વિધાનતઃ ।
તેભ્યઃ શતાધિકં પુણ્યમસ્ય શ્રવણતો લભેત્ ॥ ૬૨॥

વેદશાસ્ત્રપુરાણાનિ શ્રુત્વા યત્ પ્રાપ્નુયાત્ ફલમ્ ।
તસ્માચ્છતાધિકં પુણ્યમસ્ય શ્રવણતો લભેત્ ॥ ૬૩॥

બહુનાઽત્ર કિમુક્તેન નાનેન સદૃશં પરમ્ ।
કિઞ્ચિત્ સાધનકં પ્રોક્તં સત્યં સત્યં વદામ્યહમ્ ॥ ૬૪॥

યત્ર બ્રહ્મપતિઃ સાક્ષાત્ ક્ષેત્રં સ્વાનન્દવાચકમ્ ।
કમણ્ડલુર્નદી તસ્ય સામ્યં કિં ભવતીત્યહો ॥ ૬૫॥

બ્રહ્મભૂયકરં પ્રોક્તં વેદાદિષુ ઇદં કિલ ।
તેન કિં શક્તયઃ કુત્ર સમતાં લભતે પરમ્ ॥ ૬૬॥

નિત્યં ભક્તિયુતો જન્તુર્માહાત્મ્યં યઃ પઠિષ્યતિ ।
સ ગણેશો ન સન્દેહો દર્શનાદ્ દુઃખહારકઃ ॥ ૬૭॥

અથવા શુક્લકૃષ્ણાયાં ચતુર્થ્યાં નિયતઃ પઠેત્ ।
સોઽપિ દર્શનમાત્રેણ પવિત્રાન્ કુરુતે નરાન્ ॥ ૬૮॥

સંસ્કારહીનભાવેન નરો નેદં કદાચન ।
શ ૃણુયાચ્ચ પઠેદ્વાઽપિ સદા પાપૈઃ સ વઞ્ચિતઃ ॥ ૬૯॥

નહિ શ્રાવયિતવ્યં તદ્ ભક્તિહીનાય વિદ્વિષે ।
શઠાય પાપયુક્તાય પાખણ્ડનિરતાય ચ ॥ ૭૦॥

યદિ વિઘ્નેશ્વરં સર્વે ભાવયુક્તા ભજન્તિ ચેત્ ।
તદા જન્મધરાઃ કે વૈ ભવન્તે વિઘ્નસંયુતાઃ ॥ ૭૧॥

અતઃ પાત્રં પ્રદૃશ્ય શ્રાવયિતવ્યં વિશેષતઃ ।
ભક્તિયુક્તઃ સ નિન્દાં તુ ન કરિષ્યતિ સેવિતુમ્ ॥ ૭૨॥

સર્વસારં મયા પ્રોક્તં દેવ્યઃ સર્વપદં પરમ્ ।
તત્ર ગત્વા ગણેશાનં સેવધ્વં ભક્તિસંયુતાઃ ॥ ૭૩॥

દેહધારણકસ્યૈવ સાર્થકં વસ્તદા ભવેત્ ।
નો ચેત્ પતિતતુલ્યશ્ચ દેહો વશ્ચ ન સંશયઃ ॥ ૭૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે મયૂરેશક્ષેત્રમાહાત્મ્યસમાપ્તિવર્ણનં નામ ત્રિંશત્તમોઽધ્યાયઃ ॥ ૬.૩૦
(Page ખં. ૬ અ. ૩૧ પાન ૯૧)

## ૬.૩૧ વિકટપ્રાદુર્ભાવો નામ એકત્રિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શક્તય ઊચુઃ ।
અહો ભાગ્યબલેનૈવ સંશ્રુતં જગદમ્બિકે ।
મયૂરક્ષેત્રમાહાત્મ્યં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૧॥

અધુના વદ દેવેશિ મુદ્ગલેનોપદેશિતાઃ ।
શિવાદ્યાઃ કિં સમાચક્રુઃ કામાસુરભયાર્દિતાઃ ॥ ૨॥

આદિશક્તિરુવાચ ।
ગતે મુનૌ મહાભાગે મુદ્ગલે યોગિનાં ગુરૌ ।
તં પ્રણમ્ય શિવાદ્યાસ્તે યયુઃ ક્ષેત્રં મયૂરકમ્ ॥ ૩॥

યથાશાસ્ત્રં વિધાનેન યાત્રાં ચક્રુઃ સુરર્ષયઃ ।
તતસ્તપોયુતાઃ સર્વે ગણેશમભજન્ પુરા ॥ ૪॥

એકાક્ષરવિધાનેનાતોષયંસ્તે વિનાયકમ્ ।
તતસ્તાન્ વરદો ઢુણ્ઢિવેષેણૈવ સમાયયૌ ॥ ૫॥

મયૂરોપરિસંસ્થં તં દૃષ્ટ્વા વિઘ્નેશ્વરં પુરઃ ।
દેવર્ષયઃ સમુત્થાય પ્રણેમુર્હર્ષસંયુતાઃ ॥ ૬॥

પ્રણમ્ય પરયા ભક્ત્યા પુપૂજુર્વિઘ્નપં પુનઃ ।
તુષ્ટુવુર્વિષ્ણુમુખ્યાસ્તં કૃતાઞ્જલિપુટાઽમરાઃ ॥ ૭॥

દેવર્ષય ઊચુઃ ।
નમસ્તેઽસ્તુ મયૂરેશ સર્વસિદ્ધિપ્રદાયક ।
જ્ઞાનદાત્રે સ્વભક્તેભ્યઃ પાલકાય નમો નમઃ ॥ ૮॥

સ્વાનન્દવાસિને તુભ્યં પરાત્પરતરાય ચ ।
ઢુણ્ઢિરાજાય સર્વેષાં માત્રે પિત્રે નમો નમઃ ॥ ૯॥

અનાદયે ચ સર્વેષાં પૂજ્યાય પરમાત્મને ।
અનન્તાનનધારાયાનન્તરૂપાય તે નમઃ ॥ ૧૦॥

સિદ્ધિબુદ્ધિપ્રદાત્રે તે સિદ્ધિબુદ્ધિવરાય ચ ।
જ્યેષ્ઠરાજાય જ્યેષ્ઠેભ્યો વરદાય નમો નમઃ ॥ ૧૧॥

ત્રિનેત્રાય ચતુર્બાહુધરાય કઞ્જપાણયે ।
મહોદરાય સર્પેશનાભયે તે નમો નમઃ ॥ ૧૨॥

માયાશ્રયાય માયાયાશ્ચાલકાય વિલાસિને ।
બ્રહ્મણાં બ્રહ્મરૂપાય ગણેશાય નમો નમઃ ॥ ૧૩॥

એકદન્તાય સર્વાદિપૂજ્યાય સર્વમૂર્તયે ।
શૂર્પકર્ણાય યોગાય શાન્તિદાય નમો નમઃ ॥ ૧૪॥

પૂર્વાઙ્ગે વિષ્ણુરૂપાય દક્ષિણે શઙ્કરાત્મને ।
પશ્ચિમે શક્તિદેહાયોત્તરે તે ભાનવે નમઃ ॥ ૧૫॥

કિં સ્તુવીમો મયૂરેશં યત્ર વેદાશ્ચ યોગિનઃ ।
શાન્તિં પ્રાપ્તા વિશેષેણ દેવદેવેશ તે નમઃ ॥ ૧૬॥

ચિત્તં પઞ્ચવિધં દેવ તત્ર માયા ભ્રમાત્મિકા ।
ચિત્રા મયૂરસંજ્ઞા ચ નમસ્તત્ સ્વામિને નમઃ ॥ ૧૭॥

માયા મયૂરવાચ્યા તુ તત્ર ખેલકરો ભવાન્ ।
મયૂરેશ ઇતિ ખ્યાતઃ સાક્ષાદ્ દૃષ્ટો ન સંશયઃ ॥ ૧૮॥

જન્મ ધન્યં વયો વિદ્યા તપો જ્ઞાનાદિકં પરમ્ ।

તવાઙ્ઘ્રિદર્શનાન્નાથ કૃતકૃત્યા ભવામહે ॥ ૧૯॥

એવં તં નનૃતુઃ સ્તુત્વા ભક્ત્યા સાશ્રુવિલોચનાઃ ।
સરોમાઞ્ચા મયૂરેશ જયેતિ હ્યબ્રુવન્ પ્રભુમ્ ॥ ૨૦॥

જગાદ ગણનાથશ્ચ તતસ્તાન્ ભક્તિભાવિતઃ ।
વરાન્ વૃણુત દાસ્યામિ દેવેશા ભક્તિયન્ત્રિતઃ ॥ ૨૧॥

ભવદ્ભિર્યત્ કૃતં સ્તોત્રં મદીયં સર્વસિદ્ધિદમ્ ।
ભવિષ્યતિ સદા ભક્તિદાયકં પઠતે પરમ્ ॥ ૨૨॥

યં યમિચ્છતિ તં તં તુ દાસ્યામિ હર્ષસંયુતઃ ।
પઠેદ્વા શ ૃણુયાચ્ચેદ્વા મત્પ્રિયઃ સ નરો ભવેત્ ॥ ૨૩॥

દેવેશાદ્યા ઊચુઃ ।
પ્રસન્નોઽસિ ગણાધ્યક્ષ તદા ભક્તિં ત્વદીયિકામ્ ।
દેહિ કામાસુરં નાથ જહિ સર્વભયઙ્કરમ્ ॥ ૨૪॥

સ્થાનભ્રષ્ટાઃ સુરશ્રેષ્ઠાઃ કર્મભ્રષ્ટા મુનીશ્વરાઃ ।
કૃતાસ્તેનાસુરેણૈવાતસ્તં જહિ ગજાનન ॥ ૨૫॥

તથેતિ ગણનાથસ્તાનુક્ત્વાઽન્તર્ધાનમકરોત્ ।
(Page ખં. ૬ અ. ૩૧ પાન ૯૨)
દેવા હર્ષયુતાઃ સર્વે જગ્મુર્ગિરિગુહાન્તરે ॥ ૨૬॥

ગણેશં ભજમાનાસ્તે મુનયો દેવનાયકાઃ ।
કાલાકાઙ્ક્ષિણ આનન્દાદ્બભૂવુઃ શક્તિમુખ્યકાઃ ॥ ૨૭॥

અથ કામાસુરઃ ક્વાપિ સભાયાં સંસ્થિતોઽભવત્ ।
તત્રાકાશભવાં વાણીં શુશ્રાવ ભયદાયિનીમ્ ॥ ૨૮॥

દેવૈઃ સમ્પ્રાર્થિતં બ્રહ્મ મયૂરેશ્વરસંજ્ઞિતમ્ ।
હત્વા ત્વામખિલં વિશ્વં સુખયુક્તં કરિષ્યતિ ॥ ૨૯॥

તતો મુમૂર્ચ્છ તસ્માત્ સ કામાસુરો ભયાતુરઃ ।
શ્રુત્વા વાચં મહાક્રૂરાં દૈત્યેશાસ્તં સમાયયુઃ ॥ ૩૦॥

મહાયત્નેન દૈત્યેશાઃ સાવધાનં મહાસુરમ્ ।
ચક્રુઃ સ તાનુવાચેદં વચનં ખસમુદ્ભવમ્ ॥ ૩૧॥

તચ્છ્રુત્વા ક્રોધસંયુક્તા દૈત્યેશાસ્તમથાઽબ્રુવન્ ।

દેવાઃ શત્રવ આદ્યાશ્ચાસ્માકં નિત્યં શ્રુતેર્મુખાત્ ॥ ૩૨॥

અસ્માભિઃ કથિતં સ્વામિન્ જહિ દેવાન્ મહામતે ।
મુક્તેસ્ત્વયા સુરેશાનૈસ્તૈરિદં દારુણં કૃતમ્ ॥ ૩૩॥

ઉત્પત્તિસ્થિતિસંહારકારકેભ્યો મહાપ્રભો ।
તદ્ભવેભ્યો ભયં તે ન કિં કરિષ્યતિ દેવપઃ ॥ ૩૪॥

આજ્ઞાપય મહાભાગાસ્માન્ દેવહનનાય વૈ ।
મૃતા દેવા યદા નાથ નિઃસપત્ના વયં તદા ॥ ૩૫॥

તતઃ કામાસુરસ્તાનાજ્ઞાપયદ્દેવકદને ।
કુમ્ભકર્ણાદયો જગ્મુર્ગિરિકન્દરકાનને ॥ ૩૬॥

તતો મેરુગુહાસંસ્થાન્ દૃષ્ટ્વા દેવર્ષિસત્તમાન્ ।
શસ્ત્રાણિ દૈત્યાસ્તાન્ હન્તું તત્યજુર્દૈત્યનાયકાઃ ॥ ૩૭॥

શિવમુખ્યા મયૂરેશં સસ્મરુર્ભયસઙ્કુલાઃ ।
એહિ નાથ દયાસિન્ધો રક્ષ નો ભયસંયુતાન્ ॥ ૩૮॥

સ્મૃતિમાત્રેણ હેરમ્બસ્તાન્ યયૌ મૂષકધ્વજઃ ।
મયૂરોપરિસંસ્થશ્ચ શસ્ત્રધારક આદરાત્ ॥ ૩૯॥

તેજોરાશિમયં રૂપં દૃષ્ટ્વા દેવા વિસિસ્મિરે ।
તુષ્ટુવુસ્તં મહેશાના નાનાસ્તોત્રૈર્ગજાનનમ્ ॥ ૪૦॥

તતસ્તેજોમયં રૂપં તાન્ જગાદ સુરર્ષિકાન્ ।
વિકટોઽહં મહાભાગાસ્તથા ભજત માં ચિરમ્ ॥ ૪૧॥

કામયુક્તા મયા માયા મયૂરા વિવિધાત્મિકા ।
કામહીનોઽયમેવાહં ભજધ્વં કામહાનતઃ ॥ ૪૨॥

માયાસુખાચ્ચ દેવેશા વિકટા ભવત પ્રિયાઃ ।
તદા મે રૂપકં દ્રષ્ટું ભવિષ્યથ સમર્થકાઃ ॥ ૪૩॥

તસ્ય તદ્વચનં શ્રુત્વા શોકયુક્તાઃ સુરર્ષયઃ ।
બલેન ચિત્તમાગૃહ્ય નિઃકામં ચક્રુરાદરાત્ ॥ ૪૪॥

તતો ગણેશ્વરં દેવા મુનયો દદૃશુશ્ચ તે ।
તં પ્રણમ્ય સ્થિતાઃ સર્વે દૈત્યશસ્ત્રૈઃ પ્રપીડિતાઃ ॥ ૪૫॥

તતોઽતિક્રોધસંયુક્તો વિકટસ્તાનુવાચ હ ।
ભયહીના મદીયેન દર્શનેન ભવેત વૈ ॥ ૪૬॥

અધુના શસ્ત્રસંયુક્તા યુધ્યધ્વં મે હ્યનુગ્રહાત્ ।
કામાસુરં હનિષ્યામિ આગતં તં મહેશ્વરાઃ ॥ ૪૭॥

તતસ્તે ક્રોધસંયુક્તા દેવેન્દ્રાઃ શસ્ત્રપાણયઃ ।
યુયુધુર્દૈત્યમુખ્યૈશ્ચ તેજોયુક્તા વિશેષતઃ ॥ ૪૮॥

ઇન્દ્રેણ સહસાઽઽગત્ય વજ્રેણ નિહતોઽપતત્ ।
કુમ્ભકર્ણસ્તતો દૈત્યા પ્રપેલુર્ભયસઙ્કુલાઃ ॥ ૪૯॥

દ્વિમુહૂર્તે ગતે દેવ્યો રાક્ષસેશઃ પ્રતાપવાન્ ।
(Page  ખં. ૬ અ. ૩૨ પાન ૯૩)
સાવધાનો બભૂવાઽપિ પપાલ ભયસઙ્કુલઃ ॥ ૫૦॥

જયયુક્તા મહેશાનાઃ પ્રણેમુર્વિકટં તતઃ ।
જયશબ્દેન સર્વેશં તુષ્ટુવુર્હર્ષસંયુતાઃ ॥ ૫૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે વિકટપ્રાદુર્ભાવો નામ એકત્રિંશત્તમોઽધ્યાયઃ ॥ ૬.૩૧

## ૬.૩૨ દેવદૈત્યસમાગમો નામ દ્વાત્રિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શક્તય ઊચુઃ ।
કામાસુરવધાર્થાય ભક્તિયુક્તા ગજાનનમ્ ।
દેવર્ષયઃ પ્રાર્થયન્તો નિઃકામાઃ કથમપ્યહો ॥ ૧॥

આદિશક્તિરુવાચ ।
અથો સકામનિઃકામમાર્ગં વક્ષ્યામિ શક્તયઃ ।
શ‌ૃણુધ્વં ભાવસંયુક્તાઃ સંશયચ્છેદનાય તમ્ ॥ ૨॥

સ્વદેહપોષણાદ્યર્થં યશોર્થં ભાવસંયુતાઃ ।
ભજન્તે કામસંયુક્તા દેવં જાનીત તાન્નરાન્ ॥ ૩॥

સ્વસ્વધર્મપ્રસિદ્ધ્યર્થં દેવસેવાર્થમેવ યે ।
નિઃકામાસ્તે ભજન્તે તં દેવં ભાવસમન્વિતાઃ ॥ ૪॥

નિઃકામિકા કૃતા ભક્તિર્દેવેશૈઃ શ઼ૃણુત પ્રિયાઃ ।
તસ્યાશ્ચિહ્નં પ્રવક્ષ્યામિ ભવતી હિતકામ્યયા ॥ ૫॥

સૃષ્ટિસ્થિતિલયાદ્યર્થં નિર્મિતા વિધિમુખ્યકાઃ ।
વયં તદેવ સેવા તે ખેલસિ ત્વં ગજાનન ॥ ૬॥

હૃદિ સ્થિત્વા ચ સર્વેષાં ભોગાંસ્ત્વં દોષવર્જિતઃ ।
ભુઙ્ક્ષે તેન ગણેશાન સેવા તે દેહપોષિકા ॥ ૭॥

તવ પ્રીત્યર્થમાનન્દાત્ પ્રકુર્મઃ સ્વસ્વધર્મજામ્ ।
ક્રિયાં સૃષ્ટ્યાદિકાં નાથ તદર્થં પ્રાર્થયામહે ॥ ૮॥

અધુના દૈત્યમુખ્યેન સેવા તે ખણ્ડિતા પરા ।
અસમર્થાશ્ચ તાં કર્તું રક્ષ નઃ સેવનોત્સુકાન્ ॥ ૯॥

એવં સમ્પ્રાર્થિતો દેવૈર્વિકટો નાત્ર સંશયઃ ।
દેહભોગાદિભાવેષુ યશઃ સ્વપ્ય સ્પૃહાત્મભિઃ ॥ ૧૦॥

સ્વધર્મસંયુતૈઃ સર્વૈઃ સ્વસ્વવ્યાપારજા ક્રિયા ।
કર્તવ્યા ઢુણ્ઢિપ્રીત્યર્થં નિઃકામા સા મતા કિલ ॥ ૧૧॥

અધુના પ્રકૃતં દેવ્યો મહચ્છૃણુત ચેષ્ટિતમ્ ।
વિકટસ્ય વિશેષેણ યેન ભક્તિઃ પ્રલભ્યતે ॥ ૧૨॥

કુમ્ભકર્ણાદયઃ સર્વે જગ્મુર્ભયસમન્વિતાઃ ।
કામાસુરં મહાવીર્યં વૃત્તાન્તં તં ન્યવેદયન્ ॥ ૧૩॥

મયૂરેશઃ સમાયાતો વિકટશ્ચેતિ કથ્યતે ।
દેવૈઃ સમ્પ્રાર્થિતો નાથ હનિષ્યતિ મહાસુરાન્ ॥ ૧૪॥

તસ્ય દૃષ્ટિનિપાતેન દેવાસ્તેજોયુતાઃ કૃતાઃ ।
વયં તેજોવિહીનાશ્ચ પશ્યાશ્ચર્યં મહામતે ॥ ૧૫॥

શરણં વિકટં ચૈવ શુભદં તે ભવિષ્યતિ ।
અન્યથાऽસુરસઙ્ઘાનાં વિનાશો નિશ્ચિતોऽધુના ॥ ૧૬॥

કુમ્ભકર્ણવચઃ શ્રુત્વા ક્રોધયુક્તો બલિશ્ચ તમ્ ।
નિર્ભર્ત્સ્ય પ્રત્યુવાચેદં વચનં સર્વસન્નિધૌ ॥ ૧૭॥

બલિરુવાચ ।
કિં ભ્રાન્તોऽસિ વિશેષેણ વદસે વિકલો યથા ।

કામાસુરસ્ય વેગં તુ સહતે કઃ સ્વરૂપધૃક્ ॥ ૧૮॥

(Page ખં. ૬ અ. ૩૩ પાન ૯૪)
બલેર્વચનમાકર્ણ્યાસુરઃ કામઃ પ્રતાપવાન્ ।
જગાદ દૈત્યમુખ્યાંશ્ચ હૃદયેન વિદૂયતા ॥ ૧૯॥

કામાસુર ઉવાચ ।
વાણી સત્યા બભૂવાપિ સ્વસ્થા મે શત્રુરાગતઃ ।
હનિષ્યામિ મરિષ્યામિ કિં વા તત્ર ભવિષ્યતિ ॥ ૨૦॥

કામાસુરવચઃ શ્રુત્વા દુર્મદસ્તત્ર ચાબ્રવીત્ ।
વચનં તેજસા યુક્તો વીર્યયુક્તં મહાસુરઃ ॥ ૨૧॥

દુર્મદ ઉવાચ ।
કુમ્ભકર્ણેન દૃષ્ટશ્ચ વિકટો નાત્ર સંશયઃ ।
ઉત્પત્તિનાશસંયુક્તો વિચારય મહામતે ॥ ૨૨॥

યદ્ દૃષ્ટં તત્પ્રણષ્ટં વૈ પશ્ય વેદે વિચક્ષણ ।
કથં ત્વાં સ મહારાજ હનિષ્યતિ વરૈર્યુતમ્ ॥ ૨૩॥

મા ચિન્તાં કુરુ રાજેન્દ્ર વધિષ્યામો વયં ચ તે ।
શત્રું તત્ર જયૈર્યુક્તા ભવિષ્યામો ન સંશયઃ ॥ ૨૪॥

અજ્ઞાપય મહાદૈત્યાસ્માંસ્તે પાદસ્ય કિઙ્કરાન્ ।
પશ્ય નો યત્ મહાવીર્યં દેવનાશકરં પરમ્ ॥ ૨૫॥

દેવૈર્માયા કૃતા ચેયં ખવાણી ભયરૂપિણી ।
માયયા તં વિનિર્માય ભયાર્થં દૈત્યરક્ષસામ્ ॥ ૨૬॥

નેયમાકાશવાણી વૈ વિચારય મહામતે ।
દેહધારી કથં ત્વાં સ હનિષ્યતિ મહાબલમ્ ॥ ૨૭॥

દુર્મદસ્ય વચઃ શ્રુત્વા બલિમુખ્યા મહાઽસુરાઃ ।
હર્ષયુક્તાઃ પુનસ્તં તે જગુઃ સત્યં ત્વયોદિતમ્ ॥ ૨૮॥

તતઃ કામાસુરશ્ચૈવ સન્નદ્ધઃ સર્વદૈત્યપૈઃ ।
ચતુરઙ્ગબલૈર્યુક્તૈર્નિર્જગામ ગજાનનમ્ ॥ ૨૯॥

તતઃ શુક્રેણ દૈત્યેન્દ્રો બોધિતો બહુલોક્તિભિઃ ।
ન બુબોધ મદોત્સિક્તો બલગર્વેણ મોહિતઃ ॥ ૩૦॥

ભાવિનં મુનિમુખ્યશ્ચ જ્ઞાત્વા કાવ્યો મહાયશાઃ ।
કાલવેગં સમાશ્રિત્ય પ્રયયૌ તમનુ પ્રભુઃ ॥ ૩૧॥

દૈત્યાઃ ક્રોધયુતાઃ સર્વે સમાજગ્મુઃ પ્રહર્ષિતાઃ ।
દેવમર્દનકામાર્થં યત્ર દેવાઃ સ્થિતાઃ પુરા ॥ ૩૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે દેવદૈત્યસમાગમો નામ દ્વાત્રિંશત્તમોઽધ્યાયઃ ॥ ૬.૩૨

## ૬.૩૩ કામાસુરપુત્રવધો નામ ત્રયસ્ત્રિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

આદિશક્તિરુવાચ ।
સમાગતં મહત્ સૈન્યં નાનાશસ્ત્રવિરાજિતમ્ ।
અપારં તત્ સમાલોક્ય દેવેશા ગણપં યયુઃ ॥ ૧॥

દેવેશા ઊચુઃ ।
કામાસુરઃ સ્વયં સાક્ષાદાગતઃ સ મહાબલઃ ।
યસ્યાગ્રે દેવદેવેશા મશકા ઇવ સમ્બભુઃ ॥ ૨॥

યસ્ય શસ્ત્રબલં સ્વામિન્નમોઘં સર્વદા બભૌ ।
ન બલે સદૃશસ્તસ્ય સોઽયં કામઃ સમાગતઃ ॥ ૩॥

રક્ષ નઃ કામસન્ત્રસ્તાન્નોચેત્ કામઃ પ્રતાપવાન્ ।
દેવર્ષીણાં ગણેશાન જીવગ્રાહં કરિષ્યતિ ॥ ૪॥

તેષાં વચનમાકર્ણ્ય તાન્ જગાદ ગજાનનઃ ।
મા ભયં કુરુત પ્રાજ્ઞા હનિષ્યામિ મહાસુરમ્ ॥ ૫॥

(Page  ખં. ૬ અ. ૩૩ પાન ૯૫)
મદનુગ્રહતઃ સર્વે સમર્થા દેવનાયકાઃ ।
ભવિષ્યથ ન સન્દેહો યુધ્યધ્વં દાનવૈઃ સહ ॥ ૬॥

વિકટસ્ય વચઃ શ્રુત્વા દેવા હર્ષસમન્વિતાઃ ।
જગર્જુઃ શસ્ત્રસંયુક્તા ભયહીનાશ્ચ શક્તયઃ ॥ ૭॥

તેષાં ગર્જિતશબ્દેન વ્યાપ્તં સર્વં દિગન્તરમ્ ।
દૈત્યા ભયયુતાઃ સર્વે બભૂવુર્યે સમાગતાઃ ॥ ૮॥

તતઃ ક્રોધસમાવિષ્ટા દૈત્યેશા બલિમુખ્યકાઃ ।
જગર્જુઃ સિંહનાદૈશ્ચ શઙ્ખનાદૈઃ સમન્તતઃ ॥ ૯॥

તતો દૈત્યગણાઃ સર્વે મુમુચુઃ શસ્ત્રપાણયઃ ।
શસ્ત્રવૃષ્ટિં મહોગ્રાં ચ મેઘા ઇવ શિલોચ્ચયે ॥ ૧૦॥

તતો દેવાઃ સ્વશસ્ત્રૈસ્તાન્નિવાર્ય યુયુધુઃ પરમ્ ।
દૈત્યા દેવા મહોગ્રાશ્ચ યુયુધુસ્તે પરસ્પરમ્ ॥ ૧૧॥

નાઽભૂત્ સ્વપરબોધોઽપિ રજસા છાદિતે રવૌ ।
જઘ્નુઃ પરસ્પરં દેવ્યઃ શસ્ત્રાસ્ત્રૈર્મર્મભેદિભિઃ ॥ ૧૨॥

તતો રક્તસમોઘૈશ્ચ નદી જાતા દુરત્યયા ।
પ્રવાહબહુલા રક્તૈ રજઃ શાન્તં બભૂવ હ ॥ ૧૩॥

એવમેકદિનં ઘોરં દિવાનિશિ નિરન્તરમ્ ।
યુદ્ધં બભૂવ દૈત્યાનાં દેવાનાં તુ જયૈષિણામ્ ॥ ૧૪॥

તતો દેવા જયૈર્યુક્તા બભૂવુર્દૈત્યમુખ્યકાન્ ।
જઘ્નુઃ શસ્ત્રપ્રહારૈસ્તુ પ્રપેલુર્દૈત્યનાયકાઃ ॥ ૧૫॥

તદ્ દૃષ્ટ્વા પરમાશ્ચર્યં દૈત્યેન્દ્રાઃ ક્રોધમાદધુઃ ।
બલિમુખ્યા મહાવીર્યા આયયૂ રણમણ્ડલમ્ ॥ ૧૬॥

તૈઃ શસ્ત્રાસ્ત્રબલૈઃ સર્વં દેવાનાં પ્રહતં બલમ્ ।
પ્રપેલુરમરાસ્તત્ર ભયભીતા દિશો દશ ॥ ૧૭॥

તત ઇન્દ્રઃ સમાયાતો જઘાનામર્ષતો બલિમ્ ।
વજ્રેણ પાતયામાસ દાનવેન્દ્રં મહાબલમ્ ॥ ૧૮॥

તતો હર્ષયુતા દેવા જગર્જુર્નાદસંયુતાઃ ।
મહેદ્રં કુમ્ભકર્ણશ્ચ હૃદિ વિવ્યાધ મુષ્ટિના ॥ ૧૯॥

ઇન્દ્રઃ પપાત ભૂપૃષ્ઠે તતો વિષ્ણુર્મહાબલઃ ।
ચક્રં તત્યાજ સઙ્ક્રુદ્ધો રણભૂમૌ વિચક્ષણઃ ॥ ૨૦॥

ચક્રેણ ક્ષુરધારેણ હતા દૈત્યાઃ સમન્તતઃ ।
રાવણઃ ક્રોધસંયુક્તસ્તં યયૌ રણકામ્યયા ॥ ૨૧॥

ગદયા વિષ્ણુના તત્ર હતો મૂર્ચ્છામવાપ હ ।
કુમ્ભકર્ણં તથા વિષ્ણુર્મૂર્ચ્છિતં પ્રચકાર હ ॥ ૨૨॥

તતો દુર્મદકસ્તત્ર મહિષઃ શઙ્કુરસ્તથા ।
સમાજગ્મુર્મહાવિષ્ણું ક્રોધયુક્તાઃ સમન્તતઃ ॥ ૨૩॥

તતોઽતિવ્યાકુલં દૃષ્ટ્વા કેશવં શઙ્કુરઃ સ્વયમ્ ।
ત્રિશૂલં ગૃહ્ય વેગેન ભાનુશ્ચૈવ સમાયયૌ ॥ ૨૪॥

ભાનુના દુર્મદસ્તત્ર ગદયા પીડિતો ભૃશમ્ ।
મૂર્ચ્છિતઃ સ પપાતૈવ વમન્ રક્તં મુખાદ્ બહુ ॥ ૨૫॥

ત્રિશૂલેન હતસ્તત્ર શઙ્કુરઃ શઙ્કુરેણ ચ ।
પપાત સ ધરાપૃષ્ઠે મૂર્ચ્છિતો સુરનાયકઃ ॥ ૨૬॥

ચક્રેણ મહિષસ્તત્ર વિષ્ણુના મૂર્ચ્છિતઃ કૃતઃ ।
તતો હાહારવં કૃત્વા પ્રપેલુર્દૈત્યદાનવાઃ ॥ ૨૭॥

દેવાનાં જયયુક્તાનાં બલં દૃષ્ટ્વા મહામુનિઃ ।
શુક્રસ્તાન્ દૈત્યમુખ્યાંશ્ચ જીવિતું યત્નમાદધે ॥ ૨૮॥

એતસ્મિન્નન્તરે તત્ર મહાકાલી સમાયયૌ ।
કાવ્યં ગૃહ્ય યયૌ દેવી તં ચિક્ષેપ ગુહાન્તરે ॥ ૨૯॥

તતઃ કામાસુરઃ શોકયુતો દૈત્યઃ પ્રતાપવાન્ ।
નિઃશ્વસ્ય યોદ્ધુમાયાતસ્તસ્ય પુત્રૌ સમૂચતુઃ ॥ ૩૦॥

તિષ્ઠ તાત ગમિષ્યાવો રણં કૃત્વા મહારિપુમ્ ।
હનિષ્યાવો ન સન્દેહઃ કિં કરિષ્યતિ વિઘ્નપઃ ॥ ૩૧॥

(Page ખં. ૬ અ. ૩૩ પાન ૯૬)
એવમુક્ત્વા મહાવીર્યૌ દૈત્યપુત્રૌ રણસ્થલમ્ ।
યયતુઃ શઙ્કુરં વિષ્ણુમૂચતુઃ ક્રોધસંયુતૌ ॥ ૩૨॥

શોષણ ઉવાચ ।
તિષ્ઠ તિષ્ઠ મહાદેવ હત્વા દૈત્યગણાન્ પુરા ।
અધુના ત્વાં હનિષ્યામિ પશ્ય મે પૌરુષં પરમ્ ॥ ૩૩॥

શિવોઽસિ ત્વં શિવાતુલ્યો ગચ્છારણ્યં મરિષ્યસિ ।
પશુભિશ્ચ મદગ્રે તુ કિં કરિષ્યસિ તદ્વદ ॥ ૩૪॥

શ્રીશઙ્કર ઉવાચ ।

શોષણ ત્વં સમર્થશ્ચાધુના હન્મિ ન સંશયઃ ।
વિકટ તેજસા યુક્તઃ પૌરુષં દર્શયસ્વ રે ॥ ૩૫॥

શ્રુત્વા બાણાન્ મહાબાહુશ્ચિક્ષિપામોઘરૂપકાન્ ।
તૈસ્તે દેવગણાઃ સર્વે મૂર્ચ્છિતાઃ પતિતા મૃધે ॥ ૩૬॥

શઙ્કરસ્તં મહાવીર્યં યોધયામાસ વેગતઃ ।
સોઽપિ ક્રોધસમાયુક્તસ્તં વિવ્યાધ શરૈઃ પુનઃ ॥ ૩૭॥

તતસ્ત્રિશૂલઘાતેન શોષણશ્ચ પપાત હ ।
ક્ષણાલ્લભ્ય તતઃ સંજ્ઞાં શમ્ભું જગ્રાહ કોપતઃ ॥ ૩૮॥

ભ્રામયિત્વા પ્રચિક્ષેપ મહાપર્વતમસ્તકે ।
તતો હર્ષયુતા દૈત્યાસ્તં જયેતિ શશંસિરે ॥ ૩૯॥

દુષ્પૂરો વિષ્ણુમાગત્ય તં જગાદ સુરેશ્વરમ્ ।
ક્રોધયુક્તો મહાબાહુર્બલેન ભૃશગર્વિતઃ ॥ ૪૦॥

દુષ્પૂર ઉવાચ ।
કિં વિષ્ણો ત્વં મદોત્સિક્તો માં ન જાનાસિ દુર્મતે ।
હતાસ્ત્વયા મહાવીરા મદીયા દૈત્યનાયકાઃ ॥ ૪૧॥

ફલં ગૃહાણ મત્તસ્ત્વં તેષાં દેવાનુસારિણામ્ ।
સહાયસ્ત્વં હતો નૂનં ગમિષ્યસિ યમક્ષયમ્ ॥ ૪૨॥

તસ્ય તદ્વચનં શ્રુત્વા ક્રોધયુક્તશ્ચ કેશવઃ ।
જગાદ તં મહાવીર્યં દૈત્યપુત્રં સુગર્વિતમ્ ॥ ૪૩॥

શ્રીવિષ્ણુરુવાચ ।
કિં માં વદસિ પાપિષ્ઠ હનિષ્યામિ ન સંશયઃ ।
વિકટ સત્તયા ત્વાઽહં મા ગર્વં કુરુ દૈત્યજ ॥ ૪૪॥

તતઃ ક્રોધસમાવિષ્ટો દુષ્પૂરો ગદયા ત્વહન્ ।
વિષ્ણું તયાઽતિદુઃખેન પપાત ધરણીતલે ॥ ૪૫॥

તતો દેવેન્દ્રમુખ્યાશ્ચ દુષ્પૂરં શસ્ત્રવર્ષતઃ ।
મારયામાસુરવ્યગ્રાઃ સોઽપિ ચિક્ષેપ સાયકાન્ ॥ ૪૬॥

શતૈઃ સન્તાડયામાસ ભાનું તેજસ્વિનાં વરમ્ ।
ઇન્દ્રં શતૈર્યમં વાયું બ્રહ્માણં ચ વ્યપાતયત્ ॥ ૪૭॥

તતો વિષ્ણુશ્ચ દુષ્પૂરં સાવધાનો જઘાન હ ।
ચક્રેણ મૂર્ચ્છિતં ચક્રે દૈત્યપં રણમૂર્ધનિ ॥ ૪૮॥

પુનઃ સંજ્ઞાં સમાસાદ્ય બાણૈર્વિષ્ણુમપીડયત્ ।
સહસ્રૈર્મૂર્ચ્છિતં કૃત્વા જગર્જ હર્ષયન્ સ્વકાન્ ॥ ૪૯॥

એવં દુષ્પૂરદૈત્યેન શોષણેન ચ શક્તયઃ ।
કૃતં કર્મ રણે તુલ્યં જયયુક્તપ્રભાવતઃ ॥ ૫૦॥

દૈત્યેન્દ્રૈર્બલિમુખ્યૈશ્ચ સાવધાનૈસ્તદન્તરે ।
તૈઃ સ્તુતૌ દૈત્યરાજસ્ય પુત્રૌ તત્ર વિરેજતુઃ ॥ ૫૧॥

તતો દેવગણાન્ હન્તું દૈત્યેશા બલસંયુતાઃ ।
મતિં ચક્રુસ્તતઃ ક્રુદ્ધો બભૂવ દ્વિરદાનનઃ ॥ ૫૨॥

પાશં ચિક્ષેપ વેગેન તથાંઽકુશં ગજાનનઃ ।
પાશઃ શોષણકણ્ઠં તુ સમાગત્ય સ્થિતોઽભવત્ ॥ ૫૩॥

રુદ્ધશ્વાસઃ સ પાશેન પપાત શોષણો મૃધે ।
હસ્તૌ પાદૌ પ્રચાલ્યૈવ મમાર તત્ક્ષણાત્તતઃ ॥ ૫૪॥

અઙ્કુશઃ સહસાઽઽગત્ય જઘાનોદરકે તતઃ ।
દુષ્પૂરં સ મમારૈવ પશ્યતાં દૈત્યરક્ષસામ્ ॥ ૫૫॥

તતઃ પાશાઙ્કુશૌ તત્ર ચેરતૂ રણમણ્ડલે ।
હત્વા દૈત્યાનનેકાંશ્ચ હાહાકારરવાકુલાન્ ॥ ૫૬॥

(Page  ખં. ૬ અ. ૩૪ પાન ૯૭)
બલિમુખ્યા ભયોદ્વિગ્નાસ્ત્યક્ત્વા લજ્જાં ચ શક્તયઃ ।
પ્રપેલુઃ શસ્ત્રહીનાસ્તે દશદિક્ષુ તથાઽપરે ॥ ૫૭॥

તતો વિઘ્નેશ્વરસ્યૈવ હસ્તગૌ સમ્બભૂવતુઃ ।
પાશાઙ્કુશૌ ગણેશસ્યોત્તસ્થુર્દૃષ્ટ્વાઽમરાઃ પુનઃ ॥ ૫૮॥

નીરુજો બલસંયુક્તાસ્તુષ્ટુવુર્વિકટં તતઃ ।
દૈત્યાઃ શોકાકુલાસ્તદ્વદ્રુરુદુઃ સર્વતો દિશામ્ ॥ ૫૯॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે કામાસુરપુત્રવધો નામ ત્રયસ્ત્રિંશત્તમોઽધ્યાયઃ ॥ ૬.૩૩

## ૬.૩૪ કામાસુરવિચારવર્ણનં નામ ચતુસ્ત્રિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

આદિશક્તિરુવાચ ।
છિન્નાઙ્ગા અસુરાઃ કામાસુરં કેચિન્ મહાબલમ્ ।
જગ્મુર્ભયયુતં દૃષ્ટ્વા વૃત્તાન્તં તમવેદયન્ ॥ ૧॥

દૈત્યા ઊચુઃ ।
કિં સ્થિતોઽસિ મહારાજ મૃતા દૈત્યા મહામૃધે ।
તવ પુત્રૌ મૃતૌ તત્ર શરણં વ્રજ વિઘ્નપમ્ ॥ ૨॥

નોચેત્ દૈત્યકુલાનાં વૈ મૂલચ્છેદો ભવિષ્યતિ ।
ઇતિ તેષાં વચઃ શ્રુત્વા કામાસુરો મુમૂર્ચ્છ હ ॥ ૩॥

સાવધાનઃ કૃતો દૈત્યૈ રુરોદ ભયસઙ્કુલઃ ।
શોકસન્તપ્તગાત્રોઽસૌ દેવાન્ હન્તું મનો દધે ॥ ૪॥

ગૃહીત્વા શસ્ત્રસઙ્ઘાતાન્ રથારૂઢો બભૂવ હ ।
શેષસેનાં સમાદાય વિકટં પ્રયયૌ પુરઃ ॥ ૫॥

રણભૂમૌ મહાવીરં પ્રાપ્તં કામાસુરં પરમ્ ।
દૃષ્ટ્વા ભયયુતા દેવા વચો વિકટમબ્રુવન્ ॥ ૬॥

સમાગતઃ સ્વયં કામાસુરઃ સ્વામિન્ મહાયશાઃ ।
ઇદાનીં ગણનાથ ત્વં યત્ કરિષ્યસિ તત્ કુરુ ॥ ૭॥

તતઃ ક્રોધયુતો દેવાન્ વિકટઃ પ્રત્યુવાચ હ ।
ભયહીના મહેશાના યુધ્યધ્વં મદનુગ્રહાત્ ॥ ૮॥

તસ્ય તદ્વચનં શ્રુત્વા શમ્ભુવિષ્ણુમુખાઽમરાઃ ।
ગર્જિત્વા ઘનવદ્ઘોરં તં યયુઃ શસ્ત્રપાણયઃ ॥ ૯॥

સમાગતાન્ મહેશાદ્યાન્ જગાદ દૈત્યનાયકઃ ।
ક્રોધેન મહતા યુક્તો દેવાન્ દેવનિષૂદનઃ ॥ ૧૦॥

કામાસુર ઉવાચ ।
શમ્ભો વિષ્ણો તથાઽન્યે તુ દેવેશા મે વચોઽધુના ।
શ ृણુધ્વં કિં કૃતં ઘોરં વૈરં પુત્રવધાત્મકમ્ ॥ ૧૧॥

મયા સ્નેહયુતેનૈવ ન હતાઃ પ્રાક્ સુરેશ્વરાઃ ।

દયાયુક્તેન તસ્યેદં ફલં દત્તં સુરૈઃ પરમ્ ॥ ૧૨॥

અધુના ક્રોધસંયુક્તો હનિષ્યામિ સુરેશ્વરાન્ ।
વિકટં દેવપ હત્વા મુનીન્ દેવેન્દ્રસત્તમાઃ ॥ ૧૩॥

એવમુક્ત્વા ધનુઃ સજ્જં ચકાર દૈત્યનાયકઃ ।
જગાદ ધૈર્યમાલમ્બ્ય તતસ્તં શઙ્કરો વચઃ ॥ ૧૪॥

શ્રીશઙ્કર ઉવાચ ।
ત્વયાઽસ્માકં મહાદૈત્ય ગૃહીતં સકલં પુરા ।
ધર્મનાશઃ કૃતશ્ચૈવ ત્રૈલોક્યં પીડિતં બલાત્ ॥ ૧૫॥

ફલં દૈત્યપતે તસ્ય ત્વયા પ્રાપ્તં ન સંશયઃ ।
ત્વાં હનિષ્યામિ વિકટ કૃપયાઽહં ખલોત્તમ ॥ ૧૬॥

(Page ખં. ૬ અ. ૩૪ પાન ૯૮)
શિવસ્ય વચનં શ્રુત્વા ક્રોધયુક્તો મહાસુરઃ ।
ગદયા તં જઘાનૈવ પાતયામાસ શઙ્કરમ્ ॥ ૧૭॥

શઙ્કરં પતિતં દૃષ્ટ્વા ચક્રં તત્યાજ કેશવઃ ।
કામાસુરં સમાસાદ્ય નિષ્ફલં તદ્બભૂવ હ ॥ ૧૮॥

તતઃ ક્રોધસમાયુક્તો ધનુઃ કામઃ પ્રગૃહ્ય ચ ।
સજ્જં કૃત્વા મહાબાણાન્ વવર્ષ ઘનવદ્ ભૃશમ્ ॥ ૧૯॥

તૈર્બાણૈર્દેવમુખ્યાશ્ચ પતિતા ધરણીતલે ।
છિન્નાઙ્ગા બલહીનાશ્ચ મુમૂર્ચ્છુસ્તે તતઃ પરમ્ ॥ ૨૦॥

તતો બલિમુખાઃ સર્વે દાનવા યુદ્ધદુર્મદાઃ ।
દેવાન્ ક્રોધસમાયુક્તા જઘ્નુસ્તત્ર સમન્તતઃ ॥ ૨૧॥

વિષ્ણુઃ કામં જઘાનૈવ બાણૈઃ પરમદારુણૈઃ ।
સોઽપિ તં મૂર્ચ્છિતં ચક્રે દૈતેયો ગરુડધ્વજમ્ ॥ ૨૨॥

તતો મૂર્ચ્છાં પરિત્યજ્ય શઙ્કરો યુયુધે ભૃશમ્ ।
કામાસુરેણ દૈત્યેન્દ્રસ્તં જઘાનાસિઘાતતઃ ॥ ૨૩॥

તથાપિ ન ચચાલૈવ શિવઃ સંહારકારકઃ ।
તતો વિષ્ણુઃ સમુત્તસ્થૌ યુયુધે દાનવૈઃ સહ ॥ ૨૪॥

ભાનુના શરઘાતેન રાવણસ્તાડિતો ભૃશમ્ ।

દુર્મદશ્ચ તથા દેવ્યઃ પેતતુસ્તૌ ધરાતલે ॥ ૨૫॥

વિષ્ણુના ચક્રઘાતેન હતો મૂર્ચ્છામવાપ હ ।
મહિષઃ કુમ્ભકર્ણશ્ચ શઙ્કુરશ્ચ બલિસ્તથા ॥ ૨૬॥

તતશ્ચક્રેણ ગોવિન્દો જઘાન દાનવાન્ પરમ્ ।
હાહા કૃત્વા સુરાઃ સર્વે પલાયન્ત દિશો દશ ॥ ૨૭॥

તત્ દૃષ્ટ્વા પરમાશ્ચર્યં કામાસુરઃ સુવિસ્મિતઃ ।
ક્રોધયુક્તો મહેશાનં ધૃત્વા હ્યાસ્ફાલયત્તદા ॥ ૨૮॥

વિષ્ણું ધૃત્વા પ્રચિક્ષેપ મહાપર્વતમસ્તકે ।
ભાનું ગૃહ્ય ધરાયાં સ પોથયામાસ દારુણઃ ॥ ૨૯॥

તતો હાહારવં કૃત્વા દેવાઃ સર્વે ભયાતુરાઃ ।
પ્રપલુશ્છિન્નભિન્નાઙ્ગાઃ કામાસુરનિપીડિતાઃ ॥ ૩૦॥

દૈત્યેન્દ્રસ્ય બલં દૃષ્ટ્વા હર્ષિતો વિકટઃ સ્વયમ્ ।
મૂષકોપરિ સંસ્થાય યયૌ સઙ્ગ્રામકારણાત્ ॥ ૩૧॥

કામાસુરઃ સમાલોક્ય આગતં તં પ્રતાપવાન્ ।
ક્રોધસંરક્તચક્ષુઃ સ જગાદ ભયસંયુતઃ ॥ ૩૨॥

કામાસુર ઉવાચ ।
મયૂરેશ કથં યાતઃ સઙ્ગ્રામાય મયા સહ ।
મૂષકોપરિ સંસ્થાયાખુતુલ્યસ્ત્વં મતોઽસિ મે ॥ ૩૩॥

મમ પુત્રૌ મહાવીર્યૌ ગજાનન હતૌ ત્વયા ।
તયોઃ શોકેન સન્તપ્તો હનિષ્યામિ સમૂષકમ્ ॥ ૩૪॥

દેવૈઃ સમ્પ્રાર્થિતસ્ત્વં તુ કિં કરિષ્યસિ માં વદ ।
મમ ભ્રૂભઙ્ગમાત્રેણ કમ્પતે સચરાચરમ્ ॥ ૩૫॥

ઉત્પત્તિસ્થિતિસંહારકર્તૃભ્યો મે ગજાનન ।
તૈર્યુક્તેભ્યો ભયં નૈવ ભવિષ્યતિ કદાચન ॥ ૩૬॥

દેહધારી ગણાધ્યક્ષ કિં કરિષ્યસિ મૂર્ખવત્ ।
અજ્ઞાનસંયુતસ્ત્વં તુ મરિષ્યસિ મદગ્રતઃ ॥ ૩૭॥

કામાસુરસ્ય વાક્યં સ શ્રુત્વા ગણપતિઃ સ્વયમ્ ।
જગાદ હાસ્યવદનઃ પરં તં ગર્વસંયુતમ્ ॥ ૩૮॥

મૂર્ખોઽસિ કામ અત્યન્તં વિકટોઽહં વિચારય ।
જન્મમૃત્યુવિહીનો વૈ કથં હંસિ મહાખલ ॥ ૩૯॥

ન સૃષ્ટિસ્થિતિસંહારકર્તાઽહં દૈત્યપુઙ્ગવ ।
યદિ જીવિતુમિચ્છા તે તદા માં શરણં વ્રજ ॥ ૪૦॥

નોચેત્ત્વાં પાપકર્માણં હનિષ્યામિ ન સંશયઃ ।
ગર્વં ત્યજ મહામૂર્ખ બ્રહ્માઽહં નાત્ર સંશયઃ ॥ ૪૧॥

શુક્રેણ કથિતં સર્વં ન બુદ્ધં મૂર્ખભાવતઃ ।
(Page ખં. ૬ અ. ૩૫ પાન ૯૯)
સ્વરૂપં મે ત્વયા દુષ્ટાધુનાપિ શરણં વ્રજ ॥ ૪૨॥

વિકટસ્ય વચઃ શ્રુત્વા ક્રોધયુક્તો બભૂવ હ ।
કામાસુરશ્ચ તં હન્તું ગદાં ચિક્ષેપ દારુણામ્ ॥ ૪૩॥

સા ગદા નિષ્ફલા તત્ર પપાત ધરણીતલે ।
અકસ્માદ્દૈત્યરાજસ્તુ મૂર્ચ્છિતઃ પ્રબભૂવ હ ॥ ૪૪॥

પ્રહરેણ મહાક્રૂરઃ સાવધાનો બભૂવ હ ।
અશક્તઃ સર્વદેહે સ પીડાં લેભેઽતિદારુણામ્ ॥ ૪૫॥

તતો મનસિ સન્ધાર્ય વિચારમકરોત્ ખલઃ ।
અહો શસ્ત્રં વિના માં સ જઘાન વિકટઃ કથમ્ ॥ ૪૬॥

શક્તિહીનોઽહમત્યન્તં કથં યુદ્ધં કરોમિ વૈ ।
શુક્રેણ કથિતં સત્યં બ્રહ્માકારોઽયમુચ્યતે ॥ ૪૭॥

તથાપિ દેવપક્ષસ્ય ધારકોઽયં કથં ભવેત્ ।
અતઃ સંશયસંયુક્તઃ શરણં ન વ્રજામ્યહમ્ ॥ ૪૮॥

મરિષ્યામિ ન સન્દેહસ્તદેવ કીર્તિવર્ધનમ્ ।
શત્રૂણાં શરણં ચૈવ ન યોગ્યં ભાસતે હૃદિ ॥ ૪૯॥

અતોઽહં વિકટં ગત્વા કરોમિ પ્રશ્નમદ્ભુતમ્ ।
દેવપક્ષવિહીનશ્ચેદ્વ્રજામિ શરણં ચ તમ્ ॥ ૫૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે કામાસુરવિચારવર્ણનં નામ ચતુસ્ત્રિંશત્તમોઽધ્યાયઃ ॥ ૬.૩૪

## ૬.૩૫ કામાસુરશાન્તિવર્ણનં નામ પઞ્ચત્રિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

આદિશક્તિરુવાચ ।
તતઃ કામાસુરો દૈત્યૈર્જગામ દ્વિરદાનનમ્ ।
જગાદ ભયસંયુક્તો વચનં હિતકારકમ્ ॥ ૧॥

કામાસુર ઉવાચ ।
બ્રહ્મ ત્વં વિકટ પ્રાજ્ઞ દેવ સાહાય્યકૃત્ કથમ્ ।
સુરાસુરમયં તદ્વૈ કથમેકગુણાશ્રિતમ્ ॥ ૨॥

વિકટસ્ત્વં કથં વેદે કીદૃશં બ્રહ્મ તસ્ય તુ ।
જન્માદિહીનભાવશ્ચેત્ કથં દેહપ્રધારકઃ ॥ ૩॥

વદ સર્વં વિશેષેણ ત્વાં જ્ઞાસ્યામિ યથાર્થતઃ ।
તદા તે શરણં નાથાઽઽગમિષ્યામિ ન સંશયઃ ॥ ૪॥

વિકટ ઉવાચ ।
માયા નાનાવિધા દૈત્ય સા ખેલતિ મયા ધૃતા ।
ભેદાન્ કૃત્વા તદાધારાન્ મયૂરેશં વદન્તિ મામ્ ॥ ૫॥

માયાશબ્દં મયૂરાખ્યં વદન્તે તત્ત્વદર્શિનઃ ।
તસ્યાઃ સ્વામિનમેવં માં મયૂરેશં વિલોકય ॥ ૬॥

નાનાભેદયુતં બ્રહ્માસદ્રૂપં કથ્યતે બુધૈઃ ।
ઉત્પત્તિસ્થિતિસંહારસાક્ષિરૂપપ્રદર્શનાત્ ॥ ૭॥

તત્રામૃતમયં બ્રહ્મ સદા ભેદવિવર્જિતમ્ ।
તદેવ વિકટં તસ્માત્ સત્યં જાનીહિ માં પરમ્ ॥ ૮॥

સદાઽખણ્ડમયે દૈત્ય કુત્ર બ્રહ્મણિ વર્તતે ।
સૃષ્ટિસ્થિતિલયત્વં ચ સાક્ષિરૂપં વદસ્વ મામ્ ॥ ૯॥

ચતુર્ભિર્વર્જિતં બ્રહ્મ ચતુર્યુક્તં મહામતે ।
તત્ર નૈવ વિજાનીહિ વિકટેઽમૃતસંજ્ઞિતે ॥ ૧૦॥

સર્વેષાં જીવનં બ્રહ્મ તદેવ વિકટં મતમ્ ।
તં ભજસ્વ વિધાનેન મૃત્યુહીનો ભવિષ્યસિ ॥ ૧૧॥

(Page  ખં. ૫ અ. ૨૫ પાન ૧૦૦)
સિદ્ધિર્ભ્રાન્તિકરી પ્રોક્તા બુદ્ધિર્ભ્રાન્તિધરા મતા ।
તયોઃ સ્વામી ગણેશશ્ચ વિચારય હૃદિ સ્થિતઃ ॥ ૧૨॥

ચિત્તં પઞ્ચવિધં દૈત્ય તત્ર ભ્રાન્તિશ્ચ પઞ્ચધા ।
ભ્રાન્તિયુક્તં મહચ્ચિત્તં ત્યક્ત્વા ચિન્તામણિં ભજ ॥ ૧૩॥

સર્વેષાં ચિત્તગોઽહં તુ મત્પ્રાપ્ત્યર્થં મહામતે ।
દેહધારી સ્વયં ભૂત્વા ભક્તાન્ શાન્તિં દદામ્યહમ્ ॥ ૧૪॥

સમ્પ્રજ્ઞાતો નરાકારો સમ્પ્રજ્ઞાતાત્મકં શિરઃ ।
તયોર્યોગેઽભવં દેહધારી ગજં વિચારય ॥ ૧૫॥

અતોઽહં ગજવક્ત્રશ્ચ દર્શનં મે સુયોગિનામ્ ।
સ્વસંવેદ્યં ભવેન્નૂનં તેન સ્વાનન્દવાસકૃત્ ॥ ૧૬॥

માયાક્રીડાર્થમાનન્દાદ્રચિતં વિવિધં પુરા ।
સ્વસ્વધર્મયુતં વિશ્વં ચિત્તે તિષ્ઠામિ નિત્યદા ॥ ૧૭॥

દેવાસુરમયોઽહં તુ ન ભિન્નં મે પ્રવર્તતે ।
તથાપિ ધર્મરક્ષાર્થં હન્મિ સર્વાન્ન સંશયઃ ॥ ૧૮॥

સ્વર્ગેષુ સ્થાપિતા દેવા નરાઃ પૃથ્વ્યાં મયા તથા ।
અસુરા વિવરેષ્વેવં ત્રિવિધં ત્રિષુ સંસ્થિતમ્ ॥ ૧૯॥

યદા લોભયુતા દેવાઃ પાતાલસ્થાન્ મહાસુરાન્ ।
હન્તું વિષ્ણુમુખાઃ ક્રોધાદ્ બભૂવુશ્ચોત્સુકા બલાત્ ॥ ૨૦॥

તદા ક્રોધયુતોઽહં તુ દૈત્યાનાં હૃદિ સંસ્થિતઃ ।
તપઃસામર્થ્યસંયુક્તાન્ કરોમિ દાનવાન્ પરાન્ ॥ ૨૧॥

વિઘ્નકર્તાઽમરાણાં વૈ દૈત્યાનાં વિઘ્નહારકઃ ।
ભવામિ તેન દૈત્યેન્દ્રા જયયુક્તાઃ સદાઽભવન્ ॥ ૨૨॥

અસુરૈર્હન્યમાનાશ્ચ દેવેન્દ્રા વનવાસિનઃ ।
બભૂવુઃ કામ જાનીહિ સંશયો ન મદિચ્છયા ॥ ૨૩॥

યદા દૈત્યા મહાદુષ્ટા મદયુક્તા બભૂવિરે ।
કર્મનાશપ્રભાવેણ દેવાનાં મૂલછેદકાઃ ॥ ૨૪॥

તદા દેવાઃ સમર્થાશ્ચ પ્રજઘ્નુર્દૈત્યનાયકાન્ ।

દૈત્યાનાં છિદ્રકં સર્વં દર્શયામિ હૃદિ સ્થિતઃ ॥ ૨૫॥

બ્રહ્માદીનામવધ્યાશ્ચેદ્યદા દૈત્યા ભવન્તિ ચ ।
તદાઽહં દેહધારી તાન્ ભૂત્વા હન્મિ વિશેષતઃ ॥ ૨૬॥

યદા સ્વધર્મસંયુક્તા દેવા દૈત્યા બભૂવિરે ।
તદા તેષાં હૃદિ સ્થિત્વા તિષ્ઠામ્યસુર સર્વદા ॥ ૨૭॥

ત્વયા દેવગણાઃ સર્વે પીડિતા ધર્મલોપક ।
અતસ્ત્વાં હન્તુમાયાતો દેવપક્ષધરો હ્યહમ્ ॥ ૨૮॥

હનિષ્યામિ મહાદુષ્ટ યદિ મામવમન્યસે ।
જીવિતું ત્વં સુખી દેવ વૈરં ત્યક્ત્વા ભવેચ્છસિ ॥ ૨૯॥

એવમુક્ત્વા મહાદૈત્યં વિકટો વિરરામ હ ।
કામાસુરઃ પ્રસન્નાત્મા બભૂવે ભાવિગૌરવાત્ ॥ ૩૦॥

વિચારમકરોચ્ચિત્તે વિકટોઽયં ન સંશયઃ ।
સુરાસુરમયઃ પૂર્ણો વ્રજામિ શરણં તતઃ ॥ ૩૧॥

કામઃ કરપુટં કૃત્વા ત્યક્ત્વા શસ્ત્રાદિકં પુરઃ ।
વિકટં પ્રણનામાથ હર્ષયુક્તસ્વભાવતઃ ॥ ૩૨॥

પ્રણમ્ય પૂજયામાસ પુનર્યત્નેન વિઘ્નપમ્ ।
તુષ્ટાવ ભક્તિસંયુક્તોઽસુરઃ કામો ગજાનનમ્ ॥ ૩૩॥

કામાસુર ઉવાચ ।
નમસ્તે વિકટાયૈવ ગણેશાય પરાત્મને ।
સર્વપૂજ્યાય સર્વેશ દેવાસુરમયાય ચ ॥ ૩૪॥

અનન્તમાયયાયુક્ત બ્રહ્મભૂતસ્વરૂપિણે ।
ગજાનનાય હેરમ્બ દેવેશાય નમો નમઃ ॥ ૩૫॥

શૂર્પકર્ણાય વિઘ્નાનાં ચાલકાય નમો નમઃ ।
ભક્તાનાં વિઘ્નહર્ત્રે તે હ્યભક્તાનાં વિનાશિને ॥ ૩૬॥

સ્વાનન્દવાસિને તુભ્યં યોગાકારસ્વરૂપિણે ।
(Page ખં. ૬ અ. ૩૫ પાન ૧૦૧)
યોગિભ્યઃ શાન્તિદાત્રે તે યોગેશાય નમો નમઃ ॥ ૩૭॥

અનામયાય સર્વાદિપૂજ્યાય જ્યેષ્ઠરૂપિણે ।

જ્યેષ્ઠેભ્યઃ પદદાત્રે તે જ્યેષ્ઠરાજાય વૈ નમઃ ॥ ૩૮॥

સિદ્ધિબુદ્ધિપ્રદાત્રે ચ સિદ્ધિબુદ્ધિવિહારિણે ।
સિદ્ધિબુદ્ધિસ્વરૂપાય ગણાનાં પતયે નમઃ ॥ ૩૯॥

ત્રિનેત્રાય નમસ્તુભ્યં ચતુર્બાહુધરાય ચ ।
લમ્બોદરાય બ્રહ્મેશ બ્રહ્મણાં પતયે નમઃ ॥ ૪૦॥

દેવાનાં પાલકાયૈવ દૈત્યેભ્યો વરદાયિને ।
સર્વેષાં સમભાવાય ઢુણ્ઢિરાજાય તે નમઃ ॥ ૪૧॥

વિષ્ણુપુત્રાય શમ્ભોશ્ચ શક્તેઃ પુત્રાય કાશ્યપ ।
વરેણ્યસૂનવે સર્વમાત્રે પિત્રે નમો નમઃ ॥ ૪૨॥

કિં સ્તૌમિ ત્વાં ગણાધીશ યત્ર યોગીન્દ્રમુખ્યકાઃ ।
વેદાદયો વિશેષેણ શાન્તિં પ્રાપ્તાઃ સ્વભાવતઃ ॥ ૪૩॥

માયાસુખં વિશેષેણ ભ્રાન્તિદં સર્વજન્તવે ।
ત્યક્ત્વા તલ્લભ્યસે નાથ ભક્ત્યા વિકટયા પ્રભો ॥ ૪૪॥

અશાન્તં માયયા યુક્તં ચિત્તં ભ્રાન્તિયુતં સદા ।
વિકટે શાન્તિમાપન્નમતસ્ત્વં વિકટો મતઃ ॥ ૪૫॥

એવં સંસ્તુવતસ્તસ્ય ભક્ત્યા રોમોદ્ગમોઽભવત્ ।
કામાસુરો નનર્તાઽસૌ રુદ્ધકણ્ઠો મહાયશાઃ ॥ ૪૬॥

ભક્તિયુક્તં મનસ્તસ્ય દૃષ્ટ્વા તં વિકટોઽવદત્ ।
વરં વરય કામ ત્વં દાસ્યામિ મનસીપ્સિતમ્ ॥ ૪૭॥

ત્વાં હન્તું ક્રોધયુક્તોઽહં સમાગતો ન સંશયઃ ।
અધુના ન હનિષ્યામિ શરણાગતમાદરાત્ ॥ ૪૮॥

ત્વયા કૃતમિદં સ્તોત્રં સર્વકામપ્રદં ભવેત્ ।
શ૱ૃણ્વતે પઠતે ચૈવાન્તે સ્વાનન્દપ્રદાયકમ્ ॥ ૪૯॥

એવં ગણપતેર્વાક્યં શ્રુત્વા કામાસુરશ્ચ તમ્ ।
પ્રણમ્ય હર્ષસંયુક્તો જગાદ દ્વિરદાનનમ્ ॥ ૫૦॥

કામાસુર ઉવાચ ।
પ્રસન્નોઽસિ યદા નાથ તદા તે ભક્તિમુત્તમામ્ ।
દેહિ સ્થાનાદિકં દેવ ભજામિ તત્ર સંસ્થિતઃ ॥ ૫૧॥

ગાણપત્યપ્રિયત્વં મે દેહિ નિત્યં ગજાનન ।
નાન્યદ્યાચે પરં કિઞ્ચિન્નશ્વરં સર્વમઞ્જસા ॥ ૫૨॥

અહો યોગીન્દ્રમુખ્યાનાં દુર્લભં તે પદં પ્રભો ।
સાક્ષાદ્ દૃષ્ટોઽસિ વિઘ્નેશ તેન જ્ઞાતં મયાઽધુના ॥ ૫૩॥

તસ્ય તદ્વચનં શ્રુત્વા વિકટો ભક્તવત્સલઃ ।
ઉવાચ તં મહાભક્તં કામં ગાણેશકામુકમ્ ॥ ૫૪॥

વિકટ ઉવાચ ।
મદીયા ભક્તિરુગ્રા તે ભવિષ્યતિ મહાસુર ।
ગાણપત્યપ્રિયત્વં તુ સદા યોગપરાયણઃ ॥ ૫૫॥

તિષ્ઠ સ્થાને સ્વકે દૈત્ય યથા પૂર્વં તથા ભવ ।
મદીયસ્મરણં નૈવ પૂજનં યત્ર કર્મણિ ॥ ૫૬॥

આદૌ તત્રાસુરેણૈવ ફલં ભુઙ્ક્ષ્વ સુકર્મજમ્ ।
મદીયભક્તિસંયુક્તાન્ કુરુ મત્ કામસંયુતાન્ ॥ ૫૭॥

તથેતિ ગણપં નત્વા સુરઃ કામો મહાયશાઃ ।
સ્વસ્થાનં સ જગામૈવ ગણેશે ભક્તિકામુકઃ ॥ ૫૮॥

તં શાન્તં દૈત્યમુખ્યાશ્ચ દૃષ્ટ્વા મહિષકાદયઃ ।
સ્વસ્વસ્થાનં યયુઃ સર્વે ત્યક્ત્વા કામાસુરં કિલ ॥ ૫૯॥

॥ ॐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે કામાસુરશાન્તિવર્ણનં નામ પઞ્ચત્રિંશત્તમોઽધ્યાયઃ ॥ ૬.૩૫
(Page ખં. ૬ અ. ૩૬ પાન ૧૦૨)

## ૬.૩૬ વિકટાવતારચરિતસમાપ્તિવર્ણનં નામ ષટ્ત્રિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

આદિશક્તિરુવાચ ।
કામાસુરં મહાશાન્તિયુતં દૃષ્ટ્વા સુરર્ષયઃ ।
વિસ્મિતા વિકટં પૂજ્ય તુષ્ટુવુઃ કરસમ્પુટાઃ ॥ ૧॥

દેવર્ષય ઊચુઃ ।

અજં પુરાણં પરમવ્યયં ચ સદાત્મરૂપં સકલાવભાસમ્ ।
અસદ્વિહીનં વિવિધાન્તરસ્થં ભજામહે તં વિકટં પરેશમ્ ॥ ૨॥

અનાદિમધ્યાન્તવિવર્જિતં યત્ સુજીવનં જીવનધર્મધારમ્ ।
સદામૃતં બ્રહ્મ વિકારહીનં ભજામહે તં વિકટં પરેશમ્ ॥ ૩॥

ત્વયૈવ માયા રચિતા સ્વબિમ્બાત્ સ્વયં દધૌ જીવનબિમ્બવીર્યમ્ ।
બભૂવ યુક્તા રચને સમર્થા ભજામહે તં વિકટં પરેશમ્ ॥ ૪॥

તથા હ્યસદ્રૂપમયં ચ સાઙ્ખ્યં કૃતં તથા બ્રહ્મ સુબોધરૂપમ્ ।
અનન્તભેદાશ્રિતમપ્રમેયં ભજામહે તં વિકટં પરેશમ્ ॥ ૫॥

તતઃ સ્વબોધેન કૃતં ચ સોઽહં પવિત્રમેકાશ્રિતમાદિરૂપમ્ ।
જગદ્ધરં બિન્દુમયં તથા વૈ ભજામહે તં વિકટં પરેશમ્ ॥ ૬॥

જગચ્ચતુષ્પાદમયં ચ તાભ્યાં વ્યષ્ટ્યા સમષ્ટ્યા ચ યુતં હિ સૃષ્ટમ્ ।
અજેષુ સઞ્જીવનદં ગણેશં ભજામહે તં વિકટં પરેશમ્ ॥ ૭॥

તતં ત્વયા ભેદવિહીનભાવાત્ પ્રકાશરૂપેણ વિભાસિ નાથ ।
અનન્તલીલાકરમપ્રમેયં ભજામહે તં વિકટં પરેશમ્ ॥ ૮॥

અજૈર્વિહીનોઽસિ ગજાનન ત્વં તથાઽપિ સર્વત્ર વિભાસિ ભક્ત્યા ।
અતો ગણેશં વિકટં વદન્તિ ભજામહે તં વિકટં પરેશમ્ ॥ ૯॥

હરિસ્વરૂપેણ વિનાયક ત્વં સુરક્ષસીદં રજસા વિધાતા ।
તથા તમોયુક્તતયા હરોઽસિ ભજામહે તં વિકટં પરેશમ્ ॥ ૧૦॥

પ્રસૃષ્ટકર્માણિ તદન્તરસ્થોર્યમાઽસિ સઞ્જીવનરૂપકેણ ।
ક્રિયાસ્વરૂપેણ તુ શક્તિસંસ્થો ભજામહે તં વિકટં પરેશમ્ ॥ ૧૧॥

સદાત્મરૂપેણ ચ ઢુણ્ઢિરાજ સ્થિતોઽસિ વિશ્વમ્ભર વિશ્વમૂર્તે ।
ન તે કદાચિજ્જગતિ પ્રવેશો ભજામહે તં વિકટં પરેશમ્ ॥ ૧૨॥

સદાદિપૂજ્યં સકલૈઃ સુવન્દ્યં ગણેશસિદ્ધિપ્રદમાસમન્તાત્ ।
સુચિત્તભાસં ગજકર્ણધારં ભજામહે તં વિકટં પરેશમ્ ॥ ૧૩॥

સ્વાનન્દનામ્નિ નગરે સુસંસ્થં ત્રિનેત્રયુક્તં મૂષકોપરિસ્થમ્ ।
મહોદરં ચૈકરદં વિભૂપં ભજામહે તં વિકટં પરેશમ્ ॥ ૧૪॥

સ્વભક્તપક્ષેષુ વિરાજમાનં વિઘ્નૈર્વિહીનં મનસેપ્સિતં ચ ।
અભક્તસર્વાશ્રિતનાશકારં ભજામહે તં વિકટં પરેશમ્ ॥ ૧૫॥

નિયન્તૃરૂપં તવ હસ્તસંસ્થં જગત્સુ નાનાવિધબ્રહ્મસુ પ્રભો ।
મહાઙ્કુશં હ્યઙ્કુશધારમેકં ભજામહે તં વિકટં પરેશમ્ ॥ ૧૬॥

ભ્રમાત્મકં બન્ધનમેકમેવ તદેવ પાશં પ્રભુહસ્તસંસ્થમ્ ।
સ્વભક્તિકૃદ્બન્ધનહાનિકારં ભજામહે તં વિકટં પરેશમ્ ॥ ૧૭॥

ત્વદાશ્રિતાનાં ન ભયં કદાચિત્ સદાઽભયં તે કરસંસ્થિતં ચ ।
પ્રત્યજ્ય દુષ્ટા ભયસંયુતાસ્તે ભજામહે તં વિકટં પરેશમ્ ॥ ૧૮॥

નિજામૃતં વિઘ્નપતે યદન્નં જગત્સુ સંસ્થં પ્રભુહસ્તગં તમ્ ।
સુમોદકં મોદકરં જનાનાં ભજામહે તં વિકટં પરેશમ્ ॥ ૧૯॥

અસન્મયી સર્વગતા વિભિન્ના પરં સદાઽસ્યાશ્ચ સુશાન્તિસંસ્થમ્ ।
અતો વદન્તે વિકટં જનાસ્ત્વાં ભજામહે તં વિકટં પરેશમ્ ॥ ૨૦॥

(Page ખં. ૬ અ. ૩૬ પાન ૧૦૩)
વયં સ્તુવીમોઽલ્પસુબોધગાઃ કિં પ્રભું ન શક્યં નિગમાદિભિશ્ચ ।
શુકાદિભિસ્સ્તોતુમપારગં યં ભજામહે તં વિકટં પરેશમ્ ॥ ૨૧॥

તથાપિ તે દર્શનજેન નાથ બોધેન બ્રહ્મેશ સુસંસ્તુતોઽસિ ।
અતઃ પ્રતુષ્ટો ભવ દીનપાલ ભજામહે તં વિકટં પરેશમ્ ॥ ૨૨॥

આદિશક્તિરુવાચ ।
એવં સ્તુત્વા મહાદેવ્યો વિકટં ત્વમરર્ષયઃ ।
પ્રણેમુર્દણ્ડવત્ સર્વે તતશ્ચ નનૃતુઃ પુરઃ ॥ ૨૩॥

સ તાનુવાચ સર્વેશો વિકટો ભક્તિયન્ત્રિતઃ ।
દેવર્ષીન્ ભક્તિસંયુક્તાન્ ભક્તવાત્સલ્યવાન્ પ્રભુઃ ॥ ૨૪॥

વિકટ ઉવાચ ।
વરાન્ બ્રૂત મહાભાગા દેવા મુનિસમન્વિતાઃ ।
દાસ્યામિ ભક્તિયુક્તેભ્યો ભૃશં સ્તોત્રેણ તોષિતઃ ॥ ૨૫॥

ઇદં સ્તોત્રં કૃતં સર્વૈર્મદીયં મત્પદપ્રદમ્ ।
ભવિષ્યતિ જનાયૈવ પઠતે શૃણ્વતે પરમ્ ॥ ૨૬॥

ભુક્તિમુક્તિપ્રદં પૂર્ણં પુત્રપૌત્રાદિવર્ધનમ્ ।
ધનધાન્યાદિકં કામપ્રદં સ્તોત્રસ્ય પાઠતઃ ॥ ૨૭॥

ષટ્કર્મસાધનકરં પરકૃત્યવિનાશનમ્ ।
નાનારોગહરં પૂર્ણં ભવિષ્યતિ સુસેવિનામ્ ॥ ૨૮॥

કારાગૃહગતાનાં ચ બન્ધમોક્ષકરં ભવેત્ ।
સહસ્રાવર્તનેનૈવ સદા સૌભાગ્યવર્ધનમ્ ॥ ૨૯॥

નાનાપાપસમૂહાનાં દાહકં પઠનાત્તથા ।
સર્વસિદ્ધિકરં ચૈવ ભવિષ્યતિ ન સંશયઃ ॥ ૩૦॥

એકવિંશતિવારં યઃ પઠિષ્યતિ નિરન્તરમ્ ।
સ સર્વં સાધયેત્ સદ્યો દિનાનામેકવિંશતિમ્ ॥ ૩૧॥

એવં વિકટવાક્યં તે શ્રુત્વા દેવર્ષિસત્તમાઃ ।
જગુસ્તં પ્રણિપત્યૈવ ભક્તિયુક્તાશ્ચ શક્તયઃ ॥ ૩૨॥

દેવર્ષય ઊચુઃ ।
કામાસુરં મહાવીર્યં શાન્ત્યા યુક્તં ગજાનન ।
દૃષ્ટ્વા સર્વે ચ સન્તુષ્ટા ભવામો નાત્ર સંશયઃ ॥ ૩૩॥

અધુના કર્મસંયુક્તા ભવિષ્યન્તિ દ્વિજાદયઃ ।
દેવાઃ સ્વપદસંસ્થાસ્તુ સ્વસ્વધર્મયુતા જનાઃ ॥ ૩૪॥

જાતં વરસ્ય કૃત્યં યદધુના કિં વૃણીમહે ।
તવ ભક્તિં સ્થિરાં દેહિ યથા કામભયં ન હિ ॥ ૩૫॥

તથેતિ તાનુવાચૈવ વિકટોઽતર્દધે તતઃ ।
દેવર્ષયોઽભવંસ્તત્ર સ્થિતાઃ ખેદસમન્વિતાઃ ॥ ૩૬॥

તતો મુનિગણૈઃ સાર્ધં વિકટં દેવસત્તમાઃ ।
સ્થાપયામાસુરાનન્દદાયકં ભક્તિકારિણે ॥ ૩૭॥

હિમાચલસ્ય પ્રાન્તે તત્ સ્થાનં વાયુદિશિ સ્થિતમ્ ।
વિકટસ્ય મહાદેવ્યઃ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૩૮॥

મૂર્તિં દેવર્ષયઃ પૂજ્ય વિકટસ્ય મહાત્મનઃ ।
ગત્વા સ્વસ્વપદેષ્વેતે પુનઃ ક્ષેત્રં સમાયયુઃ ॥ ૩૯॥

અંશેન સ્વાધિકારેષુ સ્થિતા દેવર્ષયો મતાઃ ।
વિકટં પૂર્ણભાવેનાભજંસ્તે ક્ષેત્રવાસિનઃ ॥ ૪૦॥

ચતુરસ્રં મહત્ ક્ષેત્રં દશયોજનવિસ્તૃતમ્ ।

તત્ર મધ્યે સ્વયં સાક્ષાદ્વિકટઃ સંસ્થિતોઽભવત્ ॥ ૪૧॥

ચતુર્દિક્ષુ ચતુર્દેવાઃ શમ્ભુમુખ્યાઃ સ્થિતાસ્તતઃ ।
અન્યે દેવા વામભાગે દક્ષિણે મુનયસ્તથા ॥ ૪૨॥

તીર્થાનિ ક્ષેત્રયુક્તાનિ પશ્ચિમે સંસ્થિતાનિ ચ ।
પુરો ભક્તજનાસ્તત્ર સેવાર્થં સંસ્થિતા બભુઃ ॥ ૪૩॥

મૂષકો વિકટસ્યૈવ સમીપે સ્થાપિતોઽભવત્ ।
વામાઙ્ગે સંસ્થિતા સિદ્ધિર્બુદ્ધિર્વૈ દક્ષિણાઙ્ગકે ॥ ૪૪॥

બ્રહ્મપ્રિયાદિકાસ્તત્ર ગણાઃ સર્વત્ર સંસ્થિતાઃ ।
(Page ખં. ૬ અ. ૩૬ પાન ૧૦૪)
શસ્ત્રહસ્તા ભજન્તે સ્મ વિકટં વિકટપ્રિયાઃ ॥ ૪૫॥

તત્ર વિકટતીર્થં તુ વિખ્યાતમભવત્ પરમ્ ।
જન્તુઃ સ્નાનેન સદ્યશ્ચ સ્વેપ્સિતં લભતે પરમ્ ॥ ૪૬॥

અન્તે મુક્તિમવાપ્નોતિ સ્વાનન્દે નાત્ર સંશયઃ ।
વિકટસ્ય પ્રિયં પૂર્ણં તીર્થં ત્રૈલોક્યવિશ્રુતમ્ ॥ ૪૭॥

અન્યાનિ તીર્થમુખ્યાનિ દેવર્ષીણાં સમન્તતઃ ।
સ્થિતાનિ વિકટક્ષેત્રે સ્નાનેન સુખદાનિ તુ ॥ ૪૮॥

અન્યદેવસ્ય યે ભક્તા મૃતાઃ ક્ષેત્રે ભવન્તિ ચેત્ ।
વિકટસ્ય ચ તે તસ્ય લોકં ગચ્છન્તિ નિશ્ચિતમ્ ॥ ૪૯॥

તત્ર ભોગાન્ પ્રભુક્ત્વા તે લયે સ્વાનન્દગામિનઃ ।
વિકટદર્શનેનૈવ બ્રહ્મભૂતા બભૂવિરે ॥ ૫૦॥

ક્ષેત્રસ્ય યાત્રામાત્રેણેપ્સિતં સર્વં લભેન્નરઃ ।
દર્શનેન તથા તસ્ય વિકટસ્ય ન સંશયઃ ॥ ૫૧॥

વિકટસ્ય ચ યે ભક્તા યત્ર કુત્ર મૃતા યદિ ।
બ્રહ્મભૂતા ન સન્દેહો બભૂવુઃ શાસ્ત્રસમ્મતમ્ ॥ ૫૨॥

ભાદ્રશુક્લચતુર્થ્યાં તુ સા મૂર્તિઃ સ્થાપિતાઽભવત્ ।
વિકટસ્ય તતો મુખ્યા સા બભૂવ તિથિઃ પરા ॥ ૫૩॥

ભાદ્રશુક્લચતુર્થ્યાં તુ મહોત્સવઃ પ્રકીર્તિતઃ ।
વાર્ષિકસ્તત્ર કુર્વન્તિ દેવાદ્યા ભક્તિસંયુતાઃ ॥ ૫૪॥

મધ્યાહ્ને પૂજનં પ્રોક્તં સર્વસિદ્ધિપ્રદાયકમ્ ।
સ્વલ્પસિદ્ધિદમાદ્યં તે જ્ઞાતવ્યં શાસ્ત્રમાર્ગતઃ ॥ ૫૫॥

ધન્યાસ્તે પુરુષા લોકે પશ્યન્તિ વિકટં પરમ્ ।
કૃતકૃત્યા મહાદેવ્યો મતા વેદેષુ નિત્યદા ॥ ૫૬॥

તત્ર દેવર્ષયો નાનાઽન્યે ક્ષેત્રે વાસકારકાઃ ।
ભજન્તે વિકટં નિત્યં હર્ષયુક્તાઃ સ્વભાવતઃ ॥ ૫૭॥

વિકટસ્ય ચરિત્રાણિ કથયન્તિ પરસ્પરમ્ ।
સાશ્રુનેત્રાઃ સ રોમાઞ્ચા ભવન્તે ભક્તિભાવતઃ ॥ ૫૮॥

નરદેહં સમાસાદ્ય ન દૃષ્ટો વિકટો જનૈઃ ।
નિષ્ફલં જીવિતં તેષાં પશુતુલ્યસ્વભાવિનામ્ ॥ ૫૯॥

એતત્ સઙ્ક્ષેપતઃ પ્રોક્તં માહાત્મ્યં ક્ષેત્રસમ્ભવમ્ ।
વિસ્તરેણાયુતૈર્વર્ષૈર્ન સમર્થો ભવામ્યહમ્ ॥ ૬૦॥

અન્યે દેવમુખા દેવ્યો યોગિનો વેદમુખ્યકાઃ ।
ન સમર્થા વર્ણયિતું ભવન્તે વર્ષકોટિભિઃ ॥ ૬૧॥

એવં નાનાઽવતારાન્ સ ધૃત્વા ધર્મધરઃ પ્રભુઃ ।
વિકટઃ કલયા દેવ્યો રક્ષતિ સ્મ ચરાચરમ્ ॥ ૬૨॥

એતદ્વિકટમાહાત્મ્યં યઃ શ‌ૃણોતિ નરોત્તમઃ ।
પઠેદ્વા સ લભેત્ સર્વમન્તે બ્રહ્મમયો ભવેત્ ॥ ૬૩॥

ન કામસ્ય ભયં તસ્ય ભવેદ્દેવ્યઃ કદાચન ।
કામહીનઃ સ્વભાવેન લભેત્ કામાન્ વિશેષતઃ ॥ ૬૪॥

એવં કામં નિગૃહ્યૈવ સ્વવશં તં ચકાર હ ।
વિકટસ્તત્ સમાખ્યાતં કિં ભૂયઃ શ્રોતુમિચ્છથ ॥ ૬૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે વિકટાવતારચરિતસમાપ્તિવર્ણનં નામ ષટ્ત્રિંશત્તમોઽધ્યાયઃ ॥ ૬.૩૬
(Page ખં. ૬ અ. ૩૭ પાન ૧૦૫)

## ૬.૩૭ ગુણેશાવતારવર્ણનં નામ સપ્તત્રિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શક્તય ઊચુઃ ।
વિકટસ્ય ચ માહાત્મ્યં શ્રુત્વા શક્તે વયં પરમ્ ।
હર્ષં પ્રાપ્તા વિશેષેણ યોગામૃતમયં કિલ ॥ ૧॥

તથાપિ દેવિ તૃપ્તિં ન પ્રયામો રસવર્ધિનીમ્ ।
કથાં શ્રુત્વા પુનસ્તાં ચ વદ વૈઘ્નેશ્વરીં પરામ્ ॥ ૨॥

વિકટેન જગન્માતરવતારા ધૃતાઃ પરે ।
તેષાં સઙ્ક્ષેપતો બ્રૂહિ ચરિત્રમવતારજમ્ ॥ ૩॥

આદિશક્તિરુવાચ ।
ગણ્ડકી નગરીપાલશ્ચક્રપાણિર્નૃપોઽભવત્ ।
ઉગ્રા પત્ની ચ તસ્યાસીત્ પાતિવ્રત્યગુણાન્વિતા ॥ ૪॥

ધર્મશીલો વદાન્યશ્ચ રાજા નીતિપરાયણઃ ।
દેવવિપ્રાતિથિપ્રેપ્સુઃ પઞ્ચયજ્ઞકરોઽભવત્ ॥ ૫॥

જિત્વા ભૂમણ્ડલં સર્વં ચકાર વશવર્તિનમ્ ।
સમ્પત્તિં બુભુજે સોઽપિ દેવમાન્યાં વિશેષતઃ ॥ ૬॥

અપત્યં જાયતે યદ્યત્તત્તન્નશ્યતિ તત્ક્ષણાત્ ।
વાન્ધ્યદોષસમાયુક્તૌ દમ્પતી સમ્બભૂવતુઃ ॥ ૭॥

તદર્થં વ્રતદાનાદીંશ્ચકાર વિધિસંયુતઃ ।
તથાપિ સન્તતિં રાજા ન પ્રાપ પરમેશ્વરાત્ ॥ ૮॥

તતો રાજ્યમમાત્યેષુ નિક્ષિપ્યાઽભવદુદ્યતઃ ।
વનં ગન્તું મહાદેવ્યઃ સસ્ત્રીકઃ શોકસંયુતઃ ॥ ૯॥

એતસ્મિન્નન્તરે તત્ર શૌનકો મુનિસત્તમઃ ।
યદૃચ્છયા યયૌ યોગી તં નૃપં વિચરન્ પરઃ ॥ ૧૦॥

ભાનોસ્તેનોપદિષ્ટં સ વ્રતં ચક્રે નરાધિપઃ ।
તુષ્ટસ્તેન રવિઃ સ્વપ્ને રાજ્ઞ્યાં ગર્ભં સમાદધે ॥ ૧૧॥

સૂર્યતેજોયુતં ગર્ભં ન ક્ષમા સમ્બભૂવ હ ।
ધર્તું દાહયુતોગ્રા સા સમુદ્રે તં તતોઽત્યજત્ ॥ ૧૨॥

તત્ર પુત્રો બભૂવાપિ ત્રિનેત્રશ્ચક્રધારકઃ ।
જલં સંશોષયામાસ સમુદ્રસ્ય વિશેષતઃ ॥ ૧૩॥

તતો બ્રાહ્મણરૂપેણ ચક્રપાણિં સમાયયૌ ।
સમુદ્રઃ કથયામાસ વૃત્તાન્તં પુત્રસમ્ભવમ્ ॥ ૧૪॥

દત્વા પુત્રં સમુદ્રસ્ત્વન્તર્દધે હર્ષિતોઽભવત્ ।
નૃપઃ સર્વજનૈઃ સાર્ધં જાતકર્માઽકરોદ્ દ્વિજૈઃ ॥ ૧૫॥

સિન્ધુર્નામ્ના દ્વિજૈઃ પુત્રઃ કૃતસ્તસ્ય વિશેષતઃ ।
અપારવીર્યયુક્તત્વાત્ સોઽપિ બલયુતોઽભવત્ ॥ ૧૬॥

આજ્ઞાં ગૃહ્ય વનાયૈવ તપોઽર્થં માર્ગમધ્યગઃ ।
કાવ્યઃ સૌરં દદૌ મન્ત્રં વિધિયુક્તં તુ સિન્ધવે ॥ ૧૭॥

એકપાદમધિષ્ઠાય તતાપ તપ ઉત્તમમ્ ।
નિરાહારઃ સ્વભાવેન તોષયામાસ કાશ્યપમ્ ॥ ૧૮॥

દ્વિસહસ્રે તુ વર્ષેષુ સવિતા વરદોઽભવત્ ।
ત્રૈલોક્યવિભવં તસ્મૈ દદાવમૃતપાનકમ્ ॥ ૧૯॥

ત્રિગુણૈર્હીનભાવેન તિષ્ઠતિ બ્રહ્મશાસ્ત્રગમ્ ।
દેહં ધૃત્વાઽમૃતં સોઽપિ નિષ્કાશ્ય ત્વાં હનિષ્યતિ ॥ ૨૦॥

એવમુક્ત્વા સ્વભક્તં તુ સવિતાંઽતર્દધે તદા ।
હર્ષયુક્તઃ સ્વયં સિન્ધુઃ સ્વગૃહં પ્રત્યપદ્યત ॥ ૨૧॥

પિતૃભ્યાં માનિતોઽત્યન્તં શુશુભે તેજસા યુતઃ ।
તસ્મૈ રાજ્યં દદૌ રાજા સસ્ત્રીકો વનગોઽભવત્ ॥ ૨૨॥

તતઃ સિન્ધુર્ધરાં જિગ્યે સપ્તદ્વીપવતીં પરામ્ ।
વરદાનબલેનૈવં જ્ઞાત્વા દૈત્યાસ્તમાયયુઃ ॥ ૨૩॥

શુમ્ભોતિશુમ્ભવૃત્રૌ ચ કમલઃ શઙ્ખ એવ ચ ।
કોલાસુરાદયશ્ચાન્યે તદાજ્ઞાગા બભૂવિરે ॥ ૨૪॥

તૈર્યુતો દેવરાજેન્દ્રાન્ જિગ્યે શમ્ભુમુખાન્ કિલ ।
પપાલ શઙ્કરઃ સદ્યસ્ત્યક્ત્વા કૈલાસમાત્મનઃ ॥ ૨૫॥

વિષ્ણું સૂર્યં વિધીન્દ્રાદીન્ સઙ્ગૃહ્ય સ્વપુરં યયૌ ।

(Page  ખં. ૬ અ. ૩૭ પાન ૧૦૬)
કારાગારે સ ચિક્ષેપ દેવેન્દ્રાન્ બલસંયુતઃ ॥ ૨૬॥

એવં જિત્વા ત્રિલોકાન્ સ રાજ્યં ચક્રે મહાસુરઃ ।
દૈત્યેન્દ્રાન્ સ્થાપયામાસ દેવસ્થાનેષુ સર્વતઃ ॥ ૨૭॥

તતો બહુગતે કાલે ક્રોધયુક્તો મહાસુરઃ ।
દેવતીર્થાદિકાન્ ભઙ્ક્ત્વા દૈત્યઃ કર્મ ત્વલોપયત્ ॥ ૨૮॥

સ્વકીયાં પ્રતિમાં કૃત્વા સ્થાપયદ્ભૂમિમણ્ડલે ।
દેશે દેશે પુરે ગ્રામે પૂજયત્તાં સ માનવૈઃ ॥ ૨૯॥

તતો હાહાકૃતં સર્વૈર્વર્ણાશ્રમયુતૈર્જનૈઃ ।
સ્વાહા સ્વધાદિકં કર્મ નષ્ટં સર્વત્ર શક્તયઃ ॥ ૩૦॥

અધુના તદ્વધોપાયં વદામિ શૃણુત પ્રિયાઃ ।
શઙ્કરો ગણસંયુક્તસ્ત્રિસન્ધ્યાક્ષેત્રમાગમત્ ॥ ૩૧॥

ગૌતમાદ્યૈર્યુતસ્તત્ર વાસં સસ્ત્રીક આકરોત્ ।
ધ્યાનમાસ્થાય વિઘ્નેશમભજદ્ભક્તિસંયુતઃ ॥ ૩૨॥

એકદા સંશયાવિષ્ટા પાર્વતી તં પ્રણમ્ય ચ ।
જગાદ શઙ્કરં દેવ્યો વિનયેન સમન્વિતા ॥ ૩૩॥

પાર્વત્યુવાચ ।
ઈશસ્ત્વં સર્વદેવાનાં તેનેશો વિદ્યતે ન ચ ।
તેનેશો વેદવાદેષુ કથિતોઽસિ મહેશ્વર ॥ ૩૪॥

તથાપિ ધ્યાનસંયુક્તો ભજસે કં વિશેષતઃ ।
વદ માં પાદપદ્મસ્ય દાસીં સંશયસંયુતામ્ ॥ ૩૫॥

શિવ ઉવાચ ।
અનીશાશ્ચૈવ દેવેશિ ઈશા યેન વિનિર્મિતાઃ ।
તં ગણેશં ભજામ્યેવ ભક્ત્યા બ્રહ્મપતિં સદા ॥ ૩૬॥

અનીશશ્ચ ગકારો ણકાર ઈશમયઃ સ્મૃતઃ ।
તયોઃ સ્વામી ગણેશાનઃ પશ્ય વેદે શુચિસ્મિતે ॥ ૩૭॥

તસ્ય તદ્વચનં શ્રુત્વા પાર્વતી વિનયાન્વિતા ।
જગાદ તસ્ય પ્રાસ્યર્થં વચનં શકરં પ્રતિ ॥ ૩૮॥

પાર્વત્યુવાચ ।
એતાદૃશં ગણેશં ચેન્ન જાનામિ કદાચન ।
પ્રાપ્ત્યર્થં વદ મુખ્યં મે ચોપાયં સાધયામ્યહમ્ ॥ ૩૯॥

શિવ ઉવાચ ।
એકાક્ષરં ગૃહાણ ત્વં સવિધિં ચ તપઃ કુરુ ।
ધ્યાત્વા ગજાનનં દેવં તતઃ સિદ્ધિમવાપ્સ્યસિ ॥ ૪૦॥

એવમુક્ત્વા દદૌ તસ્યૈ મન્ત્રં ગણપતેઃ પરમ્ ।
તં પ્રણમ્ય યયૌ દેવી લેખનાદ્રિં મનોહરમ્ ॥ ૪૧॥

અવાયુભક્ષણેનૈવ તપસા ધ્યાનશાલિના ।
તયા સંરાધિતો ઢુણ્ઢિર્વરદશ્ચ બભૂવ હ ॥ ૪૨॥

યયૌ વર્ષશતે દેવીં વરં યાચેતિ સોઽબ્રવીત્ ।
તયા સંયાચિતો દેવ્યા પુત્રો મે ભવ વિઘ્નપ ॥ ૪૩॥

તત્ર તે સેવનં નાથ કરિષ્યામિ વિશેષતઃ ।
માતા પિતા ભવિષ્યાવો બન્ધહીનૌ સુતે ત્વયિ ॥ ૪૪॥

તથેતિ પાર્વતીં દત્વા વરં સોંઽતર્હિતોઽભવત્ ।
દેવી વિઘ્નેશ્વરં તત્ર સ્થાપયામાસ વિપ્રપૈઃ ॥ ૪૫॥

પૂજયિત્વા ગણેશાનં યયૌ સા શઙ્કરં તતઃ ।
વૃત્તાન્તં કથયામાસ સોઽપિ સંહર્ષિતોઽભવત્ ॥ ૪૬॥

તતઃ સા તન્મના જાતા સસ્માર વરદં પ્રભુમ્ ।
સર્વત્ર ગણરાજં તં દદર્શ ભાગ્યગૌરવાત્ ॥ ૪૭॥

તતો ભાદ્રપદે માસિ કૃત્વા મૂર્તિં પુપૂજ હ ।
શઙ્કરેણ યુતા દેવી મધ્યાહ્ને શુક્લપક્ષગે ॥ ૪૮॥

ચતુર્થ્યાં સોમવારે તુ સ્વાતીનક્ષત્રસંયુતે ।
સચેતનાઽભવન્ મૂર્તિર્વિકટસ્ય વરપ્રદા ॥ ૪૯॥

તેજસા ધર્ષિતૌ દેવૌ કિઞ્ચિત્ દ્રષ્ટું ન શેકતુઃ ।
સ્તુતસ્તાભ્યાં તતઃ સૌમ્યતેજોયુક્તો બભૂવ હ ॥ ૫૦॥

શિવો દદર્શ તં તત્ર ષડ્ભુજં શશિસન્નિભમ્ ।
(Page ખં. ૬ અ. ૩૮ પાન ૧૦૭)

જાતકર્માદિકં સર્વં ચક્રતુર્બ્રાહ્મણૈઃ પરૌ ॥ ૫૧॥

એકાદશદિને નામ ગુણેશ ઇતિ ચક્રિરે ।
દ્વિજાઃ શિવૌ હર્ષયુતૌ પૂજયામાસતુર્દ્વિજાન્ ॥ ૫૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
વિકટચરિતે ગુણેશાવતારવર્ણનં નામ સપ્તત્રિંશત્તમોઽધ્યાયઃ ॥ ૬.૩૭

## ૬.૩૮ બાલખેલાવર્ણનં નામાષ્ટત્રિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

આદિશક્તિરુવાચ ।
તતઃ સિન્ધુચરાસ્તત્ર ગુપ્તરૂપેણ સંસ્થિતાઃ ।
જ્ઞાત્વા સઙ્કથયામાસુર્વૃત્તાન્તં સિન્ધવે પરમ્ ॥ ૧॥

એતસ્મિન્નન્તરે વાણી બભૂવે તત્ર શક્તયઃ ।
અશરીરા ચ તાં સિન્ધું શુશ્રાવ ભયદાયિનીમ્ ॥ ૨॥

અયં વૈ દૈત્યનાથાશુ ત્વાં હનિષ્યતિ વેગતઃ ।
સ્વસ્વધર્મયુતં સર્વં કરિષ્યતિ ચરાચરમ્ ॥ ૩॥

શ્રુત્વા સમ્મૂર્ચ્છિતો દૈત્યઃ સાવધાનો બભૂવ હ ।
મુહૂર્તેન મહાયત્નૈસ્તતઃ શુશોચ મન્દધીઃ ॥ ૪॥

તં હન્તું પ્રેષયામાસ દૈત્યેન્દ્રાન્ દૈત્યનાયકઃ ।
ગુપ્તરૂપેણ તે સર્વે ત્રિસન્ધ્યાક્ષેત્રમાયયુઃ ॥ ૫॥

નાનામાયાં સમાશ્રિત્ય તં હન્તું તાન્ સમાગતાન્ ।
પશુપક્ષ્યાદિરૂપસ્થાન્ જઘાન શિવનન્દનઃ ॥ ૬॥

તતઃ સા પાર્વતી દેવી શુશોચ બહુધા સતી ।
અહા સઙ્ખ્યાતિગા દૈત્યા હતાઃ પુત્રેણ નિત્યદા ॥ ૭॥

તથાપિ દૈત્યા રાજાનઃ કિં કરિષ્યન્તિ મે સુતમ્ ।
હનિષ્યન્તિ ગુણાધીશં ન જાનામિ વિચારતઃ ॥ ૮॥

સાક્ષાદ્બ્રહ્મપતિઃ પૂર્ણઃ પુત્રો મે પ્રબભૂવ હ ।
ભાગ્યહીનપ્રભાવેણ ગમિષ્યતિ મિષેણ કિમ્ ॥ ૯॥

તતો માયાં ગુણેશાનશ્ચકાર મોહિનીં પરામ્ ।

તયા મોહયુતા દેવી પુત્રં મેને ગણેશ્વરમ્ ॥ ૧૦॥

એતસ્મિન્નન્તરે યોગી મરીચિર્ગણપં ભજન્ ।
પ્રાર્થયામાસ દેવેશં દર્શનં દેહિ વિઘ્નપ ॥ ૧૧॥

તતઃ સોઽપિ મહાયોગી શુશ્રાવ સ્વવચોઽમલમ્ ।
શિવપુત્રત્વમાપન્નો ગણેશસ્તં વિલોકય ॥ ૧૨॥

શ્રુત્વા સમાગતં હર્ષાત્ પાર્વતી તં દદર્શ હ ।
પ્રણમ્યાપૂજ્ય સમ્ભોજ્ય પ્રાર્થયામાસ તં મુનિમ્ ॥ ૧૩॥

ત્વં સાક્ષાદ્બ્રહ્મભૂતશ્ચ ન ગચ્છસિ મમાશ્રમમ્ ।
ત્યક્ત્વા તીર્થાદિકં વિપ્ર ગણેશભજને રતઃ ॥ ૧૪॥

યથા વિઘ્નહરો દેવસ્તથા ત્વમપિ નિશ્ચિતમ્ ।
અતસ્ત્વાં પ્રાર્થયે સ્વામિન્ પુત્રં મે રક્ષ રક્ષયા ॥ ૧૫॥

દૈત્યાદીનાં સમૂહશ્ચ સર્વદા કાલધિક્ કૃતામ્ ।
સમાયાતિ ગણેશાનં હન્તું ભવન્તિ તે મૃતાઃ ॥ ૧૬॥

અસ્માકં કુલદેવસ્તુ વિઘ્નેશો નાત્ર સંશયઃ ।
સ રક્ષતિ મુને પુત્રં મમ નો ચેન્ મૃતો ભવેત્ ॥ ૧૭॥

શઙ્કરેણ ગણેશાનઃ સેવિતોઽભૂન્ મહામુને ।
(Page ખં. ૬ અ. ૩૮ પાન ૧૦૮)
તસ્ય પુણ્યં સુતં મે તુ રક્ષત્યત્ર ન સંશયઃ ॥ ૧૮॥

પાર્વતીવચનં શ્રુત્વા વિસ્મિતોઽભૂન્ મહામુનિઃ ।
સાક્ષાચ્છક્તિરિયં ભ્રાન્તા સુતં જાનાતિ વિઘ્નપમ્ ॥ ૧૯॥

ગણેશકવચં તસ્મૈ દદૌ શમ્ભુસુતાય સઃ ।
તં પ્રણમ્ય ચ સંસ્તુત્ય યયૌ સ્વસ્યાશ્રમં મુનિઃ ॥ ૨૦॥

તથાપિ દૈત્યરાજાન્ સ તં હન્તું નિત્યમાગતાન્ ।
નાનાવેષધરાન્ વીક્ષ્ય જઘ્ને વૈ બાલખેલતઃ ॥ ૨૧॥

એકદા પાર્વતી પ્રાતઃ સમુત્થાય શિવે રતા ।
મૂર્તિં લિઙ્ગમયીં કૃત્વા વામહસ્તે દધાર તામ્ ॥ ૨૨॥

આવાહ્ય શઙ્કરં તસ્યાં પૂજને સંરતાઽભવત્ ।
એતસ્મિન્નન્તરે તત્ર ગુણેશોઽભવદુત્થિતઃ ॥ ૨૩॥

સ્તન્યં દેહિ જગાદાઽસૌ પાર્વતીં સા તમબ્રવીત્ ।
પૂજયિત્વા મહેશાનં દાસ્યામિ સ્તનપાનકમ્ ॥ ૨૪॥

તતસ્તાં સ જગાદૈવ કિમર્થં પૂજને રતા ।
માં ત્યક્ત્વા તેઽધિકં દેવિ દદતે શઙ્કરઃ કુતઃ ॥ ૨૫॥

સ્તન્યં દેહિ ચ મે માતસ્તત્રાનન્તશિવાદયઃ ।
સન્તુષ્ટાઃ પ્રભવિષ્યન્તિ બ્રહ્માણિ શૈલનન્દિનિ ॥ ૨૬॥

તથાપિ હાસ્યસંયુક્તા ન દદૌ સ્તનપાનકમ્ ।
તતો રોષસમાવિષ્ટો મયૂરેશો બભૂવ હ ॥ ૨૭॥

તલાઘાતેન દેવ્યાઃ સ હસ્તસ્થં શિવલિઙ્ગકમ્ ।
પાતયામાસ ભૂમ્યાં તદ્ભગ્નં બભૂવ શક્તયઃ ॥ ૨૮॥

તતોઽતિદુઃખસંયુક્તા પાર્વતી વિકટં પુનઃ ।
જઘાન તલઘાતેન મહાક્રોધવતી પરમ્ ॥ ૨૯॥

તતો ગણેશ્વરઃ ક્રુદ્ધઃ સમાગત્ય સ્વમાતરમ્ ।
દદંશાઙ્ગુલિકાં તસ્યા રક્તં સુસ્રાવ ચોલ્બણમ્ ॥ ૩૦॥

હાહાકારરવાં તાં સ ત્યક્ત્વા પપાલ ભીતિતઃ ।
ભીતીનાં ભયદાતાઽપિ બાલક્રીડાં પ્રદર્શયન્ ॥ ૩૧॥

દૃષ્ટ્વા રુરોદાતિદુઃખસંયુક્તા શઙ્કરપ્રિયા ।
પ્રાણપ્રતિષ્ઠયા યુક્તં ભગ્નં લિઙ્ગં શિવસ્ય ચ ॥ ૩૨॥

શિવહત્યાસમં પાપં મયા પ્રાપ્તં ન સંશયઃ ।
અન્યત્પતિવધે જાતં તદેવાપ્યધુના કૃતમ્ ॥ ૩૩॥

અયં પુત્રો ગુણેશો મે નરકસ્ય પ્રદો મતઃ ।
વન્ધ્યાહં ચેત્તદા દૈવં ધન્યં મે નાત્ર સંશયઃ ॥ ૩૪॥

અધુના દુઃખિતાઽહં વૈ સ્મૃત્વા હૃદિ ગજાનનમ્ ।
દેહત્યાગં કરિષ્યમિ વિઘ્નરાજ નમોઽસ્તુ તે ॥ ૩૫॥

ગણેશસ્મરણેનૈવ બુદ્ધિભેદો બભૂવ હ ।
દદર્શ ગણરાજં તં સમીપે પુત્રરૂપિણમ્ ॥ ૩૬॥

યષ્ટિહસ્તા યયૌ દેવી હન્તું પુત્રં પરાત્પરમ્ ।

પપાલ ભયસંયુક્તો ગણેશસ્તાં વિલોક્ય ચ ॥ ૩૭॥

સા જગ્રાહ સ્વપુત્રં તં ધાવયિત્વા શિવપ્રિયા ।
માયાં ચકાર વિઘ્નેશઃ શિવરૂપો બભૂવ હ ॥ ૩૮॥

મોહિતા શઙ્કરં દેવી માયયા દૃશ્ય દુઃખિતા ।
કિમર્થં યષ્ટિહસ્તાઽહં મહેશં હન્તુમુદ્યતા ॥ ૩૯॥

ત્યક્ત્વા તં દુઃખિતાઽત્યન્તં દેહત્યાગે સમુદ્યતા ।
બભૂવ ગણરાજોઽપિ પુનઃ પુત્રસ્વરૂપધૃક્ ॥ ૪૦॥

પલન્તં ભયસંયુક્તં દેવી હન્તું સમુદ્યતા ।
યયૌ તમનુ વૈ સોઽપિ પપાલ વનગોઽભવત્ ॥ ૪૧॥

એતસ્મિન્નન્તરે તત્ર દૈત્યઃ કર્દમસંજ્ઞિતઃ ।
શૈવો દ્વિજસ્વરૂપેણ બાલં જગાદ ચાગતઃ ॥ ૪૨॥

કિમર્થં પુત્ર પલસિ રક્ષામિ ત્વાં ન સંશયઃ ।
યત્ર માતા ન જાનાતિ તત્ર તસ્માત્ સ્થિરો ભવ ॥ ૪૩॥

(Page ખં. ૬ અ. ૩૮ પાન ૧૦૯)
તથેતિ બાલભાવેન ગુણેશેન કૃતં વચઃ ।
બાલં ?જિગેલ ગૃહ્યાસૌ હર્ષયુક્તો બભૂવ હ ॥ ૪૪॥

અહો સિન્ધોર્મહાશત્રુર્મયા સમ્ભક્ષિતોઽભવત્ ।
સર્વેષાં દૈત્યમુખ્યાનાં ભયમદ્ય પ્રણાશિતમ્ ॥ ૪૫॥

એતસ્મિન્નન્તરે તત્ર જગદમ્બા તમાયયૌ ।
શૈવં દ્વિજં પ્રદૃશ્યૈવ પ્રણનામ જગાદ ચ ॥ ૪૬॥

પાર્વત્યુવાચ ।
સ્વામિન્ મમ સુતઃ કુત્ર ગુપ્તો બભૂવ સન્નિધૌ ।
ત્વદીયે નાત્ર સન્દેહઃ પાદં પશ્યામિ નો પુરઃ ॥ ૪૭॥

પાદમાર્ગેણ તં વિપ્ર ગૃહીતું ચાગતાઽભવમ્ ।
પરશ્વાદિકચિહ્નેન વદ સત્યં મહામતે ॥ ૪૮॥

દ્વિજ ઉવાચ ।
ન દૃષ્ટઃ શૈલજે પુત્રો મયા તવ ન સંશયઃ ।
શિવસ્ય શપથં કૃત્વા વદામિ પશ્ય પુત્રકમ્ ॥ ૪૯॥

તતોઽતિદુઃખસંયુક્તા સસ્માર દ્વિરદાનનમ્ ।
તતસ્તસ્ય મુખામ્ભોજાન્નિઃસૃતો ગણનાયકઃ ॥ ૫૦॥

નિઃસૃત્ય મુષ્ટિઘાતેન ગુણેશેન હતોઽસુરઃ ।
સ મમાર મહાદુષ્ટોઽષ્ટાદશયોજનોઽભવત્ ॥ ૫૧॥

તતઃ સા હર્ષિતાઽત્યન્તં ક્રોધહીના બભૂવ હ ।
પુત્રં ગૃહ્ય યયૌ દેવી સ્વાશ્રમં ગૃહગાઽભવત્ ॥ ૫૨॥

પુત્રઃ પપાત ભૂપૃષ્ઠેઽલોઽયત્તત્ર શક્તયઃ ।
પુનઃ પુનઃ સ જૃમ્ભાં ચ ચકાર વિકટાનનઃ ॥ ૫૩॥

તં તાદૃશં નિરીક્ષ્યૈવ પાર્વતી દુઃખસંયુતા ।
કિં જાતં મે સુતસ્યાદ્ય કિં ભવિષ્યતિ વિઘ્નપ ॥ ૫૪॥

તતઃ સા તન્મુખે વિશ્વં દદર્શ ભયસઙ્કુલા ।
અનન્તાણ્ડસમાયુક્તં પપાત ધરણીતલે ॥ ૫૫॥

સ્વગુરું શઙ્કરં સા તુ સસ્માર સ્વેષ્ટદેવકમ્ ।
ગણેશં તેન મોહેન હીના બભૂવ પાર્વતી ॥ ૫૬॥

વિચારમકરોદ્દેવી ગણેશોઽયં સુતોઽભવત્ ।
તં ત્યક્ત્વા લિઙ્ગસેવાયાં નિરતા મૂર્ખવત્ કિલ ॥ ૫૭॥

પતિભાવેન દેવેશં શઙ્કરં દેહધારિણમ્ ।
ભજામિ દેવભાવેન ગણેશં તચ્ચ વિસ્મૃતમ્ ॥ ૫૮॥

સ્તનપાનં ગણેશાય ન દત્તં મૂઢભાવતઃ ।
અનન્તા વૈ મયા યત્ર સંસ્થિતાઃ શઙ્કરાદયઃ ॥ ૫૯॥

તેન તુષ્ટેન સર્વે તે સન્તુષ્ટાઃ સમ્ભવન્તિ ચ ।
ગણેશો બ્રહ્મણાં નાથઃ સોઽપિ સન્તુષ્ટ એવ વૈ ॥ ૬૦॥

અહોઽયં શિવરૂપશ્ચ મયા દૃષ્ટઃ પ્રસન્નિધૌ ।
ગૃહીતસ્તત્ર ચિત્રં તુ મયા ન જ્ઞાયતે કથમ્ ॥ ૬૧॥

અતઃ પરં ગણેશાનં પુત્રભાવેન ચાગતમ્ ।
સર્વભાવેન નિત્યં તં ભજિષ્યામિ હિતાવહમ્ ॥ ૬૨॥

અયં પતિરયં તાતો માતા પુત્રઃ સુહૃત્તથા ।
દેવો બ્રહ્મ ન સન્દેહો ગુણેશો મે સુશાન્તિદઃ ॥ ૬૩॥

એવં નિશ્ચિત્ય સા દેવી સમુત્થાય પ્રણમ્ય તમ્ ।
તુષ્ટાવ હર્ષસંયુક્તા ભક્તિનમ્રાત્મકન્ધરા ॥ ૬૪॥

સ્તુવન્તીં તાં સમાલોક્ય ગણેશો મોહમાદધે ।
તતઃ સમ્મોહિતા દેવી વિસ્મૃતિં પરમાં યયૌ ॥ ૬૫॥

પુત્રભાવેન વિઘ્નેશં લાલયામાસ ગૃહ્ય તમ્ ।
ગૃહકાર્યરતા દેવી બભૂવે પૂર્વવદ્યથા ॥ ૬૬॥

શક્તય ઊચુઃ ।
બાલક્રીડાર્થમુદ્યુક્તો ગણેશો બ્રહ્મનાયકઃ ।
પુત્રભાવં સમાસાદ્ય પુત્રતુલ્યઃ સમાચરત્ ॥ ૬૭॥

કિમર્થમખિલં વિશ્વં નાનાબ્રહ્માણ્ડસંયુતમ્ ।
શિવરૂપં કિમર્થં સ દર્શયામાસ શક્તયે ॥ ૬૮॥

દર્શયિત્વા કિમર્થં સ લોપયામાસ તદ્ભવમ્ ।
જ્ઞાનં કુતૂહલં ચેદં વદ સંશયનાશનાત્ ॥ ૬૯॥

(Page ખં. ૬ અ. ૩૯ પાન ૧૧૦)
આદિશક્તિરુવાચ ।
પુત્રભાવમયી ભક્તિગ્રહણે લાલસઃ સદા ।
વરદાનપ્રભાવેણ તપઃ ફલપ્રદોઽભવત્ ॥ ૭૦॥

કાર્યં કૃત્વા સુરર્ષીણામન્તર્ધાનં કરિષ્યતિ ।
તદા જ્ઞાનસ્ય દેવ્યાસ્તુ સ્મરણં સમ્ભવિષ્યતિ ॥ ૭॥

ગણેશઃ પુત્રભાવેનાગતો મે નાત્ર સંશયઃ ।
અજ્ઞાનેન યુતાઽહં તં સુતં જાનામિ નિશ્ચિતમ્ ॥ ૭૨॥

પુત્રવન્નરદેહસ્થો ગણેશો મે ત્વદર્શયત્ ।
બ્રહ્મસામર્થ્યમાહાત્મ્યં તથાપિ જ્ઞાયતે ન સઃ ॥ ૭૩॥

તેનાતિભક્તિસંયુક્તા ભજિષ્યતિ ગજાનનમ્ ।
તદર્થં ગણરાજોઽપિ કૌતુકં તત્ર ચાકરોત્ ॥ ૭૪॥

એવં નાનાવિધાન્ દૈત્યાન્ સ્વયં હત્વા ચ શક્તયઃ ।
શિવયોઃ સેવનં ચક્રે પુત્રભાવપ્રભાવતઃ ॥ ૭૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે બાલખેલાવર્ણનં નામાષ્ટત્રિંશત્તમોઽધ્યાયઃ ॥ ૬.૩૮

## ૬.૩૯ કમલાસુરવધો નામૈકોનચત્વારિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

આદિશક્તિરુવાચ ।
ગૌતમાદિમુનીનાં સ સુતૈર્નિત્યં ગણેશ્વરઃ ।
ચિક્રીડ બાલમધ્યસ્થો બાલવન્નાત્ર સંશયઃ ॥ ૧॥

તેષાં મુનિસુતાનાં સ તિરસ્કારાદિકં કદા ।
અસહદ્ધર્ષસંયુક્તો મિત્રભાવપ્રદર્શનાત્ ॥ ૨॥

તેપુઃ યે સખ્યભક્ત્યર્થં તપસ્તે સતતં નરાઃ ।
સેવાર્થમભવન્ સર્વે મુનિપુત્રસ્વભાવતઃ ॥ ૩॥

કશ્યપસ્ય સુતો જજ્ઞે મયૂરો વિષ્ણુરવ્યયઃ ।
યજ્ઞાઃ સેવાર્થમુદ્યુક્તો યુયુધે ગણપેન સઃ ॥ ૪॥

સુતો વિનતયા સોઽપિ બોધિતઃ પ્રણનામ તમ્ ।
ગણેશં યાચતે સ્તુત્વા મયૂરઃ સ્મ વરં પરમ્ ॥ ૫॥

આદૌ મયૂરનામ્ના સંયુતં નામ ત્વદીયકમ્ ।
ભવેત્તુ સર્વવિખ્યાતં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૬॥

તથેત્યભૂન્ મયૂરેશો નામ્ના સર્વત્ર શક્તયઃ ।
સોઽપિ વાહનભાવેન સેવાયામાસ વિઘ્નપમ્ ॥ ૭॥

કદાચિત્ દ્વિજપુત્રૈશ્ચ મજ્જિતોઽભૂદ્ ગજાનનઃ ।
જલસ્થં નાગકન્યાસ્તં નિન્યુઃ કામપ્રપીડિતાઃ ॥ ૮॥

પુરા ગણેશમાહાત્મ્યં શ્રુત્વા તેપુઃ તપો મહત્ ।
બ્રાહ્મણ્યઃ પતિભાવેન ગણેશો ભવતુ પ્રભુઃ ॥ ૯॥

ગણેશમન્ત્રસંયુક્તા નાનાઽનુષ્ઠાનતત્પરાઃ ।
તા એવ નાગકન્યાશ્ચ બભૂવુસ્તપસા યુતાઃ ॥ ૧૦॥

શેષવાસુકિમુખ્યૈસ્તા લાલિતાઃ પરમાદરાત્ ।
પત્યર્થં પ્રાર્થિતાઃ સર્વા જગુસ્તાન્નાગમુખ્યકાન્ ॥ ૧૧॥

ગણેશં ભાવસંયુક્તા વૃણીમહિ પતિં વરમ્ ।
નાન્યં કદા મહારાજ ઇચ્છામો હ્યસમર્થકમ્ ॥ ૧૨॥

તચ્છ્રુત્વા શેષમુખ્યાસ્તા જગુઃ કિં હઠસંયુતાઃ ।
બ્રહ્મેશો ગણનાથસ્તુ સ્વાનન્દસ્થો બભૂવ હ ॥ ૧૩॥

(Page ખં. ૬ અ. ૩૯ પાન ૧૧૧)
સ કથં ભવતાં પુત્ર્યો ભવિષ્યતિ પતિઃ પરઃ ।
અભિમાનં પરિત્યજ્ય સમાનં વૃણુત પ્રભુમ્ ॥ ૧૪॥

તેષાં વચનમાકર્ણ્ય ક્રોધયુક્તાઃ કુમારિકાઃ ।
જગુસ્તાંશ્ચ વયં તાતા બ્રહ્મચર્યં વૃણીમહે ॥ ૧૫॥

પૂર્વસંસ્કારયોગેન મયૂરેશં જલસ્થિતમ્ ।
દદૃશુર્નાગકન્યાસ્તં મેનિરે ગણનાયકમ્ ॥ ૧૬॥

નારદસ્ય મુખાચ્છ્રુત્વા શિવપુત્રં ગજાનનમ્ ।
અત્રાગતં પ્રગૃહ્યૈવ વૃણીત વરમુત્તમમ્ ॥ ૧૭॥

સ્વગૃહે ગણનાથં તાઃ સમાનાય્ય સુવિહ્વલાઃ ।
પુપૂજુર્ભક્તિસંયુક્તાઃ પતિભાવેન શક્તયઃ ॥ ૧૮॥

તતઃ સોઽપિ હૃદા ચક્રે દદૌ યોગં સુશાન્તિદમ્ ।
તાભ્યઃ તાં કામહીનાસ્તં સિષેવિરે વિશેષતઃ ॥ ૧૯॥

અકૃત્રિમં સુખં તાભ્યો દદૌ ભક્તિપ્રભાવતઃ ।
દિવાનક્તં બુભુજિરે હ્યત્યન્તં પૌરુષં સુખમ્ ॥ ૨૦॥

એવં કૃત્વા સ્વયં શેષં ગર્વિષ્ઠં મદસંયુતમ્ ।
મર્દયિત્વા યયૌ તત્રાભવન્ દ્વિજસુતાઃ પુરા ॥ ૨૧॥

એવં નાનાવિધાન્યેવ ચરિત્રાણિ ચકાર હ ।
સ સર્વં ગૌતમસ્યાન્નં બુભુજે નાદરેણ ચ ॥ ૨૨॥

ભક્તેભ્યો ભક્તિદાનાર્થં પ્રભુઃ કિં કિં ગજાનનઃ ।
ન કરોતિ મહાદેવ્યો દાસદાસ્યપરાયણઃ ॥ ૨૩॥

ભક્તૈર્યદ્યત્કૃતં ચૈવ તદેવામૃતરૂપકમ્ ।
અભક્તૈઃ સાદરતયા સ કૃતં મન્યતે વિષમ્ ॥ ૨૪॥

તિરસ્કારાદિકં દેવ્યસ્તાડનાદિકમુત્તમમ્ ।

સૌખ્યદં ગણનાથસ્ય બભૂવે ભક્તિમોહતઃ ॥ ૨૫॥

પાર્વતીશિવમુખ્યૈશ્ચાદિતિકશ્યપમુખ્યકૈઃ ।
તિરસ્કૃતસ્તાડિતઃ સોઽમૃતં મેને ગજાનનઃ ॥ ૨૬॥

ભક્તસ્ય વચનાર્થં સ દૈત્યમસ્તકધારકઃ ।
સ્વાઙ્ગચ્છેદકરશ્ચૈવ મલજોઽપિ બભૂવ હ ॥ ૨૭॥

ઇત્યાદિ વિવિધં ચૈવ નીચવદ્ગણનાયકઃ ।
ચકાર કર્મ ભક્ત્યા સમ્મોહિતો મોહનાશનઃ ॥ ૨૮॥

તતો ગૌતમમુખ્યાશ્ચ ગણેશમાયયા યુતાઃ ।
આયયુઃ શઙ્કરં દેવં જગુસ્તં મોહિતા ભૃશમ્ ॥ ૨૯॥

ગૌતમાદ્યા ઊચુઃ ।
મયૂરેશયુતઃ શમ્ભો ગચ્છ ત્વં યત્ર તે રુચિઃ ।
વયં પીડાયુતા નિત્યં ભવામો દૈત્યસઙ્ગમાત્ ॥ ૩૦॥

નિત્યં દૈત્યેન્દ્રમુખ્યાસ્તં મયૂરેશં સમાયયુઃ ।
પ્રહતા માયયા યુક્તા મયૂરેશેન તત્ક્ષણાત્ ॥ ૩૧॥

મૃતા દૈત્યા બભૂવુશ્ચ સ્વસ્વરૂપધરાઃ પ્રભો ।
દશ દ્વાદશ પઞ્ચત્રિશતવિંશતિયોજનમ્ ॥ ૩૨॥

તેષાં દેહપ્રપાતેન ગૃહવૃક્ષાશ્રમાદિકમ્ ।
ભઞ્જતે નિત્યમેવાતોઽસ્માકં કિં કરવામહૈ ॥ ૩૩॥

અતસ્ત્વં સર્વસંયુક્તો ગચ્છ યત્ર ચ તે રુચિઃ ।
અથવા વયમીશાન ત્વાં ત્યક્ત્વા કિં વ્રજામહે ॥ ૩૪॥

તેષાં વચનમાકર્ણ્ય શિવશ્ચિન્તાતુરોઽવદત્ ।
મુનીન્ સર્વાન્ મહાદેવ્યો દેવાનાં પાલકઃ પ્રભુઃ ॥ ૩૫॥

શ્રીશિવ ઉવાચ ।
ભવતામાશ્રમેષ્વદ્યાહં વિપ્રા હ્યાગતોઽભવમ્ ।
મદીયસઙ્ગદોષેણ પીડિતા મુનયઃ પરમ્ ॥ ૩૬॥

સ્વાશ્રમેષુ સદા વિપ્રાઃ સ્થીયતાં સુખભોગિનઃ ।
ગમિષ્યામિ સ્થલેઽન્યત્ર સર્વૈઃ સાકં ન સંશયઃ ॥ ૩૭॥

મયૂરેશસ્ય વિપ્રેશા નિત્યં દુઃખાદિકં પરમ્ ।

દૈત્યેન્દ્રૈઃ ક્રિયતે દૈત્યા હતાસ્તેન મહાબલાઃ ॥ ૩૮॥

નિર્વિઘ્નાર્થં ગણેશસ્ય સ્થાનં બ્રૂત મહર્ષયઃ ।
(Page ખં. ૬ અ. ૩૯ પાન ૧૧૨)
તત્રાહં સસુતો નિત્યં સ્થાસ્યામિ ધ્યાનસંયુતઃ ॥ ૩૯॥

ગૌતમાદ્યા ઊચુઃ ।
ક્ષેત્રં દક્ષિણભાગે તુ વૈઘ્નેશં સર્વસિદ્ધિદમ્ ।
ભૂસ્વાનન્દં વદન્તે તદ્બ્રહ્મસાયુજ્યદાયકમ્ ॥ ૪૦॥

મૂર્તિર્ગણપતેસ્તત્ર સિન્ધુદૂતૈઃ પ્રખણ્ડિતા ।
સિન્ધોશ્ચ પ્રતિમા દુષ્ટૈઃ સ્થાપિતા હર્ષસંયુતૈઃ ॥ ૪૧॥

જનૈસ્ત્યક્તં મહાદેવ દૈત્યસન્ત્રાસતાપિતૈઃ ।
તત્ર ગચ્છ સપુત્રસ્ત્વં વિઘ્નહીનો ભવિષ્યસિ ॥ ૪૨॥

તથેતિ શઙ્કરઃ સર્વૈર્ગણૈર્વિઘ્નેશસંયુતઃ ।
નિર્યયૌ તં મહાદેવ્યો બ્રાહ્મણાઃ પ્રયયુઃ કિલ ॥ ૪૩॥

એતસ્મિન્નન્તરે તત્ર સિન્ધુના પ્રેષિતો મહાન્ ।
કમલાસુરનામા યો દૈત્યપૈરાગતોઽભવત્ ॥ ૪૪॥

બ્રહ્મવિષ્ણુશિવાદીનામજેયં દૈત્યસંયુતમ્ ।
મહામાયં ચ તં દૃષ્ટ્વા પ્રપેલુર્મુનયસ્તતઃ ॥ ૪૫॥

અહો શિવં પરિત્યજ્ય ન સ્થાતું શક્યતે કદા ।
મુનયો દૈત્યનાથૈશ્ચ હતાઃ કુત્ર વ્રજામહે ॥ ૪૬॥

એવં વિચાર્ય તે સર્વે પુનઃ શઙ્કરમાયયુઃ ।
જગુસ્તં ભયભીતાશ્ચ રક્ષ નો દૈત્યનાયકાત્ ॥ ૪૭॥

મયૂરેશેન સંયુક્તો તિષ્ઠ નિત્યં મહેશ્વર ।
નોચેદત્રાનુગાઃ સર્વે વયં તે પ્રભવામહે ॥ ૪૮॥

તેષાં વચનમાકર્ણ્ય ભયભીતઃ સદાશિવઃ ।
જગાદ તાન્ વચો રમ્યં દ્વિજપાલનકારકઃ ॥ ૪૯॥

શ્રીશિવ ઉવાચ ।
કમલાસુરનામાઽયં દૈત્યનાથૈર્મહાબલૈઃ ।
સમાયાતશ્ચ તં જેતું ન ક્ષમોઽહં કદાચન ॥ ૫૦॥

અધુના માં સમાગૃહ્ય કારાગારે મહાબલઃ ।
ક્ષેપયિષ્યતિ નૂનં માં યત્ર વિષ્ણ્વાદયઃ સુરાઃ ॥ ૫૧॥

શિવસ્ય વચનં શ્રુત્વા મયૂરેશસ્તમબ્રવીત્ ।
મા ભયં કુરુ તાત ત્વં હનિષ્યામિ મહાસુરમ્ ॥ ૫૨॥

ત્વં સાક્ષાદ્ગણનાથસ્ય કલાંડશો ભક્તનાયકઃ ।
બ્રાહ્મણા ગાણપત્યાશ્ચ તેષાં વિઘ્નઃ કથં ભવેત્ ॥ ૫૩॥

મરીચિના ગણેશસ્ય કવચં મે મહેશ્વર ।
રક્ષણાર્થં પ્રદત્તં તુ ન ભયં મે ભવિષ્યતિ ॥ ૫૪॥

એવમુક્ત્વા મહાદૈત્યં યયૌ વિઘ્નવિદારણઃ ।
મયૂરોપરિ સંસ્થાય પર્શોઃ શૂલસ્ય ધારકઃ ॥ ૫૫॥

કૃત્વા યુદ્ધં મહાઘોરં ત્રિશૂલેન મહાસુરમ્ ।
ચિચ્છેદ ત્રિવિધં કૃત્વા પાતયામાસ ચાસુરમ્ ॥ ૫૬॥

મસ્તકં મયૂરક્ષેત્રે તદાકારં બભૂવ હ ।
ઉદરં રાજસદને પ્રવાલે જઘનં તથા ॥ ૫૭॥

ત્રિષુ સ્થાનેષુ દૈત્યેન્દ્રઃ પપાત ત્રિવિધોડભવન્ ।
ગણેશ્વરશ્ચૈવ તેષુ સંસ્થિતોડભૂત્ પ્રતાપવાન્ ॥ ૫૮॥

શિવેન મુનિભિઃ સાર્ધં મયૂરેશ્વર આયયૌ ।
ક્ષેત્રે મયૂરસંજ્ઞે તુ તત્રસંસ્થા બભૂવિરે ॥ ૫૯॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે કમલાસુરવધો નામૈકોનચત્વારિંશત્તમોડધ્યાયઃ ॥ ૬.૩૯
(Page ખં. ૬ અ. ૪૦ પાન ૧૧૩)

## ૬.૪૦ વિષ્ણ્વાદિપરાધીનતાદર્શનં નામ ચત્વારિંશત્તમોડધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

આદિશક્તિરુવાચ ।
તત્રાગત્ય મયૂરેશો દૃષ્ટ્વા મૂર્તિસ્થિતં પ્રભુઃ ।
સિન્ધું ક્રોધસમાયુક્તશ્ચૂર્ણયામાસ તત્ક્ષણાત્ ॥ ૧॥

તતોતિભયસંયુક્તા મુનયઃ શઙ્કરાદયઃ ।

કિં ભવિષ્યતિ દૈત્યેભ્યઃ શ્રુત્વા વાર્તાં બભૂવિરે ॥ ૨॥

તત્રાપિ માયયા યુક્તા દૈત્યેન્દ્રાશ્ચ સમાયયુઃ ।
હન્તું શિવસુતં નિત્યં તાન્ જઘાન મયૂરપઃ ॥ ૩॥

તતો વિઘ્નવિનાશાર્થમિન્દ્રયજ્ઞં સમારભત્ ।
શઙ્કરસ્તં મયૂરેશો બભઞ્જ ક્રોધસંયુતઃ ॥ ૪॥

તત ઇન્દ્રઃ સુરેશાનૈર્મયૂરેશમયોધયત્ ।
તં જિત્વા ગણરાજસ્તુ સ્વપુરસ્થો બભૂવ હ ॥ ૫॥

શક્તય ઊચુઃ ।
કારાગારે સ્થિતા દેવાઃ સિન્ધોસ્તે યોદ્ધુમાયયુઃ ।
કથં દેવિ વદાશુ ત્વં સંશયસ્યાપનુત્તયે ॥ ૬॥

આદિશક્તિરુવાચ ।
મેરુસંસ્થા મહેશાના દૈત્યૈઃ સમ્પ્રધૃતાઃ પુરા ।
નિરાધારેષુ સંસ્થાસ્તે પુરેષુ ગણપં યયુઃ ॥ ૭॥

તાન્ ગ્રહીતું ન શક્તાશ્ચ ભવન્તે કેઽપિ શક્તયઃ ।
તેષાં માર્ગં પ્રવક્ષ્યામિ સંશયચ્છેદનાય વઃ ॥ ૮॥

દેવાશ્ચ ત્રિવિધાઃ પ્રોક્તાસ્તત્ત્વાકારાશ્ચ શક્તયઃ ।
તથા કર્મમયા શાસ્ત્રે દેહરૂપા ન સંશયઃ ॥ ૯॥

દીવ્યન્તિ સર્વભાવેષુ તેન દેવાઃ પ્રકીર્તિતાઃ ।
દેવત્વં ત્રિવિધં તેષુ જ્ઞાતવ્યં વેદવાદિભિઃ ॥ ૧૦॥

શતાશ્વમેધયજ્ઞાનાં કર્તેન્દ્રો ભવતિ પ્રિયાઃ ।
તિષ્ઠન્તિ કર્મજા દેવાસ્તાદૃશાઃ કાઞ્ચનાચલે ॥ ૧૧॥

મન્દારાદિષુ સર્વત્ર નગરાણિ દિવૌકસામ્ ।
તાન્ જયન્તિ સમર્થાશ્ચાસુરાદયો ન સંશયઃ ॥ ૧૨॥

બ્રહ્મણો દિવસાન્તે તે મન્વન્તરપરાયણાઃ ।
લયં ગચ્છન્તિ યજ્ઞાનાં ફલં ભુક્ત્વા ન સંશયઃ ॥ ૧૩॥

પુનર્જન્મધરાઃ સર્વે ભવન્તિ નરજાતિષુ ।
કુર્વતે યાદૃશં કર્મ લભન્તે તાદૃશં ફલમ્ ॥ ૧૪॥

અન્યે કર્મમયા દેવા વ્યાપ્ય તે સંસ્થિતાઃ પરાઃ ।

કુર્વતે સ્વાધિકારાંશ્ચ સદા કર્મપરાયણાઃ ॥ ૧૫॥

જઠરાગ્નિસ્તથા બાહ્યાગ્નિરિત્યાદિ દિવૌકસામ્ ।
અધિકારાઃ સમાખ્યાતા યમસ્ય યાતનાદયઃ ॥ ૧૬॥

દૈત્યા ધર્ષયિતું શક્તાસ્તાન્ ભવન્તિ ન કર્મણા ।
સદાઽધિકારસંયુક્તાંસ્તાન્ દેવાન્ પ્રવદન્તિ ચ ॥ ૧૭॥

યોગબલેન યોગીશાસ્તાન્ દેવાંશ્ચાલયન્તિ ચ ।
નાન્યબલેન દેવેશાશ્ચલન્તિ સ્વાધિકારિણઃ ॥ ૧૮॥

બ્રહ્મણો દિવસાન્તે તે ન મૃત્યું દેવસત્તમાઃ ।
લભન્તે વૈ નિરાધારાઃ કર્મરૂપપ્રધારકાઃ ॥ ૧૯॥

મહાલયે લયં દેવા ગચ્છન્ત્યત્ર ન સંશયઃ ।
સલોકપરિવારાસ્તે પુનર્દેહધરા મતાઃ ॥ ૨૦॥

મૃત્યુલોકે નરાઃ સર્વે ભવન્તે કર્મયન્ત્રિતાઃ ।
યાદૃશં કુર્વતે કર્મ લભન્તે તાદૃશં ફલમ્ ॥ ૨૧॥

તત્ત્વરૂપા મહાદેવ્યો દેવા વેદે પ્રકીર્તિતાઃ ।
તે તત્ત્વૈર્વિશ્વમાનન્દાદ્ભાવયન્તિ ચરાચરમ્ ॥ ૨૨॥

ઉત્પત્તિસ્થિસંહારકર્તારઃ સર્વરૂપકાઃ ।
બ્રહ્માકારસ્વભાવેન તિષ્ઠન્તિ જગદીશ્વરાઃ ॥ ૨૩॥

મહાપ્રલયવેલાયાં સ્વવિહારં સમાપ્ય તે ।
યોગનિદ્રાં પ્રકુર્વન્તિ યોગાકારા વિશેષતઃ ॥ ૨૪॥

પુનઃ ક્રીડન્તિ સૃષ્ટ્વા ચ બ્રહ્માણ્ડં દેવનાયકાઃ ।
ન તાન્ યોગબલેનૈવ સમો ધર્ષયિતું ભવેત્ ॥ ૨૫॥

યોગોઽયં દ્વિવિધઃ પ્રોક્તઃ શાસ્ત્રેષુ વિબુધોત્તમૈઃ ।
(Page ખં. ૬ અ. ૪૦ પાન ૧૧૪)
વાયુસાધનજશ્ચૈકઃ પ્રાણાયામેન લભ્યતે ॥ ૨૬॥

તેન યોગેન તત્ત્વસ્થા દેવાસ્તદ્વશવર્તિનઃ ।
ન ભવન્તિ કદા દેવ્યો જ્ઞાતવ્યં શાસ્ત્રમાર્ગતઃ ॥ ૨૭॥

સમ્પ્રજ્ઞાતાઽસમ્પ્રજ્ઞાતમયો યોગઃ પ્રકીર્તિતઃ ।
દ્વિતીયો બ્રહ્મભૂતાખ્યો યોગિભિઃ સાધ્યતે સદા ॥ ૨૮॥

તેન યોગબલેનૈવ તાન્ જયન્તિ સુરાન્નરાઃ ।
સાધ્યાઃ સર્વે ભવન્ત્યેવ દેવાસ્તદ્વશવર્તિનઃ ॥ ૨૯॥

યં યમિચ્છતિ યોગીન્દ્રસ્તં તં કુર્વન્તિ દેવપાઃ ।
પ્રારબ્ધં ચાલયન્ત્યેવ યોગિવશ્યપરાયણાઃ ॥ ૩૦॥

યદા તેષાં વિહારેષુ સંસક્તા યોગિનોઽભવન્ ।
યોગભ્રષ્ટા ભવન્ત્યેવ જન્મમૃત્યુપરાયણાઃ ॥ ૩૧॥

યોગિનાં યોગભાવેન ભયં ગચ્છન્તિ દેવતાઃ ।
તત્ત્વરૂપા ન સન્દેહો જ્ઞાતવ્યં વેદવાદતઃ ॥ ૩૨॥

કર્મૈકં ત્રિવિધસ્થાનામેકૈકાશ્રિતરૂપિણામ્ ।
સેવનાદ્ભઞ્જનાત્તસ્ય દ્વન્દ્વયુક્તા ભવન્તિ તે ॥ ૩૩॥

અધુના પ્રકૃતં દેવ્યઃ શ઼ૃણુધ્વં ત્વેકચેતસઃ ।
અવતારચરિત્રં તુ વિકટસ્ય મહાત્મનઃ ॥ ૩૪॥

પ્રદ્રષ્ટું સ કદાચિત્તં વિધિઃ ક્ષેત્રે મયૂરકે ।
સમાયયૌ સ તં દૃષ્ટ્વા મોહયુક્તો બભૂવ હ ॥ ૩૫॥

વિચારમકરોચ્ચિત્તે શિવપુત્રોઽયમુચ્યતે ।
અસ્મૈ ન નમનં કાર્યં મયા જ્યેષ્ઠેન શક્તયઃ ॥ ૩૬॥

અયં ગણેશ્વરઃ સાક્ષાત્ કથિતો નાત્ર સંશયઃ ।
પરીક્ષાં ગણરાજસ્ય કૃત્વા પશ્ચાન્નમામ્યહમ્ ॥ ૩૭॥

એવં વિચાર્ય બ્રહ્માણ્ડં શિવશક્તિસમન્વિતમ્ ।
અન્તર્ધાય સ્થિતો બ્રહ્મા ગુપ્તરૂપેણ સર્વગઃ ॥ ૩૮॥

મયૂરેશસ્તતસ્તચ્ચ જ્ઞાત્વા ચરાચરં જગત્ ।
નિર્મમે બ્રહ્મદેવસ્તં જગામ શરણં પુનઃ ॥ ૩૯॥

તતઃ શ્વાસેન વિઘ્નેશો બ્રહ્માણં સ્વોદરે નયત્ ।
તત્રાનન્તાણ્ડકં દૃષ્ટ્વા બભ્રામ યત્ર તત્ર સઃ ॥ ૪૦॥

ગતે વર્ષસહસ્રે ચ બ્રહ્માણં શ્વાસવાયુના ।
બહિર્નિઃષ્કાસયામાસ મયૂરેશો મહાયશાઃ ॥ ૪૧॥

બહિરાગત્ય વેધાઃ સ ક્ષણમેકં દદર્શ હ ।

તતોઽતિવિસ્મિતો ભૂત્વા પુનસ્તં પ્રણતોઽભવત્ ॥ ૪૨॥

સ્તુત્વા તં સ જગામૈવ સ્વસ્થલં હર્ષસંયુતઃ ।
મયૂરક્ષેત્રે તદાદિ સ્થિતા બ્રહ્મકમણ્ડલુઃ ॥ ૪૩॥

એવં વિધેર્મદં હત્વા ચિક્રીડ દ્વિજબાલકૈઃ ।
મયૂરેશો જગત્સ્રષ્ટા ભક્તેભ્યઃ સર્વદાયકઃ ॥ ૪૪॥

તતઃ કદાચિદ્ભાદ્રી સા ચતુર્થી શુક્લપક્ષગા ।
સમાગતા ચ તસ્યાં તે મૃણ્મયીં ચક્રુરાદૃતાઃ ॥ ૪૫॥

સ્વે સ્વે ગૃહે તુ સર્વે તે મુનયઃ શઙ્કરાદયઃ ।
ગણા ગણેશ્વરં કૃત્વા પૂજયામાસુરાદરાત્ ॥ ૪૬॥

મયૂરેશઃ સ્વયં ચક્રે મૂર્તિં શુણ્ડાદિચિહ્નિતામ્ ।
સમ્પૂજ્યાનમ્ય તુષ્ટાવ કૃત્વા કરપુટં પુરઃ ॥ ૪૭॥

મયૂરેશ ઉવાચ ।
નમસ્તે ગણનાથાય સર્વવિઘ્નવિદારિણે ।
ભક્તાનાં દુષ્ટરૂપેભ્યો વિઘ્નદાત્રે નમો નમઃ ॥ ૪૮॥

બ્રહ્મણાં પતયે તુભ્યં સર્વસિદ્ધિપ્રદાયિને ।
અમેયમાયયા યુક્તાય નમો ઢુણ્ઢયે નમઃ ॥ ૪૯॥

વક્રતુણ્ડાય વક્રાણાં નાશકાર પરાત્મને ।
લમ્બોદરાય સર્વેષાં જઠરસ્થાય તે નમઃ ॥ ૫૦॥

ચિન્તામણિસ્વરૂપાય પઞ્ચચિત્તપ્રધારિણે ।
હેરમ્બાય પરેશાનાં દીનાનાં બીજરૂપિણે ॥ ૫૧॥

યોગેશાય સદા શાન્તિદાત્રે શાન્તિમયાય ચ ।
(Page ખં. ૬ અ. ૪૦ પાન ૧૧૫)
શાન્તીનાં શાન્તિરૂપાય ગણેશાય નમો નમઃ ॥ ૫૨॥

જ્યેષ્ઠરાજાય જ્યેષ્ઠાનાં પૂજ્યાય વિકટાય તે ।
જ્યેષ્ઠેભ્યઃ પદદાત્રે વૈ માત્રે પિત્રે નમો નમઃ ॥ ૫૩॥

અનાદયે ચ સર્વેષામાદિરૂપાય વિઘ્નપ ।
વિઘ્નાનાં વિઘ્નરૂપાય સર્વસત્તાત્મને નમઃ ॥ ૫૪॥

સ્વાનન્દવાસિને તુભ્યં સંયોગાયોગમૂર્તયે ।

સર્વપૂજ્યાય ભક્તેભ્યો ભક્તિદાત્રે નમો નમઃ ॥ ૫૫॥

મહોદરાય ભીમાય પાપિનાં દણ્ડધારિણે ।
સ્વધર્મનિરતેભ્યસ્તુ સુખદાય નમો નમઃ ॥ ૫૬॥

મયૂરવાહનાયૈવ મયૂરેશ્વર તે નમઃ ।
આખુવાહાય સર્વેશ પરાત્પરાય વૈ નમઃ ॥ ૫૭॥

કિં સ્તૌમિ ત્વાં ગણાધીશ યોગાકારસ્વરૂપિણમ્ ।
શિવાદયો ન સંસ્તોતું સમર્થા વેદમુખ્યકાઃ ॥ ૫૮॥

રક્ષ નસ્તે સદા દાસાન્ દેહિ ભક્તિં ત્વદીયકામ્ ।
યયા માયા ન બાધ્યતે બુદ્ધીશ તે નમો નમઃ ॥ ૫૯॥

એવં સ્તુત્વા મયૂરેશં મયૂરેશો નતોઽભવત્ ।
પૂજાવિધિં સમાપ્યૈવ ભક્તિયુક્તો બભૂવ હ ॥ ૬૦॥

એવં શિવાદયઃ સર્વે પુપૂજુર્ગણનાયકમ્ ।
મુનયશ્ચૈવ સર્વેશં મૃન્મૂર્તિસ્થં વિશેષતઃ ॥ ૬૧॥

એતસ્મિન્નન્તરે તત્ર વિશ્વદેવો મહાયશાઃ ।
સમાયયૌ ચ તીર્થાનિ ભ્રમમાણો યદૃચ્છયા ॥ ૬૨॥

એકનિષ્ઠતયા સોઽપિ નારાયણપરાયણઃ ।
પુપૂજ નિત્યમાનન્દાચ્છેષશાયિનમાદરાત્ ॥ ૬૩॥

અવ્યાહતગતિઃ સોઽપિ તપસા દગ્ધકિલ્બિષઃ ।
ગત્વા સમુદ્રમધ્યસ્થં તં પુપૂજ જનાર્દનમ્ ॥ ૬૪॥

પશ્ચાજ્જલાદિકં વિપ્રો બુભુજે ભક્તિસંયુતઃ ।
અત્યન્તભક્તિયોગેન ગાણેશે યોગ્યતાં ગતઃ ॥ ૬૫॥

માયયા ચ મયૂરેશસ્તં જ્ઞાત્વા શેષશાયિનઃ ।
જ્ઞાનં સઞ્છાદયામાસ વિશ્વદેવસ્ય સંસ્મૃતિમ્ ॥ ૬૬॥

વિશ્વદેવસ્ય નિત્યં તુ બુદ્ધિમોહેન વિઘ્નપઃ ।
અકારયત્તદ્યોગેશો વિસ્મૃતં યોગમાયયા ॥ ૬૭॥

આગત્ય વિશ્વદેવસ્તુ પાર્વતીં સર્વભાવિનીમ્ ।
અયાચત સ ભિક્ષાં તાં સા દદૌ પાયસાદિકમ્ ॥ ૬૮॥

અપોશનં સ કૃત્વા ચ સસ્માર શેષશાયિનમ્ ।
મહાદુઃખયુતસ્તત્ર સંસ્થિતોઽભૂદ્ દ્વિજોત્તમઃ ॥ ૬૯॥

તતસ્તં ગણરાજસ્તુ ખેદયુક્તં વિશેષતઃ ।
દૃષ્ટ્વા નારાયણો ભૂત્વા સાન્ત્વયામાસ ભાવતઃ ॥ ૭૦॥

ચતુર્વર્ષાત્મકો મૂર્તિં સ પુપૂજ પરાશરઃ ।
મૃન્મયૈરુપચારૈસ્તાં દર્શયામાસ ભક્તિતઃ ॥ ૭૧॥

ગાણેશાખ્યં દદૌ જ્ઞાનં વિશ્વદેવાય શાન્તિદમ્ ।
ગાણપત્યસ્વભાવેન સ નનામ ગુણેશ્વરમ્ ॥ ૭૨॥

વિશ્વદેવો યયૌ સ્થાનં સ્વકીયં શાન્તિસંયુતઃ ।
એકનિષ્ઠતયા વિપ્રો મયૂરેશં તમાભજત્ ॥ ૭૩॥

એવં વિસ્મૃતભાવેન જ્ઞાનસઞ્છાદનેન ચ ।
વિષ્ણોઃ પરાક્રમં હત્વા ચિક્રીડ દ્વિજબાલકૈઃ ॥ ૭૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે વિષ્ણ્વાદિપરાધીનતાદર્શનં નામ ચત્વારિંશત્તમોઽધ્યાયઃ ॥ ૬.૪૦
(Page ખં. ૬ અ. ૪૧ પાન ૧૧૬)

## ૬.૪૧ મયૂરેશચરિતવર્ણનં નામૈકચત્વારિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

આદિશક્તિરુવાચ ।
કદાચિત્ સુખમાસીનં ગણૈઃ સર્વૈઃ સમાવૃતમ્ ।
શિવં દૃષ્ટ્વા મયૂરેશો માયામાવિશ્ચકાર હ ॥ ૧॥

સમાગત્ય મહેશાનં તસ્ય ભાલસ્થિતં પ્રભુઃ ।
ચન્દ્રં ગૃહ્ય ગણેશાનઃ પ્રયયૌ ક્રીડનોત્સુકઃ ॥ ૨॥

માયયા મોહિતાઃ સર્વે શિવમુખ્યા વિશેષતઃ ।
ન જાનન્તિ સ્મ દેવેશં ચન્દ્રતાસ્કર્યકારિણમ્ ॥ ૩॥

તતઃ શિવઃ સ્વભાલે તં ન દદર્શ નિશાકરમ્ ।
ક્રોધયુક્તો ગણાન્ પ્રાહ કથં ચન્દ્રો ગતો ગણાઃ ॥ ૪॥

તતો મુનિસુતાઃ પ્રોચુઃ સમાગત્ય મહેશ્વરમ્ ।

ચન્દ્રં ગૃહ્ય મયૂરેશઃ ખેલત્યસ્માભિરાદરાત્ ॥ ૫॥

તતઃ ક્રોધસમાવિષ્ટ ઉવાચ હ શિવો ગણાન્ ।
બદ્ધ્વા ગણેશ્વરં તાડ્યાનયધ્વં મેઽદ્ય સન્નિધૌ ॥ ૬॥

તતો ગણા યયુસ્તં તે તેન નિઃશ્વાસવાયુના ।
નિક્ષિપ્તાઃ શઙ્કરસ્યાગ્રે શુષ્કપત્રસમપ્રભાઃ ॥ ૭॥

એવં ક્રમેણ સર્વાન્ સ મયૂરેશો ગણેશ્વરાન્ ।
ભગ્નદર્પાંશ્ચકારૈવ શિવશ્ચિન્તાતુરોઽભવત્ ॥ ૮॥

તતો માયાં સમાશ્રિત્ય શિવભાલે નિશાકરમ્ ।
મયૂરેશઃ સમાગત્યાઽઽસ્થાપ્ય ભ્રાન્તાંશ્ચકાર હ ॥ ૯॥

સ્વભાલસ્થં મહેશાનો દૃષ્ટ્વા ચન્દ્રં ગણાસ્તથા ।
મેનિરે તં સદા તત્ર સંસ્થિતં તં ગતાગતમ્ ॥ ૧૦॥

એવં શિવં પરાધીનં કારયામાસ વિઘ્નપઃ ।
તતઃ કદાચિદ્દૈત્યેન્દ્રં વનં હન્તું જગામ હ ॥ ૧૧॥

વ્યાઘ્રરૂપધરં દૃષ્ટ્વા શાર્દૂલોઽભૂદ્ગજાનનઃ ।
ન તં જાનન્તિ વિપ્રાણાં સુતાઃ શાર્દૂલરૂપિણમ્ ॥ ૧૨॥

યત્ર તત્ર ભ્રમન્તિ સ્મ બાલાસ્તદ્દર્શનોત્સુકાઃ ।
તે સર્વે સુષ્વપુઃ શ્રાન્તા નિદ્રાં લેભુઃ શ્રમાન્વિતાઃ ॥ ૧૩॥

પાદં દક્ષિણદિક્સંસ્થં દૃષ્ટ્વા તેષાં ચ ભાનુજઃ ।
તાન્ ગૃહ્ય નિગડૈર્બદ્ધ્વા ચિક્ષેપે સ્વપુરે યમઃ ॥ ૧૪॥

હત્વા દૈત્યં મયૂરેશઃ સ્વપુરં પુનરાયયૌ ।
ન તત્ર મુનિપુત્રાન્ સ દદર્શ વિસ્મતોઽભવત્ ॥ ૧૫॥

ગત્વા સ્વર્ગે યમં જિત્વા યયૌ તૈર્મુનિબાલકૈઃ ।
એવં નાનાવિધાં ક્રીડાં ચકાર મયૂરધ્વજઃ ॥ ૧૬॥

દશપઞ્ચ વયોવર્ષાણ્યતિક્રમ્ય ગણેશ્વરઃ ।
શુશુભે ખેલસંયુક્તો દૈત્યાન્ હત્વા વિશેષતઃ ॥ ૧૭॥

અથ તત્રાઽઽયયૌ યોગી નારદો ગણપં સ્મરન્ ।
ઉવાચ શઙ્કરં સોઽપિ હર્ષયુક્તેન ચેતસા ॥ ૧૮॥

નારદ ઉવાચ ।
તપસાઽઽરાધિતૌ દેવ્યૌ સિદ્ધિબુદ્ધી તુ વેધસા ।
વરદાનેન તે પુત્ર્યૌ બભૂવતુઃ પ્રજાપતે ॥ ૧૯॥

તદર્થં સદૃશં બ્રહ્મા નાવાપ વરમુત્તમમ્ ।
મયૂરેશાય અધુના દાતુમિચ્છતિ સ પ્રભુઃ ॥ ૨૦॥

તથેતિ તમુવાચાથ શઙ્કરસ્તેન સંયુતઃ ।
મયૂરેશં સમાગૃહ્ય નિર્યયૌ સ ગણઃ સ્વયમ્ ॥ ૨૧॥

માર્ગમધ્યે મયૂરેશો દદર્શ નગરં પરમ્ ।
સિન્ધોર્દેવવિમોક્ષાર્થં વિચારમકરોત્ પરમ્ ॥ ૨૨॥

તતો યુદ્ધં મહાઘોરં ચકાર સિન્ધુના સ્વયમ્ ।
મયૂરેશો ગણૈઃ સાર્ધં સોઽપિ તેન મહાસુરઃ ॥ ૨૩॥

તતઃ પરશુના ભિત્વા નાભિં ત્વમૃતસંયુતામ્ ।
મારયામાસ સિન્ધું ચ નાનાદૈત્યેન્દ્રનાયકૈઃ ॥ ૨૪॥

વિષ્ણુભક્તઃ પિતા તસ્ય ચક્રપાણિર્મહાયશાઃ ।
(Page ખં. ૬ અ. ૪૧ પાન ૧૧૭)
મયૂરેશાર્થમેવં સ વિચાર્ય શરણં યયૌ ॥ ૨૫॥

ત્યક્ત્વા સર્વં ગણેશે સ લાલસો ભક્તિસંયુતઃ ।
બભૂવ તં સ્વપુર્યાં તુ સમાનાય્ય પુપૂજ હ ॥ ૨૬॥

કારાગૃહાચ્ચક્રપાણિર્નિષ્કાસ્ય વિષ્ણુમુખ્યકાન્ ।
દેવાન્ દેવેન્દ્રયુક્તાંશ્ચાપૂજયદ્ભક્તિસંયુતઃ ॥ ૨૭॥

તત્ર બ્રહ્મા પ્રહર્ષેણ સસ્માર તનયે સ્વકે ।
સિદ્ધિબુદ્ધી સમાયાતે રૂપલાવણ્યસંયુતે ॥ ૨૮॥

તે દૃષ્ટ્વા કામસન્તપ્તા દેવેન્દ્રાશ્ચ બભૂવિરે ।
દેવાસ્તં પ્રાર્થયામાસુઃ પ્રત્યેકે વિધિમાદરાત્ ॥ ૨૯॥

અસ્મભ્યો દેહિ દેવેશ કન્યે પરમસુન્દરે ।
ન દૃષ્ટે સદૃશે કુત્ર કામિનીનાં ગણેષુ ચ ॥ ૩૦॥

તતો બ્રહ્મા જગાદૈવ ન સદૃશઃ સુરેશ્વરાઃ ।
આભ્યાં તસ્માન્ મયૂરેશાય દાસ્યામિ મદાત્મજે ॥ ૩૧॥

તતોઽતિપ્રાર્થયામાસુર્દેવાઃ સર્વે પિતામહમ્ ।
જગાદ વચનં યુક્તં સપુત્ર્યૌ ખેદસંયુતઃ ॥ ૩૨॥

સિદ્ધિબુદ્ધી સુરેન્દ્રેષુ વૃણુતં વરમીપ્સિતમ્ ।
તે ઊચતુર્વિધાતારં ચિત્તસ્થં તં વૃણીવહે ॥ ૩૩॥

તતો માત્રાં સમાગૃહ્ય ચિન્તામણિં પ્રદૃશ્ય તે ।
સિદ્ધિબુદ્ધી મયૂરેશં ત્યક્ત્વા દેવાંશ્ચ જગ્મતુઃ ॥ ૩૪॥

માલાં ગલે ગણેશસ્ય તતશ્ચિક્ષિપતુર્વિધિઃ ।
તસ્મૈ સમર્પયામાસ સિદ્ધિં બુદ્ધિં વિધાનતઃ ॥ ૩૫॥

તતઃ સર્વે પ્રણેમુસ્તં દેવેન્દ્રાદય આદરાત્ ।
સિન્ધોર્વધાત્ પ્રહર્ષેણ યુક્તાઃ સમ્પૂજ્ય તુષ્ટુવુઃ ॥ ૩૬॥

દેવર્ષય ઊચુઃ ।
નમસ્તે શિખિવાહાય મયૂરધ્વજધારિણે ।
મયૂરેશ્વરનામ્ને વૈ ગણેશાય નમો નમઃ ॥ ૩૭॥

અનાથાનાં પ્રણાથાય ગતાહઙ્કારિણાં પતે ।
માયાપ્રચાલકાયૈવ વિઘ્નેશાય નમો નમઃ ॥ ૩૮॥

સર્વાનન્દપ્રદાત્રે તે સદા સ્વાનન્દવાસિને ।
સ્વસ્વધર્મરતાનાં ચ પાલકાય નમો નમઃ ॥ ૩૯॥

અનાદયે પરેશાય દૈત્યદાનવમર્દિને ।
વિધર્મસ્થસ્વભાવાનાં હર્ત્રે વિકટ તે નમઃ ॥ ૪૦॥

શિવપુત્રાય સર્વેષાં માત્રે પિત્રે નમો નમઃ ।
પાર્વતીનન્દનાયૈવ સ્કન્દાગ્રજ નમો નમઃ ॥ ૪૧॥

નાનાવતારરૂપૈસ્તુ વિશ્વસંસ્થાકરાય તે ।
કાશ્યપાય નમસ્તુભ્યં શેષપુત્રાય તે નમઃ ॥ ૪૨॥

સિન્ધુહન્ત્રે ચ હેરમ્બાય પરશુધરાય તે ।
દેવદેવેશ પાલાય બ્રહ્મણાં પતયે નમઃ ॥ ૪૩॥

યોગેશાય સુશાન્તિભ્યઃ શાન્તિદાત્રે કૃપાલવે ।
અનન્તાનનબાહો તેઽનન્તોદર નમો નમઃ ॥ ૪૪॥

અનન્તવિભવાયૈવ ચિત્તવૃત્તિપ્રચાલક ।

સર્વહૃત્સ્થાય સર્વેષાં પૂજ્યાય તે નમો નમઃ ॥ ૪૫॥

સર્વાદિપૂજ્યરૂપાય જ્યેષ્ઠરાજાય તે નમઃ ।
ગણાનાં પતયે ચૈવ સિદ્ધિબુદ્ધિવરાય ચ ॥ ૪૬॥

કિં સ્તુમસ્ત્વાં મયૂરેશ યત્ર વેદાદયઃ પ્રભો ।
યોગિનઃ શાન્તિમાપન્ના અતો નમામહે વયમ્ ॥ ૪૭॥

તેન તુષ્ટો ભવ સ્વામિન્ દયાઘન પ્રવર્તક ।
ત્વદીયાઙ્ગસમુદ્ભૂતાન્ રક્ષ નો નિત્યદા પ્રભો ॥ ૪૮॥

એવં સ્તુત્વા પ્રણેમુસ્તં તતો દેવોઽબ્રવીન્ સ તાન્ ।
વરાન્ વૃણુત દેવેશા મુનિભિશ્ચ સમન્વિતાઃ ॥ ૪૯॥

ભવત્કૃતમિદં સ્તોત્રં સર્વસિદ્ધિપ્રદાયકમ્ ।
ભવિષ્યતિ મહાભાગા મમ પ્રીતિવિવર્ધનમ્ ॥ ૫૦॥

(Page ખં. ૬ અ. ૪૧ પાન ૧૧૮)
યઃ પઠેચ્છૃણુયાદ્વાપિ શ્રાવયેત્સ લભત્ પરામ્ ।
ભુક્તિં મુક્તિં મદીયાં તુ નરો ભક્તિં ન સંશયઃ ॥ ૫૧॥

મયૂરેશવચઃ શ્રુત્વા દેવાઃ સર્ષિગણાશ્ચ તમ્ ।
પ્રત્યૂચુસ્તે પ્રણમ્યેદં વચનં હર્ષસંયુતાઃ ॥ ૫૨॥

દેવર્ષય ઊચુઃ ।
યદિ પ્રસન્નભાવેન વરાન્ દાસ્યસિ વિઘ્નપ ।
ત્વદીયામચલાં ભક્તિં દેહિ નાથ નમોસ્તુ તે ॥ ૫૩॥

હતઃ સિન્ધુર્મહાવીર્યસ્તેન સર્વે કૃતાર્થકાઃ ।
અધુના સ્વાધિકારેષુ ગમિષ્યામસ્ત્વદાજ્ઞયા ॥ ૫૪॥

તથેતિ તાનુવાચાથ મયૂરેશઃ પ્રતાપવાન્ ।
દત્ત્વા ભક્તિં સ્વકીયાં તુ રાજ્ઞે સર્વૈર્જગામ હ ॥ ૫૫॥

ચક્રપાણિર્ગણેશસ્ય પઞ્ચાયતનમાર્ગતઃ ।
અભજત્તં મયૂરેશમન્તે સ્વાનન્દગોઽભવત્ ॥ ૫૬॥

મયૂરેશઃ સમાયાતો મયૂરે સર્વસંયુતઃ ।
સર્વાન્ સંસ્થાપ્ય દેવેશાન્ જગાદ મુનિસત્તમાન્ ॥ ૫૭॥

યદર્થમાગતા દેવાસ્તત્ સર્વં સુકૃતં મયા ।

અધુના નિજલોકેઽહં ગમિષ્યામિ મુનીશ્વરાઃ ॥ ૫૮॥

એવમુક્ત્વાન્તર્દધેઽસૌ મયૂરેશઃ સ્વલીલયા ।
દેવર્ષયશ્ચ ખેદેન યુક્તાસ્તત્રૈવ સંસ્થિતાઃ ॥ ૫૯॥

પાર્વતીશઙ્કરૌ તત્ર મૂર્ચ્છિતૌ સ બભૂવતુઃ ।
તયોર્હૃદિ મયૂરેશઃ પ્રકટોઽભૂદ્ જગાદ તૌ ॥ ૬૦॥

ભવતોર્હૃદિ સંસ્થોઽહં ચિત્તવૃત્તિપ્રચાલકઃ ।
ન વિયોગઃ કદા મે વાં પિતરૌ નાત્ર સંશયઃ ॥ ૬૧॥

બહિર્મૂર્તિં સમાસ્થાપ્યાપૂજ્ય તત્રૈવ ભક્તિતઃ ।
સેવેથાં માં વિશેષેણ તેન તુષ્ટૌ ભવિષ્યથઃ ॥ ૬૨॥

એવમુક્ત્વાંઽતર્દધેઽસૌ ગણેશો ગણવલ્લભઃ ।
બ્રહ્મા મૂર્તિં દ્વિજૈસ્તસ્ય સ્થાપયામાસ હર્ષતઃ ॥ ૬૩॥

તતો હર્ષયુતાઃ સર્વે સ્વાંશેન સ્વસ્થલેષુ તે ।
સંસ્થિતાઃ કાર્યસિદ્ધ્યર્થં સ્વસ્વકર્મપરાયણાઃ ॥ ૬૪॥

પૂર્ણભાવેન તત્રૈવ મયૂરેશં સિષેવિરે ।
ક્ષેત્રવાસપરાઃ સર્વે ભક્તિયુક્તાશ્ચ શક્તયઃ ॥ ૬૫॥

વિકટસ્યાવતારોઽયં મયૂરેશ્વરસંજ્ઞિતઃ ।
ભક્તાનાં કથિતઃ સર્વસિદ્ધિદઃ પ્રીતિવર્ધનઃ ॥ ૬૬॥

યઃ પઠેત્ શ઼ૃણુયાચ્ચેદ્વા સ લભેદીપ્સિતં ફલમ્ ।
અન્તે સ્વાનન્દગો ભૂત્વા મોદતે બ્રહ્મતત્પરઃ ॥ ૬૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે મયૂરેશચરિતવર્ણનં નામૈકચત્વારિંશત્તમોઽધ્યાયઃ ॥ ૬.૪૧
(Page ખં. ૬ અ. ૪૨ પાન ૧૧૯)

## ૬.૪૨ સૂર્યાવતારચરિતં નામ દ્વિચત્વારિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

આદિશક્તિરુવાચ ।
વિકટેન મહાદેવ્યો રચિતં માયયા પરમ્ ।
નાનાભેદયુતં બ્રહ્માઽસદ્રૂપં વિવિધે રતમ્ ॥ ૧॥

તેન નાનાવિધં બ્રહ્મ જગન્નાનાવિધં તથા ।
સૃષ્ટં તાનિ વિશેષેણ જીવહીનાનિ મેનિરે ॥ ૨॥

તતસ્તૈર્વિકટસ્યૈવ તપસ્તપ્તં સુદારુણમ્ ।
એકાક્ષરવિધાનેન દિવ્યવર્ષસહસ્રકમ્ ॥ ૩॥

તુષ્ટસ્તાનિ યયૌ દેવો વરદાનાર્થમાદરાત્ ।
રથસ્થઃ સૂર્યરૂપેણ સર્વાત્મા સર્વભાવનઃ ॥ ૪॥

તં દૃષ્ટ્વા તાનિ હર્ષેણ યુક્તાનિ નેમુરાદરાત્ ।
તદ્દર્શનજબોધેન જ્ઞાનયુક્તાનિ શક્તયઃ ॥ ૫॥

આત્માકારોઽયમેકશ્ચ વિકટઃ સૂર્યરૂપધૃક્ ।
ન કુત્રચિત્ પ્રદૃશ્યેત ભેદો વિકટસૂર્યયોઃ ॥ ૬॥

તાન્યાઽઽપૂજ્ય પ્રણેમુસ્તં પુનસ્તોતું પ્રચક્રમુઃ ।
સ્તોત્રં નાનાવિધાન્યેવ બ્રહ્માણિ વિશ્વપાલકૈઃ ॥ ૭॥

નાનાબ્રહ્માણ્યૂચુઃ ।
વિકટાય પરેશાય સર્વજીવનધારિણે ।
આત્માકારાય સૂર્યાય ભાનવે તે નમો નમઃ ॥ ૮॥

સપ્તાશ્વરથસંસ્થાય વિઘ્નેશાય પરાત્મને ।
હેરમ્બાય જગન્નાથ બ્રહ્મનાથાય તે નમઃ ॥ ૯॥

સંજ્ઞાપતે નમસ્તુભ્યં સાક્ષિરૂપાય સાક્ષિણે ।
છાયાનાથાય દેવેશ દેવદેવેશ તે નમઃ ॥ ૧૦॥

અનામયાય નિત્યાય સહસ્રકરધારિણે ।
અનન્તભેદહીનાયાઽદ્વિતીયાય નમો નમઃ ॥ ૧૧॥

સર્વાદયે સદા સર્વાધારાય વિશ્વમૂર્તયે ।
કર્માધારાય સર્વેષાં પાલકાય નમો નમઃ ॥ ૧૨॥

આદિત્યાય પરેશાય પરાત્પરતરાય તે ।
દિનસ્ય પતયે નાથ દિનપાલાય વૈ નમઃ ॥ ૧૩॥

અર્યમ્ણે કાશ્યપાયૈવ તેજસાં પતયે નમઃ ।
અનાધારાય વૃષ્ટ્યાસ્તુ ચાલકાય નમો નમઃ ॥ ૧૪॥

કિં સ્તુમસ્ત્વાં રવે યત્ર વેદાઃ સઙ્કુણ્ઠિતા બભુઃ ।

યોગિનં સતતં સર્વ આત્માકારં પરાત્પરમ્ ॥ ૧૫॥

એકમેવાદ્વિતીયં ત્વાં વદન્તિ વેદવાદિનઃ ।
વયં ભિન્નાનિ તેન ત્વં વિકટોઽસિ ન સંશયઃ ॥ ૧૬॥

એવં સ્તુત્વા તં બ્રહ્માણિ પ્રણેમુર્હર્ષભાવતઃ ।
તાન્યુત્થાપ્યાર્યમા વાક્યં જગાદ ભક્તવત્સલઃ ॥ ૧૭॥

સૂર્ય ઉવાચ ।
વરાન્ બ્રૂત ચ બ્રહ્માણિ દાસ્યામિ ભક્તિયન્ત્રિતઃ ।
ભવત્કૃતમિદં સ્તોત્રં ભુક્તિમુક્તિપ્રદં ભવેત્ ॥ ૧૮॥

યં યમિચ્છતિ તં તં તુ દાસ્યામિ સ્તોત્રપાઠતઃ ।
બ્રહ્મભૂયપ્રદં મેઽસ્તુ સ્તોત્રં મદ્ભક્તિવર્ધનમ્ ॥ ૧૯॥

સૂર્યસ્ય વચનં શ્રુત્વા હર્ષેણ સંયુતાનિ તુ ।
જગુસ્તં બ્રહ્મમુખ્યાનિ ભક્તિયુક્તાનિ શક્તયઃ ॥ ૨૦॥

બ્રહ્માણ્યૂચુઃ ।
તુષ્ટશ્ચેદ્બ્રહ્મબ્રહ્મેશ જીવયુક્તાનિ નિત્યદા ।
કુરુષ્વ સર્વભાવેન સ્વસ્ય સૌખ્યપરાણિ તુ ॥ ૨૧॥

ભક્તિં દેહિ સદા નાથ તવ પાદામ્બુજે પરામ્ ।
માયામોહવિનાશાર્થં યોગં દેહિ પરાત્પરમ્ ॥ ૨૨॥

તથેતિ સવિતા તેભ્ય ઉક્ત્વા જ્ઞાનં જગાદ હ ।
માયામોહવિનાશાર્થં ગાણેશં યોગશાન્તિદમ્ ॥ ૨૩॥

સૂર્ય ઉવાચ ।
અસત્ સત્ સમનેતીનાં સંયોગે યોગ ઉચ્યતે ।
સ્વસંવેદ્યાત્મકશ્ચૈવ ગકારાક્ષરવાચકઃ ॥ ૨૪॥

સ્વસ્વરૂપેણ હીનોઽયમયોગો યોગ ઉચ્યતે ।
ણકારાક્ષરગઃ સોઽપિ વેદેષુ કથિતોઽભવત્ ॥ ૨૫॥

તયોર્યોગે ગણેશાનઃ શાન્તીનાં શાન્તિદાયકઃ ।
(Page ખં. ૬ અ. ૪૩ પાન ૧૨૦)
ચિત્તે ચિન્તામણિં દૃષ્ટ્વા ભવિષ્યથ સુયોગિનઃ ॥ ૨૬॥

સંયોગાયોગરૂપં યન્માયામયં વિશેષતઃ ।

તસ્યા વિકટભાવેન ભજધ્વં વિકટં સદા ॥ ૨૭॥

સ્વસ્વબ્રહ્મણિ સંસ્થં તુ કર્મ કૃત્વા સ્વભાવજમ્ ।
ગણેશાર્પણભાવેન ભવદ્ભિઃ સ્થીયતાં સદા ॥ ૨૮॥

એવમુક્ત્વા સ્વયં ભાનુર્બ્રહ્માણિ સર્વનાયકઃ ।
અન્તર્દધે મહાદેવ્યઃ સ્વાનન્દસ્થો બભૂવ હ ॥ ૨૯॥

તતો સન્મુખ્યબ્રહ્માણિ સ્વસ્વવિશ્વયુતાનિ ચ ।
જીવયુક્તાનિ જાતાનિ ખેલાં ચક્રુઃ પરસ્પરમ્ ॥ ૩૦॥

યથા સૂર્યેણ સન્દિષ્ટો યોગો વિકટસંજ્ઞિતઃ ।
સાધયિત્વા તથા તાનિ સુશાન્તાનિ બભૂવિરે ॥ ૩૧॥

હૃદિ ચિન્તામણિં જ્ઞાત્વા બહિઃ કર્માણિ કૃત્સ્નશઃ ।
સમર્પ્ય વિકટં દેવ્યો ભજન્ બ્રહ્માણિ રેમિરે ॥ ૩૨॥

એવં વિકટમાહાત્મ્યં સૂર્યાવતારસંજ્ઞિતમ્ ।
કથિતં વિસ્તરેણૈવ સમાસેનાપિ નિશ્ચિતમ્ ॥ ૩૩॥

અયં સૂર્યાત્મકશ્ચૈવ વિકટસ્ય મહાત્મનઃ ।
અવતારઃ સમાખ્યાતઃ સર્વસિદ્ધિપ્રદાયકઃ ॥ ૩૪॥

શ ृણુયાદ્યઃ પઠેદ્વાપિ સ સિદ્ધિં પરમાં લભેત્ ।
ઇપ્સિતં સર્વમેવં તુ પરત્રેહ લભેત્ સુખમ્ ॥ ૩૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે સૂર્યાવતારચરિતં નામ દ્વિચત્વારિંશત્તમોઽધ્યાયઃ ॥ ૬.૪૨

## ૬.૪૩ ભાનુવિનાયકચરિતં નામ ત્રિચત્વારિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

આદિશક્તિરુવાચ ।
કશ્યપસ્ય ચ ભાર્યાઽઽસીદ્વિનતા રૂપશાલિની ।
તસ્યામણ્ડે સમુત્પન્ને દ્વેઽતીવ તેજસા યુતે ॥ ૧॥

તાભ્યાં જ્યેષ્ઠોઽરુણો જજ્ઞે ગરુડોઽનુજ એવ ચ ।
અરુણઃ સૂર્યમારાધ્ય વરં પ્રાપ હિતાવહમ્ ॥ ૨॥

સારથિઃ સ રવેરાસીન્નિત્યં તદ્ભક્તિસંયુતઃ ।

સેવયાઽનન્યભાવેન સૂર્ય આત્માનમચ્યુતમ્ ॥ ૩॥

ગણેશં નિત્યમાનન્દાત્ સૂર્યો ભેજે વિશેષતઃ ।
પ્રણમ્ય સોઽપિ પપ્રચ્છારુણસ્તં ખેદસંયુતઃ ॥ ૪॥

અરુણ ઉવાચ ।
સ્વામિંસ્ત્વં સર્વભાવાનામાત્માઽમૃતમયઃ સદા ।
એક એવાદ્વિતીયોઽસિ ભજસે કં ગજાનનમ્ ॥ ૫॥

કોઽસૌ ગણેશ્વરઃ પૂર્ણો મિથ્યાત્મા કશ્યપાત્મજ ।
મોહં કરોષિ દેવેશ સ્વરૂપચ્છાદનાય તે ॥ ૬॥

યોગિનો દેવમુખ્યાશ્ચ ત્વાં જ્ઞાત્વા શાન્તિમાદધુઃ ।
ત્વત્તઃ પરતરં નાસ્તિ કિમર્થં ભજસે પરમ્ ॥ ૭॥

સૂર્ય ઉવાચ ।
ત્વયાઽનૂરો સત્યમુક્તં વેત્સિ માં ત્વં વિશેષતઃ ।
ન ત્વત્સમો મદીયે તુ યોગે કોઽપિ વિશેષતઃ ॥ ૮॥

પૂર્ણભાવમવિજ્ઞાય શાન્તિં ધૃત્વા ત્વમઞ્જસા ।
સંસ્થિતઃ કિમહં બ્રૂયામજ્ઞાનં ત્વાં મહાયશઃ ॥ ૯॥

ગણેશાદહમુત્પન્નસ્તસ્યાન્યે શઙ્કરાદયઃ ।
જ્યેષ્ઠરાજશ્ચ તેનાયં તસ્ય જ્યેષ્ઠો ન વિદ્યતે ॥ ૧૦॥

(Page ખં. ૬ અ. ૪૩ પાન ૧૨૧)
અસન્નાનાવિધા શક્તિસ્તત્રાહં ચાત્મવાચકઃ ।
તયોઃ સમાનભાવે ત્વાઽઽનન્દો વિષ્ણુઃ પ્રકીર્તિતઃ ॥ ૧૧॥

આનન્દાચ્ચ પરો વ્યક્તઃ શઙ્કરસ્તુર્યસંજ્ઞિતઃ ।
તેષાં યોગે ગણેશાનઃ સ્વાનન્દાખ્યઃ પ્રકીર્તિતઃ ॥ ૧૨॥

સર્વસંયોગકર્તૃત્વાત્ માયાયુક્તો ગણેશ્વરઃ ।
સ્વસંવેદ્યેન યોગેન લભ્યતેઽરુણ નિશ્ચિતમ્ ॥ ૧૩॥

તસ્માત્પરો હ્યયોગશ્ચ સ્વસંવેદ્યવિવર્જિતઃ ।
તયોર્યોગે ગણેશાનો વેદે પશ્ય વિચક્ષણ ॥ ૧૪॥

બ્રહ્મણસ્પતિવાચ્યોઽસૌ વયં બ્રહ્મમયાઃ કિલ ।
અસ્માકં ગણરાજસ્તુ સ્વામી તસ્માદ્ભજામહે ॥ ૧૫॥

એવં તસ્ય વચઃ શ્રુત્વાઽનૂરુસ્તં પ્રણનામ હ ।
જગાદ ભક્તિસંયુક્તઃ સૂર્યં તેજસ્વિનાં પતિમ્ ॥ ૧૬॥

અરુણ ઉવાચ ।
ગણેશપ્રાપ્તયે નાથ વદોપાયં સુસૌખ્યદમ્ ।
ભવામિ ગાણપત્યશ્ચ યેનાઽહં દેવનાયકઃ ॥ ૧૭॥

સૂર્ય ઉવાચ ।
એકાક્ષરવિધાનેન તં ભજસ્વ તુ કાશ્યપ ।
હૃદિ ચિન્તામણિં દૃષ્ટ્વા યોગિવન્દ્યો ભવિષ્યસિ ॥ ૧૮॥

એવમુક્ત્વા દદૌ તસ્મૈ મન્ત્રં ગણપતેઃ પ્રભુઃ ।
સ વિધિં તં પ્રણમ્યાઽસૌ જગામ વનમુત્તમમ્ ॥ ૧૯॥

તતાપ તપ ઉગ્રં સ ગણેશધ્યાનતત્પરઃ ।
યોગમાર્ગેણ વિઘ્નેશં સાધયામાસ ભક્તિતઃ ॥ ૨૦॥

તતો યોગીન્દ્રવન્દ્યઃ સ બભૂવે યોગસેવયા ।
ચિત્તં પઞ્ચવિધં ત્યક્ત્વા રસયુક્તં જપે રતઃ ॥ ૨૧॥

એવં વર્ષશતેષ્વેનં ગતેષુ દ્વિરદાનનઃ ।
આયયૌ વરદાનાર્થં ભક્તિસમ્ભાવિતઃ પ્રભુઃ ॥ ૨૨॥

તતઃ સોઽપિ ગણેશાનં ન બુબોધ મહાયશાઃ ।
હૃદિધ્યાનેઽસ્ય સંલીનસ્તત્ર ચિત્રં બભૂવ હ ॥ ૨૩॥

સંજ્ઞાયુક્તં ગણેશાનં રથસ્થં સ દદર્શ હ ।
પુનઃ સિદ્ધ્યા ચ બુદ્ધ્યા ચ યુક્તં દૃષ્ટ્વા સુવિસ્મિતઃ ॥ ૨૪॥

હૃદિ ધ્યાનં પરિત્યજ્ય નેત્રે ઉન્મીલ્ય ચારુણઃ ।
અપશ્યત્તં બહિઃ સોઽપિ ગણેશં વરદાયકમ્ ॥ ૨૫॥

તતોઽતિહર્ષસંયુક્તઃ સમુત્થાય નનામ તમ્ ।
પુપૂજ વિધિસંયુક્તસ્તુષ્ટાવાનમ્ય હર્ષતઃ ॥ ૨૬॥

યાવત્ સ્તોતું સમારેભે તાવત્તં રથસંસ્થિતમ્ ।
રવિં સંજ્ઞાયુતં દૃષ્ટ્વા વિસ્મયં પરમં યયૌ ॥ ૨૭॥

ગણેશકૃપયા તેન જ્ઞાતં સર્વં સુબુદ્ધિના ।
ગણેશોઽયં રવિઃ પ્રોક્તો વિકટત્વાન્ન સંશયઃ ॥ ૨૮॥

નાનાભેદમયી માયા તત્રાત્મા ભેદવર્જિતઃ ।
અતો વિકટસંજ્ઞોઽયમાત્માકારો ગજાનનઃ ॥ ૨૯॥

વિકટરૂપિણં સૂર્યં ભજિષ્યામિ નિરન્તરમ્ ।
કલાંશં ગણેરાજસ્ય તેન તુષ્ટોઽયમઞ્જસા ॥ ૩૦॥

એતદર્થં ગણેશેન રૂપં સૂર્યાત્મકં પરમ્ ।
સ્વકીયાભેદભાવાખ્યં દર્શિતં મેઽત્ર સામ્પ્રતમ્ ॥ ૩૧॥

તતોઽતિભક્તિસંયુક્તઃ સાશ્રુનેત્રો બભૂવ હ ।
નિયમ્યાત્માનમાનન્દયુક્તસ્તોત્રં પ્રચક્રમે ॥ ૩૨॥

અરુણ ઉવાચ ।
નમસ્તે ગણનાથાય તેજસાં પતયે નમઃ ।
અનામયાય દેવેશ આત્મને તે નમો નમઃ ॥ ૩૩॥

બ્રહ્મણાં પતયે તુભ્યં જીવાનાં પતયે નમઃ ।
આખુવાહનગાયૈવ સપ્તાશ્વાય નમો નમઃ ॥ ૩૪॥

સ્વાનન્દવાસિને તુભ્યં સૌરલોકનિવાસિને ।
ચતુર્ભુજધરાયૈવ સહસ્રકિરણાય ચ ॥ ૩૫॥

(Page ખં. ૬ અ. ૪૩ પાન ૧૨૨)
સિદ્ધિબુદ્ધિપતે તુભ્યં સંજ્ઞાનાથાય તે નમઃ ।
વિઘ્નહન્ત્રે તમોહન્ત્રે હેરમ્બાય નમો નમઃ ॥ ૩૬॥

અનન્તવિભવાયૈવ નામરૂપપ્રધારિણે ।
માયાચાલક સર્વેશ સર્વપૂજ્યાય તે નમઃ ॥ ૩૭॥

ગ્રહરાજાય દીપ્તીનાં દીપ્તિદાય યશસ્વિને ।
ગણેશાય પરેશાય વિઘ્નેશાય નમો નમઃ ॥ ૩૮॥

વિવસ્વતે ભાનવે તે રવયે જ્યોતિષાં પતે ।
લમ્બોદરૈકદન્તાય મહોત્કટાય તે નમઃ ॥ ૩૯॥

યઃ સૂર્યો વિકટઃ સોઽપિ ન ભેદો દૃશ્યતે કદા ।
ભક્તિં દેહિ ગજાસ્ય ત્વં ત્વદીયાં મે નમો નમઃ ॥ ૪૦॥

કિં સ્તૌમિ ત્વાં ગણાધીશ યોગાકારસ્વરૂપિણમ્ ।
ચતુર્ધા ભજ્ય સ્વાત્માનં ખેલસિ ત્વં ન સંશયઃ ॥ ૪૧॥

એવં સ્વસ્ય સ્તુતિં શ્રુત્વા વિકટો રૂપમાદધે ।
વામાઙ્ગે સંજ્ઞયા યુક્તં ગજવક્ત્રાદિચિહ્નિતમ્ ॥ ૪૨॥

તં દૃષ્ટ્વા પ્રણનામાથાનૂરુર્હર્ષસમન્વિતઃ ।
તં જગાદ ગણાધીશો વરં વૃણુ હૃદીપ્સિતમ્ ॥ ૪૩॥

ત્વયા કૃતમિદં સ્તોત્રં સર્વસિદ્ધિપ્રદાયકમ્ ।
ભવિષ્યતિ ન સન્દેહશ્ચિન્તિતં સ લભેત્ પરમ્ ॥ ૪૪॥

શ‍ૃણુયાદ્વા જપેદ્વાઽપિ તસ્ય કિઞ્ચિન્ન દુર્લભમ્ ।
ભવિષ્યતિ મહાપક્ષિન્ મમ સન્તોષકારકમ્ ॥ ૪૫॥

ગણેશવચનં શ્રુત્વાઽનૂરુસ્તં પ્રણિપત્ય ચ ।
જગાદ સાશ્રુનેત્રઃ સન્ સરોમાઞ્ચો ગજાનનમ્ ॥ ૪૬॥

અનૂરુરુવાચ ।
ભક્તિં દેહિ ગણાધીશ તવ પાદામ્બુજાશ્રિતામ્ ।
ગાણપત્યપ્રિયત્વં મે સદા સઙ્ગં મહાત્મનામ્ ॥ ૪૭॥

તથેતિ તમથોક્ત્વાઽસૌ વિકટોંઽતર્દધે સ્વયમ્ ।
અનૂરુઃ ખેદસંયુક્તોઽભવત્તત્રૈવ સંસ્થિતઃ ॥ ૪૮॥

તતઃ સંસ્થાપયામાસ મૂર્તિં ગણપતેર્દ્વિજૈઃ ।
ભાનુવિનાયક ઇતિ નામ ચક્રે સુહર્ષિતઃ ॥ ૪૯॥

પૂજયિત્વા ગણેશાનં સૂર્યં સમાગતોઽભવત્ ।
અરુણસ્તં પ્રણમ્યૈવ વૃત્તાન્તં કથયત્ પરમ્ ॥ ૫૦॥

તેનૈવં સ્થાપિતં તત્રારુણો ગણપતિં પરમ્ ।
અભજદ્રથસંસ્થશ્ચ યોગશાન્તિપરોઽભવત્ ॥ ૫૧॥

એવં વિકટમાહાત્મ્યં ભાનુવિઘ્નેશગં પરમ્ ।
તદીયાંશાવતારસ્થં કથિતં સર્વસિદ્ધિદમ્ ॥ ૫૨॥

શ‍ૃણુયાદ્યઃ પઠેદ્વાપિ શ્રાવયેદ્વા નરઃ કિલ ।
સ ઈપ્સિતફલં પ્રાપ્યાન્તે સ્વાનન્દમવાપ્નુયાત્ ॥ ૫૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે ભાનુવિનાયકચરિતં નામ ત્રિચત્વારિંશત્તમોઽધ્યાયઃ ॥ ૬.૪૩
(Page ખં. ૬ અ. ૪૪ પાન ૧૨૩)

# ૬.૪૪ વિકટવરદચરિતં નામ ચતુશ્ચત્વારિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

આદિશક્તિરુવાચ ।
એકમેવાદ્વિતીયં યદ્બ્રહ્મ વેદેષુ શક્તયઃ ।
તદેવ વિકટઃ પ્રોક્તસ્તેન માયા પ્રકાશિતા ॥ ૧॥

માયાયાં બિમ્બિતં બ્રહ્મ વિકટસ્ય મહાત્મનઃ ।
આત્માકારં ચ સર્વત્ર ભ્રમસ્થં જીવવાચકમ્ ॥ ૨॥

સંજ્ઞા જાતા તતસ્તસ્ય વિકટસ્ય પરાત્મનઃ ।
સા સંજ્ઞાઽભૂદ્રવેર્ભાર્યા માયા ખેલકરી પરા ॥ ૩॥

તસ્યાં બિમ્બમયાદ્વીર્યાન્નાના જીવા બભૂવિરે ।
તેષાં સૂતિકરઃ સોઽપિ સૂર્ય ઇત્યભિધીયતે ॥ ૪॥

સંજ્ઞયા સંયુતઃ સૂર્યો જ્ઞાનહીનો બભૂવ હ ।
તપસ્તતાપ ઘોરં સ ગણેશસ્ય મહાત્મનઃ ॥ ૫॥

દિવ્યવર્ષસહસ્રેણૈકાક્ષરેણ સુતોષિતઃ ।
પ્રસન્નસ્તં યયૌ સોઽપિ ભક્તવાત્સલ્યકારણાત્ ॥ ૬॥

ઉવાચ તં રવિં દેવો વરં બ્રૂહિ હૃદીપ્સિતમ્ ।
દાસ્યામિ તપસા તુષ્ટો ભવેદ્યદપિ દુર્લભમ્ ॥ ૭॥

તતો ભાનુર્ગણેશાનં દૃષ્ટ્વા હર્ષસમન્વિતઃ ।
સંજ્ઞયા સહસોત્થાય પ્રણનામ ગજાનનમ્ ॥ ૮॥

પુનઃ પુનર્નનામાથ તં સમ્પૂજ્ય મહાયશાઃ ।
કૃત્વા કરપુટં સંજ્ઞાયુતઃ સ્તોતું પ્રચક્રમે ॥ ૯॥

સૂર્ય ઉવાચ ।
નમસ્તે વિકટાયૈવ માયામાયિકરૂપિણે ।
વામાઙ્ગે સંજ્ઞયા યુક્ત દક્ષિણાઙ્ગે ચ ભાનવે ॥ ૧૦॥

તયોર્યોગે ગણાધીશ સિદ્ધિબુદ્ધિપતિર્મતઃ ।
ગજાનનાદિચિહ્નૈશ્ચ સંયુતસ્તે નમો નમઃ ॥ ૧૧॥

એકમેવાદ્વિતીયં યદ્બ્રહ્મ તદ્વર્ણયે કથમ્ ।

ધન્યોઽહં સર્વભાવેન દેવં દૃષ્ટ્વા ગજાનનમ્ ॥ ૧૨॥

ગજાનનાય સર્વાદિપૂજ્યાય પરમાત્મને ।
હેરમ્બાય સદા જ્યેષ્ઠરાજાય તે નમો નમઃ ॥ ૧૩॥

પરેશાય મહાવિઘ્નનાશનાય મહાત્મને ।
દુરાત્મભ્યો મહાવિઘ્નદાયકાય નમો નમઃ ॥ ૧૪॥

અનાથાય સનાથાનાં નાથાય સર્વદાયિને ।
અનાથાનાં પ્રણાથાય નાથનાથાય તે નમઃ ॥ ૧૫॥

અનન્તવિભવાયૈવાનન્તમાયાપ્રધારિણે ।
બ્રહ્મણસ્પતયે તુભ્યં કવયે તે નમો નમઃ ॥ ૧૬॥

મૂષકવાહનાયૈવ સર્વાન્તરપ્રચારિણે ।
મૂષકધ્વજિને તુભ્યં મયૂરેશ નમોસ્તુ તે ॥ ૧૭॥

કિં સ્તૌમિ ત્વાં ગણાધીશ પઞ્ચચિત્તપ્રચાલક ।
અતોઽહં પ્રણમામ્યેવ તેન તુષ્ટો ભવ પ્રભો ॥ ૧૮॥

એવં સંસ્તુવતસ્તસ્ય ભક્ત્યા રોમોદ્ગમોઽભવત્ ।
રુદ્ધકણ્ઠં પ્રનૃત્યન્તં ગણેશસ્તં જગાદ હ ॥ ૧૯॥

શ્રીગણેશ ઉવાચ ।
મદીયસ્તવનં ચેદં સર્વદં સમ્ભવિષ્યતિ ।
ત્વયા કૃતં પઠેદ્યશ્ચ શ઼ૃણુયાત્તસ્ય સર્વદા ॥ ૨૦॥

યં યમિચ્છતિ તં તં તુ દાસ્યામિ સ્તોત્રપાઠતઃ ।
સન્તુષ્ટોઽતે બ્રહ્મમયં કરિષ્યામિ મહામતે ॥ ૨૧॥

દાસ્યામિ ત્વં વરાન્ બ્રૂહિ હ્યધુના ભક્તિમોહિતઃ ।
સસ્ત્રીકસ્તાન્ મહાભાનો મમ ભક્તતરો મતઃ ॥ ૨૨॥

ભાનુરુવાચ ।
પ્રસન્નોઽસિ યદા ઢુણ્ઢે દેહિ ભક્તિં ત્વદીયિકામ્ ।
જ્ઞાનં સ્વાભાવિકં દેહિ નાનાકાર્યકરં પ્રભો ॥ ૨૩॥

પરં સામર્થ્યમતુલં દેહિ સર્વાત્મધારકમ્ ।
માં કુરુષ્વ ગણેશાન ગાણપત્યપ્રિયં સદા ॥ ૨૪॥

ત્વં મે પુત્રો ભવ સ્વામિન્ સંસારે તારણાત્મકઃ ।

તત્ર ત્વાં પુત્રભાવેન ભજિષ્યામિ નિરન્તરમ્ ॥ ૨૫॥

હૃદયે ચિત્તસંસ્થં ત્વાં મૂર્તૌ દેવસ્વરૂપિણમ્ ।
તેનાહં કૃતકૃત્યશ્ચ ભવિષ્યામિ ગજાનન ॥ ૨૬॥

(Page ખં. ૬ અ. ૪૪ પાન ૧૨૪)
ઓમિત્યુક્ત્વા ગણાધીશસ્તતોઽતર્ધાનગોઽભવત્ ।
સૂર્યસ્તં ચિન્ત્ય સ્વસ્થાનં જગામ પ્રિયયા સહ ॥ ૨૭॥

સૂર્યઃ સત્તાસમાયુક્તો જ્ઞાનવાન્નિર્મમે પરમ્ ।
અસદ્બ્રહ્મ તતઃ સર્વં નાનારૂપમકલ્પયત્ ॥ ૨૮॥

ગણેશવરદાનેન મોહહીનો બભૂવ હ ।
અભજત્તં સદા ભાનુર્ભક્ત્યા યોગીન્દ્રવન્દિતઃ ॥ ૨૯॥

એકદા પ્રિયયા યુક્તઃ સસ્માર ગણનાયકમ્ ।
તામિસ્રાસુરગર્વેણ પીડિતો બલવત્તરમ્ ॥ ૩૦॥

સ્મૃત્યા સમાગતં તત્ર ગણેશં પુત્રરૂપિણમ્ ।
બાલં શુણ્ડાધરં વીક્ષ્ય તં પપ્રચ્છ વિભાવસુઃ ॥ ૩૧॥

સૂર્ય ઉવાચ ।
કોઽસિ ત્વં વદ માં બાલ ગણેશાકૃતિધારક ।
કિમર્થમિહ ચાયાતઃ કિં ગણેશો ભવાન્ પરઃ ॥ ૩૨॥

સૂર્યસ્ય વચનં શ્રુત્વા તં જગાદ ગજાનનઃ ।
સ્મૃતિજોઽહં સુતો ભાનો તવ વિઘ્નેશ્વરઃ સ્વયમ્ ॥ ૩૩॥

પુરા દત્તો વરસ્તેન પુત્રોઽહં તે સમાગતઃ ।
પાલયસ્વ પિતર્માં ત્વં સંજ્ઞયા સહ માનદ ॥ ૩૪॥

તસ્ય તદ્વચનં શ્રુત્વા સંજ્ઞયા સહ ચાર્યમા ।
પ્રણમ્યાપૂજ્ય તુષ્ટાવ અથર્વશિરસા પ્રભુમ્ ॥ ૩૫॥

એતસ્મિન્નન્તરે તત્રાઽઽજગામ સુરસત્તમઃ ।
તામિસ્રસ્તં વિલોક્યૈવ પપાલ સવિતા ભયાત્ ॥ ૩૬॥

ઉત્થાય ગણનાથસ્તં જઘાન મુષ્ટિઘાતતઃ ।
પાતયામાસ ભૂમ્યાં સ નિર્જીવં દૈત્યપુઙ્ગવમ્ ॥ ૩૭॥

મૃતં દૈત્યં વિલોક્યૈવાઽઽજગામ સવિતા પુનઃ ।

તં પ્રણમ્ય સ્થિતો દૂરે ગણેશેન વિમોહિતઃ ॥ ૩૮॥

મોહિતઃ સંજ્ઞયા સાર્ધં ભાનુસ્તં ગૃહ્ય પુત્રકમ્ ।
લાલયામાસ હર્ષેણ પુત્રભાવપરાયણઃ ॥ ૩૯॥

ગણેશમાયયા તત્ર સંજ્ઞા સ્તન્યમપાયયત્ ।
વરં દત્વા ગતં પુત્રં વરદાખ્યં ચકાર તમ્ ॥ ૪૦॥

તતઃ સોઽન્તર્હિત પુત્રો ભાનુઃ સમ્મૂર્ચ્છિતોઽભવત્ ।
સંજ્ઞયા ચ તયોર્ઢુણ્ઢિર્હૃદિ સંસ્થો બભૂવ હ ॥ ૪૧॥

મા શોકં કુરુતં તાતૌ ન વિયોગશ્ચ મે ક્વચિત્ ।
મૂર્તિં કૃત્વા સદા તત્ર પૂજયેથાં નિરન્તરમ્ ॥ ૪૨॥

તતસ્તૌ સાવધાનૌ તુ તથા ચક્રતુરાદરાત્ ।
ભક્ત્યા ગણપતિં નિત્યં ભજતઃ પરમેશ્વરૌ ॥ ૪૩॥

શક્તય ઊચુઃ ।
કોઽસૌ તામિસ્રસંજ્ઞશ્ચાસુરસ્તસ્ય ચરિત્રકમ્ ।
વદ શક્તે યદર્થં તુ વરદઃ સમ્બભૂવ હ ॥ ૪૪॥

આદિશક્તિરુવાચ ।
સૂર્યોઽહઙ્કારસંયુક્તો બભૂવે જીવનાત્મકઃ ।
સર્વેષાં દીપ્તિદાતાઽહં મમ દીપ્તિકરો ન ચ ॥ ૪૫॥

એવં બહૌ ગતે કાલે વિસ્મૃતો ગણનાયકમ્ ।
છાયાયાં તસ્ય જજ્ઞેઽયં તામિસ્રઃ પુરુષાકૃતિઃ ॥ ૪૬॥

તં દૃષ્ટ્વા હર્ષિતો ભાનુઃ પુત્રં મેને હિતાવહમ્ ।
અન્ધકારકરં પૂર્ણં વરદસ્તમુવાચ હ ॥ ૪૭॥

ભાનુરુવાચ ।
ત્રિગુણાન્નભયં પુત્ર ભવિષ્યતિ કદાચન ।
ત્રૈલોક્યરાજ્યમુગ્રં તે મયા દત્તં વિશેષતઃ ॥ ૪૮॥

યદ્યદિચ્છસિ તત્તત્તે સફલં સર્વદા કિલ ।
ભવિષ્યતિ ચ તામિસ્ર નામ ભવ સુભાગ્યવાન્ ॥ ૪૯॥

તં પ્રણમ્ય મહાદૈત્યઃ પાતાલમગમન્મુદા ।
શુક્રેણ પ્રેરિતૈર્દૈત્યૈઃ કૃતો રાજા સુરદ્વિષામ્ ॥ ૫૦॥

સહ તૈર્મદસંયુક્તો જિગ્યે બ્રહ્માણ્ડમણ્ડલમ્ ।
રાજ્યં ચકાર દૈત્યેશૈર્મહાબલયુતો બભૌ ॥ ૫૧॥

રવિં તેજસ્વિનં દૃષ્ટ્વા વૈરભાવેન સંયુતઃ ।
(Page ખં. ૬ અ. ૪૫ પાન ૧૨૫)
અન્ધકારેણ નિત્યં સચ્છાદયામાસ શક્તયઃ ॥ ૫૨॥

નિરર્થકં ચકારાસૌ સૂર્યં તેજસ્વિનાં વરમ્ ।
નાનાયત્નપરઃ સૂર્યસ્તં જેતું ન શશાક હ ॥ ૫૩॥

તતોઽહઙ્કારહીનઃ સ સસ્માર ગણનાયકમ્ ।
ગણેશેન હતો દૈત્યઃ સૂર્યભાવપ્રરક્ષણાત્ ॥ ૫૪॥

એતત્ સર્વં સમાખ્યાતં સૂર્યપુત્રસ્ય ચેષ્ટિતમ્ ।
વરદસ્ય મહાદેવ્યઃ સર્વસિદ્ધિકરં પરમ્ ॥ ૫૫॥

શૃણુયાદિદમાખ્યાનં પઠેદ્વા તસ્ય સર્વદમ્ ।
ભવિષ્યતિ સદા ચાન્તે બ્રહ્મભૂયપ્રદાયકમ્ ॥ ૫૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટવરદચરિતં નામ ચતુશ્ચત્વારિંશત્તમોઽધ્યાયઃ ॥ ૬.૪૪

## ૬.૪૫ વિકટચરિતસમાપ્તિવર્ણનં નામ પઞ્ચચત્વારિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

આદિશક્તિરુવાચ ।
એવં નાનાવતારાશ્ચ ધૃતાસ્તેન મહાત્મના ।
વિકટેન મહાદેવ્યઃ સઙ્ખ્યાતું નૈવ શક્યતે ॥ ૧॥

ભક્તિપ્રિયસ્વભાવેન ભક્તાનાં વિઘ્નનાશનાત્ ।
કુરુતે સ્વાવતારાન્ સ વિકટઃ પરમેશ્વરઃ ॥ ૨॥

મયૂરક્ષેત્રમધુના ગચ્છધ્વં તત્ર ચાપ્યહમ્ ।
સંસ્થિતા પૂર્ણરૂપેણાત્ર કલાંશાત્મિકા મુદા ॥ ૩॥

તત્ર વિઘ્નેશ્વરં ભક્ત્યા સેવધ્વં શક્તયઃ પરાઃ ।
તેન યોગીન્દ્રવન્દ્યાશ્ચ ભવિષ્યથ ન સંશયઃ ॥ ૪॥

વિષયાદિષુ ભાવેષુ મા ચિત્તં કુરુત પ્રિયાઃ ।

ગણેશમાર્ગમાશ્રિત્ય ભજધ્વં વિકટં પરમ્ ॥ ૫॥

વેદાદિષુ ગણેશસ્ય પ્રીતિદં કર્મ ચોત્તમમ્ ।
તદેવ ભક્તિસંયુક્તાઃ કુરુધ્વં નિત્યમાદરાત્ ॥ ૬॥

ગણેશમૂર્તેશ્ચ હૃદિ ચિન્તનં કુરુત પ્રિયાઃ ।
માનસીં બાહ્યપૂજાં ચ ગણેશપ્રીણનાય તામ્ ॥ ૭॥

વિષયેષુ વિરક્તત્વાદ્વિકટા ભક્તિરુત્તમા ।
ગણેશે સક્તચિત્તા સા કર્તવ્યા નિત્યમાદરાત્ ॥ ૮॥

મુદ્ગલ ઉવાચ ।
એવમુક્ત્વા દદૌ તાભ્યો મન્ત્રમેકાક્ષરં પરમ્ ।
સવિધિં ગણરાજસ્ય તતો મૌનં સમાદધે ॥ ૯॥

પ્રણમ્ય શક્તયઃ સર્વાસ્તતસ્તાં ભક્તિસંયુતાઃ ।
મહાકાલીમુખા દક્ષ યયુઃ ક્ષેત્રં મયૂરકમ્ ॥ ૧૦॥

મયૂરકે તત્ર દેવીં દદૃશુસ્તાઃ સુહર્ષિતાઃ ।
પ્રણમ્યાપૂજ્ય તાં ઢુણ્ઢિં તતસ્તેપુસ્તપો મહત્ ॥ ૧૧॥

શતવર્ષે ગતે તાસાં પુરતો મયૂરેશ્વરઃ ।
સમાયયૌ તતસ્તાં તાઃ પ્રણેમુર્હર્ષસંયુતાઃ ॥ ૧૨॥

પૂજ્ય નાનાવિધૈર્દેવમુપચારૈર્મનોરમૈઃ ।
પુનઃ પ્રણમ્ય વિઘ્નેશં તુષ્ટુવુઃ કરસમ્પુટાઃ ॥ ૧૩॥

મહાકાલીમહાલક્ષ્મીમહાસરસ્વતય ઊચુઃ ।
મયૂરેશાય વિઘ્નેશાય ભક્તવિઘ્નહારિણે ।
વિઘ્નદાત્રે હ્યભક્તેભ્યો ગણેશાય નમો નમઃ ॥ ૧૪॥

લમ્બોદરાય દેવાય મૂષકધ્વજિને નમઃ ।
અનાથાનાં સનાથાય નમો નાથાય તે નમઃ ॥ ૧૫॥

પરેશાય મહેશેભ્યઃ સિદ્ધિદાય ગજાનન ।
અનન્તાય સદા સ્વેભ્યઃ સર્વદાય નમો નમઃ ॥ ૧૬॥

બ્રહ્મણાં પતયે તુભ્યં સદા શાન્તિમયાય ચ ।
(Page ખં. ૬ અ. ૪૫ પાન ૧૨૬)
શાન્તીનાં શાન્તિરૂપાય પરાત્મને નમો નમઃ ॥ ૧૭॥

હેરમ્બાય નમસ્તુભ્યં કવયે કવિરૂપિણે ।
કવિભ્યઃ પદદાત્રે ચ કવીશાય નમો નમઃ ॥ ૧૮॥

સિદ્ધિબુદ્ધિવરાયૈવ સિદ્ધિબુદ્ધિપ્રદાયિને ।
સિદ્ધિબુદ્ધિપ્રચાલાય તદ્રૂપાય નમો નમઃ ॥ ૧૯॥

માયામાયિકચિહ્નાદ્યૈઃ પ્રખેલકસ્વરૂપિણે ।
યોગશાન્તિસ્થભાવાય શાન્તિદાય નમો નમઃ ॥ ૨૦॥

શક્તયે ભાનવે તુભ્યં વિષ્ણવે શઙ્કરાત્મને ।
નાનારૂપધરાયૈવ ખેલકાય નમો નમઃ ॥ ૨૧॥

કિં સ્તુમસ્ત્વાં ગણાધીશ યત્ર શાન્તિં પ્રલેભિરે ।
વેદાદયઃ શિવાદ્યાશ્ચ નમામો મયૂરધ્વજ ॥ ૨૨॥

ભક્તિં તે દેહિ સર્વેશ વાસં ક્ષેત્રે ત્વદીયિકે ।
તથેતિ તા ગણાધીશો હ્યગદદ્ભક્તિયન્ત્રિતઃ ॥ ૨૩॥

ઇદં સ્તોત્રં પઠેદ્યસ્તુ શ‍ૃણુયાત્ સ લભેત્ પરમ્ ।
ઇહ ભુક્ત્વાઽખિલાન્ ભોગાનન્તે સ્વાનન્દમાપ્નુયાત્ ॥ ૨૪॥

એવં દક્ષ મહચ્ચિત્રં ચરિતં કથિતં મયા ।
વિકટસ્ય સમાસેન સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૨૫॥

નાનેન સદૃશં કિઞ્ચિત્ સર્વદં કુત્ર વર્તતે ।
સાક્ષાદ્બ્રહ્મપ્રદં પૂર્ણં તત્ર કિં વર્ણયામ્યહમ્ ॥ ૨૬॥

ઇદં વિકટમાહાત્મ્યં શ‍ૃણુયાદ્યો નરોત્તમઃ ।
શ્રાવયેચ્ચ પઠેત્સોઽપિ સર્વસિદ્ધિમવાપ્નુયાત્ ॥ ૨૭॥

એકમાવર્તનં નિત્યં યઃ કુર્યાત્ સ મતો પરઃ ।
સાક્ષાદ્વિકટરૂપઃ સ દર્શનાત્ પાવનો નૃણામ્ ॥ ૨૮॥

યાવન્તિ સાધનાન્યેવ સાધયેત્ પરમાદૃતઃ ।
શતવારં લભેત્ પુણ્યં ખણ્ડસ્યાસ્ય શ્રવાચ્ચ તત્ ॥ ૨૯॥

ઇષ્ટાપૂર્તાદિકં યસ્તુ કુર્યાદ્ભક્તિસમન્વિતઃ ।
તસ્માચ્છતગુણં પુણ્યં શ્રવણાદસ્ય સંલભેત્ ॥ ૩૦॥

પુરાણોપપુરાણાનિ સેતિહાસાનિ નિત્યશઃ ।
શ‍ૃણુયાચ્ચ તતઃ પુણ્યમનેન સ્યાચ્છતાધિકમ્ ॥ ૩૧॥

બહુનાત્ર કિમુક્તેન યત્ર બ્રહ્મપતિઃ પરઃ ।
વર્ણિતો વિકટસ્તેન સમં કિં સમ્ભવેદ્ધદ ॥ ૩૨॥

સૂત ઉવાચ ।
એવમુક્ત્વા મહાયોગી મુદ્ગલો વિરરામ હ ।
દક્ષો હર્ષયુતોऽત્યન્તં પ્રણનામ ચ મુદ્ગલમ્ ॥ ૩૩॥

મયા સમ્પૂર્ણભાવેન કથિતં તે દ્વિજોત્તમ ।
કામનાશકરં પૂર્ણં વિકટસ્ય ચરિત્રકમ્ ॥ ૩૪॥

ધર્માર્થકામમોક્ષાણાં બ્રહ્મભૂયસ્ય દાયકમ્ ।
નાનેન સદૃશં કિઞ્ચિત્ કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૩૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ષષ્ઠે ખણ્ડે વિકટચરિતે વિકટચરિતસમાપ્તિવર્ણનં નામ પઞ્ચચત્વારિંશત્તમોऽધ્યાયઃ ॥ ૬.૪૫
॥ શ્રીગજાનનાર્પણમસ્તુ ॥

॥ ઇતિ શ્રીમુદ્ગલપુરાણે ષષ્ઠઃ ખણ્ડઃ સમાપ્તઃ ॥

Proofread by Yash Khasbage

*MudgalapurAna Khanda 6 Vikatacharitam*
pdf was typeset on September 18, 2023

Please send corrections to *sanskrit@cheerful.com*